॥ श्री जिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री वासुपूज्यचरित्रं प्रथमो भागः ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित भाषांतर करनार तथा छपावी प्रसिद्ध करनार-पंडित श्रावक हीरालाल हंसराज

( आ ग्रंथना अन्वय तथा भाषांतरना सर्व हक स्वाधिन राख्या छे )

विक्रम संवत् १९८४ सने १९२८ वीर संवत् २४[illegible]

किमत रु. ९—०—०



॥ श्री जिनाय नमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री वासुपूज्यचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

सान्वयभाषांतरकर्ता—पंडित श्रावक हीरालाल हंसराज—जामनगरवाळा,

( भाग पहेलो )

**अर्हंतं नौमि नाभेयं कल्याणकलशं सताम् । रेजुराम्रदलानीव यत्कर्णनिकटे जटाः ॥ १ ॥**

अन्वयः-यत्कर्णनिकटे जटाः आम्रदलानि इव रेजुः, (तं) सतां कल्याणकलशं नाभेयं अर्हंतं नौमि ॥ १ ॥

अर्थः—जेमना कर्णपासे रहेली ( केशोनी ) जटा जाणे आम्रवृक्षनां पांदडांओ होय नही ? एम शोभती हती एवा, सज्जनोना मंगलमाटेना सुवर्णना कलशसरखा नाभिराजाना पुत्र श्रीऋषभदेवप्रभुने हुं नमुं छुं. ॥ १ ॥

**भक्तिरागभृतानन्तभव्यस्वान्तस्थितेरिव । विद्रुमच्छायकायोऽसौ वासुपूज्यः श्रियेऽस्तु वः ॥ २ ॥**

अन्वयः-भक्तिरागभृतअनंतभव्यस्वांतस्थितेः इव विद्रुमच्छायकायः असौ वासुपूज्यः वः श्रिये अस्तु ॥ २ ॥

अर्थः—भक्तिना ( लाल ) रंगथी भरेला अनंत भव्य प्राणिओना हृदयमां वसवाथी जाणे ( रंगाया ) होय नही ? एवा परवाळांनी कांति सरखा ( लाल ) शरीरवाळा श्रीवासुपूज्यस्वामी तमारी लक्ष्मीमाटे थाओ ? ॥ २ ॥

**स्वार्थेऽहं कमठात्कष्टं सेहे भोगी तु मत्कृते । तन्मान्योऽयमितीवामुं पार्श्वो मूर्ध्नावहन्मुदे ॥ ३ ॥**

अन्वयः-अहं स्वार्थे कमठात् कष्टं, भोगी तु मत्कृते सेहे, तत् अयं मान्यः, इति इव अमुं मूर्ध्ना वहन् पार्श्वः मुदे. ॥ ३ ॥

अर्थः—में स्वार्थमाटे कमठथी कष्ट सहन कर्युं, अने नागेंद्रे तो मारे माटे कष्ट सहन कर्युं, माटे आ नागेंद्र (मारे) सत्कार करवा योग्यछे, जाणे एवा हेतुथीज होय नही? एम ते नागेंद्रने पोताना मस्तकपरधारण करता एवा श्रीपार्श्वनाथप्रभु हर्षमाटे थाओ? ॥ ३ ॥

**रणेऽपि धीरा वीराः स्युर्महावीरस्त्वसो यतः। देवीहावैर्जितो नेति यं स्तौतीन्द्रः स वोऽवतात् ॥ ४ ॥**

अन्वयः—धीराः रणे अपि वीराः स्युः, महावीरः तु असौ, यतः देवीहावैः न जितः, इति यं इंद्रः स्तौति, स वः अवतात्. ॥४॥

अर्थः—(घणा) धैर्यवान् सुभटो रणसंग्राममां पण शूरा होय छे, परंतु महासुभट तो आ (महावीर प्रभुज) छे, केमके ते देवीओना हावभावोथी जीताया नही, एवी रीते इंद्र जेमनी स्तुति करे छे, ते श्री महावीरप्रभु तमारुं रक्षण करो? ॥ ४ ॥

**अन्यानपि जिनान्नौमि ध्यायामि श्रुतदेवतां। प्रारब्धसिद्धिफलदान् श्रये कल्पतरून्गुरून् ॥ ५ ॥**

अन्वयः-अन्यान जिनान् अपि नौमि, श्रुतदेवतां ध्यायामि, प्रारब्धसिद्धिफलदान् कल्पतरून् गुरून् श्रये. ॥ ५ ॥

अर्थः—बीजा जिनेश्वरोने पण हुं नमुं छुं, तेमज शासनदेवीने हृदयमां धारण करुं छुं. तथा प्रारभेला कार्यने संपूर्ण करवारूप फलने आपनारा कल्पवृक्षसरखा गुरुमहाराजोनो ( पण ) हुं आश्रय करुं छुं. ॥ ५ ॥

सतामाह्लादनो धर्मः सर्वलोकोत्तरस्थितिः । जीयाज्जन्तुसमुद्धारव्यापाररुचिरश्चिरम् ॥ ६ ॥

अन्वयः—सतां आह्लादनः, सर्वलोकोत्तरस्थितिः, जंतुसमुद्धारव्यापाररुचिरः धर्मः चिरं जीयात्. ॥ ६ ॥

अर्थः—सज्जनोने आनंद उपजावनारो, सर्व लोकमां उत्तम प्रकारनी व्यवस्थावाळो, तथा प्राणीओना उद्धारना कार्यथी शोभतो एवो धर्म घणा काल सुधी जय पामो ! ॥ ६ ॥

देयाद्धर्मः स वः कामान्कामधेनुरमूर्यतः । चतस्रः क्षीरधारन्ति बुद्धिश्रीवृद्धिसिद्धयः ॥ ७ ॥

अन्वयः—यतः अमूः बुद्धिश्रीवृद्धिसिद्धयः चतस्रः क्षीरधारंति, सः कामधेनुः धर्मः वः कामान् देयात्. ॥ ७ ॥

अर्थः—जेमांथी आ बुद्धि, लक्ष्मी, वृद्धि, अने सिद्धिरूपी क्षीरनी चार धाराओ झरे छे, एवो कामधेनु सरखो ते धर्म तमारां

वांछितोने आपो ? ॥ ७ ॥

परोपकारिणां धुर्यो धर्म एवाश्रितेषु यः । ददाति निर्वृतिं स्वस्य सत्तायामपि निःस्पृहः ॥ ८ ॥

अन्वयः–धर्म एव परोपकारिणां धुर्यः, यः स्वस्य सत्तायामपि निःस्पृहः आश्रितेषु निर्वृतिं ददाति. ॥ ८ ॥

अर्थः—परोपकारीओमां धर्मज मुख्य छे, के जे पोतानी मालीकीनी होवा छतां पण तेमां निःस्पृही रहीने आश्रीतोने (ते) मुक्ति आपे छे. ॥ ८ ॥

जयन्ति जगदुत्संगरंगदुत्तुंगकीर्तयः । ते सन्तः सततं येषां धर्मेऽस्मिन् रमते मतिः ॥ ९ ॥

अन्वयः–येषां मतिः अस्मिन् धर्मे रमते, जगत्उत्संगरंगदुत्तुंगकीर्तयः ते संतः सततं जयंति. ॥ ९ ॥

अर्थः—जेओनी बुद्धि आ धर्ममां रम्या करे छे एवा, तथा जगतनी अंदर विस्तार पामती उंची कीर्तिवाळा ते सज्जनो हमेशां जयवंता वर्ते छे. ॥ ९ ॥

चत्वारोऽस्य सपर्यायाः पर्यायाः कृतिनां मताः । दानशीलतपोभावनामानः कामितप्रदाः ॥ १० ॥

अन्वयः-कृतिनां मताः, कामितप्रदाः दानशीलतपोभावनामानः अस्य सपर्यायाः चत्वारः पर्यायाः. ॥ १० ॥

अर्थः—विद्वानोए स्वीकारेला, अने वांछित पदार्थो आपनारा, दान, शील, तप अने भाव नामना उपभेदोसहित चार भेदो आ धर्मना छे. ॥ १० ॥

ते तु भीमभवाम्भोधिसेतवः पुण्यहेतवः । बुद्धिमद्भिर्विबुध्यन्ते महतां चरितश्रुतेः ॥ ११ ॥

अन्वयः-भीमभवांभोधिसेतवः पुण्यहेतवः ते तु बुद्धिमद्भिः महतां चरितश्रुतेः विबुध्यंते. ॥ ११ ॥

अर्थः—(आ) संसाररूपी भयंकर महासागरने (उल्लंघवामाटे) पूलसरखा, तथा पुण्यना कारणरूप एवा (धर्मना) ते भेदोनुं ज्ञान तो बुद्धिवानोने महान पुरुषोनां चरित्रो सांभळवाथी थाय छे. ॥ ११ ॥

अतः सत्पुरुषश्रेणिश्रवणामृतवर्षणम् । शर्मणः कार्मणं कर्ममालिन्यक्षालनक्षमम् ॥ १२ ॥

वासवानां हि यः पूज्यो वासुपूज्य इति श्रुतः। तस्य तीर्थेशितुश्चारु चरितं रचयाम्यदः ॥ १३ ॥ युग्मं ॥

अन्वयः—अतः यः हि वासवानां पूज्यः वासुपूज्य इति श्रुतः, तस्य तीर्थेशितुः सत्पुरुषश्रेणिश्रवणअमृतवर्षणं, शर्मणः कार्मणं, कर्ममालिन्यक्षालनक्षमं, अदः चारु चरितं रचयामि. ॥ १२ ॥ १३ ॥ युग्मं ॥

अर्थः—(अने) तेथी जे खरेखर इंद्रोने पूजनीक होवाथी "वासुपूज्य" एवा (नामथी) प्रसिद्ध थयेला छे, एवा ते तीर्थंकरनुं, सज्जनोनी पंक्तिना श्रवणोमां अमृतना वरसाद सरखं, सुखना कामणसरखुं, तथा कर्मोनी मलीनताने धोवामां समर्थ एवुं आ मनोहर चरित्र हुं रचुं छुं. ॥ १२ ॥ १३ ॥

अस्ति स्वस्तिनिधिः स्वर्णशैलवर्ण्यान्तरावनिः। जम्बूद्वीप इति द्वीपो लक्षयोजनविस्तृतः ॥ १४ ॥

अन्वयः—स्वस्तिनिधिः, स्वर्णशैलवर्ण्यान्तरावनिः, लक्षयोजनविस्तृतः "जंबूद्वीपः" इति द्वीपः अस्ति. ॥ १४ ॥

अर्थः—कल्याणना भंडारसरखो, मेरुपर्वतवडे शोभीती छे वचली भूमि जेनी, तथा एक लाख जोजनना विस्तारवालो "जंबूद्वीप"

नामनो द्वीप छे. ॥ १४ ॥

**यस्योत्तरकुरुस्थानश्चित्ररत्नमयो द्रुमः । जम्बूर्भवति मायूरच्छत्रं द्वीपजयोच्छ्रितम् ॥ १५ ॥**

अन्वयः—उत्तरकुरुस्थानः, चित्ररत्नमयः जंबूः द्रुमः यस्य द्वीपजयोच्छ्रितं मायूरच्छत्रं भवति. ॥ १५ ॥

अर्थः—उत्तरकुरुक्षेत्रमां आवेलो, तथा नानाप्रकारना रत्नोथी भरेलो जंबूवृक्ष (बीजा) द्वीपोने जीतवाथी जेने उंचे धारण करेला मयूरछत्ररूप थाय छे. (अर्थात् ते वृक्ष जंबूद्वीपना मस्तकपर छत्रसरखो शोभे छे.) ॥ १५ ॥

**योऽनन्तप्रतिमोऽप्यत्र सर्वत्राप्रतिमः क्षितौ । अनादिनिधनोऽप्युक्तः सप्तवर्षमयो बुधैः ॥ १६ ॥**

अन्वयः—यः अत्र क्षितौ अनंतप्रतिमः अपि सर्वत्र अप्रतिमः, अनादिनिधनः अपि बुधैः सप्तवर्षमयः उक्तः ॥ १६ ॥

अर्थः—जे जंबूद्वीप आ पृथ्वीपर (तीर्थंकरोनी) अनंती प्रतिमाओवाळो होवा छतां सर्व जगोए 'अप्रतिमः' एटले प्रतिमाविनानो कहेलो छे, (ए विरोधाभास छे, तेनो परिहार ए के) "अप्रतिमः" एटले तेना सरखो बीजो कोइ पण द्वीप शोभावाळो नथी. वळी आदि

अने विनाशथी रहित (शाश्वतो) होवा छतां पण जेने पंडितोए "सप्तवर्षमयः" एटले फक्त सात वर्षोनीज वयवाळो कहेलो छे, (ए विरोधाभास छे, तेनो परिहार ए के) "सप्तवर्षमयः" एटले ए जंबूद्वीपना सात क्षेत्रो (विभागो) छे. ॥ १६ ॥

**सोऽस्ति कङ्कणरूपेण लवणाम्बुधिनावृतः । द्विलक्षयोजनोन्मानो विस्तारेण निरन्तरम् ॥ १७ ॥**

अन्वयः—कंकणरूपेण लवणांबुधिना आवृतः सः निरंतरं विस्तारेण द्विलक्षयोजनोन्मानः अस्ति. ॥ १७ ॥

अर्थः——कंकणसरखा आकारवाळा लवणसमुद्रथी वींटायेलो ते जंबूद्वीप निरंतर बे लाख जोजनना विस्तारवाळो छे. ॥ १७ ॥

**योऽन्तःकूटस्थचैत्येषु भक्त्या नित्यार्हतां पुरः । नृत्यत्यूर्मिभुजैर्नित्यं गायत्यूर्जितगर्जितैः ॥ १८ ॥**

अन्वयः—अंतःकूटस्थचैत्येषु नित्यार्हतां पुरः यः भक्त्या नित्यं ऊर्मिभुजैः नृत्यति, ऊर्जितगर्जितैः गायति. ॥ १८ ॥

अर्थः——अंदरना भागमां रहेला पर्वतोपर आवेला मंदिरोमां रहेली शाश्वता तीर्थंकरोनी ( प्रतिमाओनी ) पासे जे लवण समुद्र भक्तिथी हमेशां मोजांओरूपी हाथोवडे नाच्या करे छे, तथा गंभीर गर्जनाओथी गाय छे. ॥ १८ ॥

द्वीपोऽस्ति परतस्तस्य धातकीखण्डसंज्ञकः । यः पृथुत्वे चतुर्लक्षयोजनानि समन्ततः ॥ १९ ॥

अन्वयः-तस्य परतः धातकीखंडसंज्ञकः द्वीपोऽस्ति. यः समंततः पृथुत्वे चतुर्लक्षयोजनानि. ॥ १९ ॥

अर्थः--ते लवणसमुद्रनी आगळ धातकीखंड नामनो द्वीप छे, के जे चोतरफथी चार लाख जोजनना विस्तारवाळो छे. ॥ १९ ॥

ख्यातोऽस्मदभिधानेन द्वीपोऽयमिति नृत्यते । यत्र रत्नमयैर्मेरुद्वयस्थैर्धातकीद्रुमैः ॥ २० ॥

अन्वयः-अस्मदभिधानेन अयं द्वीपः ख्यातः, इति यत्र रत्नमयैः मेरुद्वयस्थैः धातकीद्रुमैः नृत्यते. ॥ २० ॥

अर्थः-आ द्वीप अमारा नामथी प्रख्यात थयेलो छे, एम (विचारीने) बे मेरुपर्वतपर रहेला रत्नमय धातकीवृक्षो ज्यां नाच्या करेछे. ॥२०॥

यश्चकास्ति चतुःषष्ट्या विजयैः पदिकैरिव । चतुरङ्गबलद्यूतफलकं नयधर्मयोः ॥ २१ ॥

अन्वयः-नयधर्मयोः चतुरंगबलद्यूतफलकं यः पदिकैरिव चतुःषष्ट्या विजयैः चकास्ति. ॥ २१ ॥

अर्थः--न्याय अने धर्मराजाना चतुरंगी सैन्यनी सेतरंजबाजीना बाजोठ सरखो एवो जे (आ) धातकीखंड पायदळना सोगठासरखा

चोसठ विजयोवडे शोभी रहेलो छे. ॥ २१ ॥

जनस्यान्तरषड्वैरिजेतुस्तेजोयशःश्रियाम् । यत्रार्काः कुण्डलायन्ते द्वादश द्वादशेन्दवः ॥ २२ ॥

अन्वयः—यत्र द्वादश अर्काः, द्वादश इंदवः, अंतरषड्वैरिजेतुः जनस्य तेजोयशःश्रियां कुंडलायंते. ॥ २२ ॥

अर्थः—जे धातकीखंडमां आवेला बार सूर्यो तथा बार चंद्रो छ प्रकारना अंतरंग शत्रुओने जीतनारा मनुष्यना तेज अने यशनी लक्ष्मीना कुंडलरूप थाय छे. (अर्थात् तेवा प्रकारनी लक्ष्मीदेवीना कुंडलसरखा शोभे छे.) ॥ २२ ॥

विद्यते तस्य कालोदजलधिः परिधिस्थितः । विस्तृतः सर्वतो योऽष्टलक्षयोजनमानभृत् ॥ २३ ॥

अन्वयः—तस्य परिधिस्थितः कालोदजलधिः विद्यते, यः सर्वतः अष्टलक्षयोजनमानभृत् विस्तृतः. ॥ २३ ॥

अर्थः—ते धातकीखंडने घेरीने रहेलो कालोदधि महासागर छे, के जे चोतरफ आठ लाख जोजनना विस्तारवाळो छे. ॥२३॥

आशापत्रेषु गीर्नित्यमनन्तानर्हतां गुणान् । लिखत्वितीव यो धत्ते मषीभावं निजाम्भसि ॥ २४ ॥

अन्वयः-गीः नित्यं आशापत्रेषु अर्हतां अनंतान् गुणान् लिखतु, इति इव यः निजांभसि मषीभावं धत्ते. ॥ २४ ॥

अर्थः—सरस्वतीदेवी हमेशां दिशाओरूपी पत्रोपर श्रीअरिहंतप्रभुना अनंता गुणोने भले लखो, जाणे एवा हेतुथीज होय नही ? तेम आ कालोदधि महासागर पोताना जलमां मषीपणुं धारण करे छे. ॥ २४ ॥

**द्वीपोऽस्ति परतस्तस्य श्रीपुष्करवराह्वयः। यो योजनानि विस्तारे लक्षाः षोडश लक्ष्यते ॥ २५॥**

अन्वयः-तस्य परतः श्रीपुष्करवराह्वयः द्वीपः अस्ति, यः विस्तारे षोडशलक्षाः योजनानि लक्ष्यते. ॥ २५ ॥

अर्थः—तेनी आगळ श्री पुष्करवर नामनो द्वीप छे, के जे विस्तारमां शोळलाख जोजननो छे. ॥ २५ ॥

**तस्य नामार्थमत्यर्थं प्रथयन्ति वरश्रियः। माद्यन्मधुपझङ्कारैः पुष्करैः पुष्कराश्रयाः ॥ २६ ॥**

अन्वयः-वरश्रियः पुष्कराश्रयाः माद्यत् मधुपझंकारैः पुष्करैः तस्य नामार्थं अत्यर्थं प्रथयंति. ॥ २६ ॥

अर्थः—उत्तम शोभावाळां तळावो, उन्मत्त भमराओनां झंकारशब्दोवाळां पुष्करो (कमलो) वडे करीने ते द्वीपना नामना

अर्थने विस्तारे छे ॥ २६ ॥

तस्यार्धे वृत्तवान्भूभृद्भासते मानुषोत्तरः । नित्यार्हच्चारुचैत्यानि यस्यास्ते मुकुटः स्फुटः ॥ २७ ॥

अन्वयः-तस्य अर्धे वृत्तवान् मानुषोत्तरः भूभृद् भासते, नित्यार्हत्चारुचैत्यानि यस्य स्फुटः मुकुटः आस्ते. ॥ २७ ॥

अर्थः—ते द्वीपना अर्धभागमां मानुषोत्तर नामे पर्वत शोभे छे, ( ते पर रहेलां ) श्रीअरिहंतप्रभुनां मनोहर शाश्वतां जिनमंदिरो प्रगटरीते जेना मुकुटजेवां लागे छे. ॥ २७ ॥

तस्मादर्वाग्विभागेऽस्ति स्वर्णाद्रिर्भूमिभूषणम् । यद्भासः केसरायन्ते गगने नीलनीरजे ॥ २८ ॥

अन्वयः-तस्मात् अर्वाग्विभागे भूमिभूषणं स्वर्णाद्रिः अस्ति, यद्भासः गगने नीलनीरजे केसरायंते. ॥ २८ ॥

अर्थः—तेथी आगला भागमां पृथ्वीना आभूषण सरखो कनकाचल पर्वत छे, के जेनी कांति आकाशरूपी श्यामकमलमां केसराओनी पेठे शोभे छे. ॥ २८ ॥

**ततः पूर्वविदेहाख्यं क्षेत्रं प्राच्यां प्रियं सताम् । यत्रार्हद्वाक्सुधासेकाज्जायन्ते शिवशालयः ॥ २९ ॥**

अन्वयः-ततः प्राच्यां सतां प्रियं पूर्वविदेहाख्यं क्षेत्रं, यत्र अर्हद्वाक्यसुधासेकात् शिवशालयः जायते. ॥ २९ ॥

अर्थ —तेथी पूर्वदिशामां सज्जनोने प्रिय एवुं पूर्वविदेह नामनुं क्षेत्र छे, के ज्यां श्रीअरिहंतप्रभुना वचनोरूपी अमृतना सींचावाथी मोक्षरूपी डांगर उत्पन्न थाय छे. ॥ २९ ॥

**तत्र सीतासरिद्वीचिसिच्यमानवनावनिः । अस्ति विस्तारिमङ्गल्यो विजयो मङ्गलावती ॥ ३० ॥**

अन्वयः-तत्र सीतासरिद्वीचिसिच्यमानवनावनिः विस्तारिमंगल्यः मंगलावती विजयः अस्ति. ॥ ३० ॥

अर्थः—तेमां सीतानामनी नदीना मोजांओवडे सींचाती वनभुमिवाळो, तथा विस्तारयुक्त मंगलोवाळो मंगलावतीनामे विजय छे. ।३०।

**विभावर्यामपि जना विभावर्याङ्गभूषणैः । ध्वस्तध्वान्तभरा यत्र यान्ति प्रान्तरवर्त्मसु ॥ ३१ ॥**

अन्वयः-यत्र जनाः विभावर्यां अपि विभावर्यअंगभूषणैः ध्वस्तध्वांतभराः प्रांतरवर्त्मसु यांति. ॥ ३१ ॥

अर्थः—जेमां ( वसनारा ) लोको रात्रिए पण शरीरपर पहेरेलां अति चळकतां आभूषणोवडे करीने नष्ट करेल छे अंधकारनो समूह जेओए, एवा थयाथका अंदरनी शेरीओमां पण सुखेथी आवजाव करी शके छे. ॥ ३१ ॥

**इन्द्रनीलमयं दाम शून्येऽपि पतितं पथि। भुजङ्गमभ्रमेणेव यत्र नादीयते जनैः ॥ ३२ ॥**

अन्वयः-यत्र शून्येऽपि पथि पतितं इंद्रनीलमयं दाम भुजंगमभ्रमेणेव जनैः न आदीयते. ॥ ३२ ॥

अर्थः-( वळी ) ज्यां शून्यमार्गमां पण पडेली इंद्रनीलमणीओनी माळाने जाणे सर्पना भ्रमथीज लोको ग्रहण करता नथी. ॥३२॥

**तत्र पात्रं सुवर्णानां वर्णिन्यास्तिलकं भुवः। निःसपत्ननृरत्नश्रीवरं रत्नपुरं पुरम् ॥ ३३ ॥**

अन्वयः-तत्र सुवर्णानां पात्रं, भुवः वर्णिन्याः तिलकं, निःसपत्ननृरत्नश्रीवरं रत्नपुरं पुरं. ॥ ३३ ॥

अर्थः—त्यां उत्तम वर्णोना स्थानरूप ( सुवर्णना पात्रसरखुं ) तथा पृथ्वीरूपी स्त्रीना ( ललाटमां रहेला ) तिलक सरखुं, अने अनुपम पुरुषोरूपी रत्नोनी शोभावाळुं रत्नपुरनामे नगर छे. ॥ ३३ ॥

सत्कृत्यामृतसिक्तानां यत्र भान्ति ध्वजाञ्चलाः । तीर्थेशवेश्मनां पुण्यद्रुमाणां पल्लवा इव ॥ ३४ ॥

अन्वयः-यत्र तीर्थेशवेश्मनां ध्वजांचलाः सत्कृत्यामृतसिक्तानां पुण्यद्रुमाणां पल्लवाः इव भाति. ॥ ३४ ॥

अर्थः—( वळी ) ज्यां तीर्थंकरोना मंदिरोपर रहेली ध्वजाओना छेडा, सुकृतरूपी अमृतथी सींचेला पुण्यरूपी वृक्षोना जाणे पल्लवो ( नवां कूंपलो ) होय नही ! तेम शोभी रहेला छे. ॥ ३४ ॥

वपन्तो धार्मिकाः सारं यत्र क्षेत्रेषु सप्तसु । पुण्यधान्यैर्गरिष्ठं स्वं कोष्ठागारं सुबिभ्रति ॥ ३५ ॥

अन्वयः-यत्र सप्तसु क्षेत्रेषु सारं वपंतः धार्मिकाः पुण्यधान्यैः स्वं गरिष्ठं कोष्ठागारं सुबिभ्रति. ॥ ३५ ॥

अर्थः—( वळी ) ज्यां साते क्षेत्रोमां ( पोतानुं ) द्रव्य खरचता ( वावता ) एवा धार्मिक मनुष्यो पुण्यरूपी धान्योवडे पोताना महोटा कोठारो सारीरीते भरी राखे छे. ॥ ३५ ॥

यत्र स्त्रीवेणिवक्षोजवक्त्रेषु श्रीरहर्निशम् । वीरासिकुम्भिकुम्भाब्जवाससौख्येन खेलति ॥ ३६ ॥

अन्वयः-यत्र वीरासि कुंभिकुंभ अब्जवास सौख्येन स्त्रीवेणिवक्षोजवक्त्रेषु श्रीः अहर्निशं खेलति. ॥ ३६ ॥

अर्थः—( वळी ) ज्यां सुभटनी तलवारना हाथीना कुंभस्थलना तथा कमलना निवास सरखाज सुखथी स्त्रीओना चोटलामां, स्तनोपर, तथा मुखपर लक्ष्मीदेवी (शोभा) रातदिवस क्रीडा करी रहेली छे. ॥ ३६ ॥

**धर्मेण त्याजिता लक्ष्मीश्चापलं यद्गृहेषु यत् । कोटिध्वजाञ्चलव्याजात्तन्मूर्तमिव वीक्ष्यते ॥ ३७ ॥**

अन्वयः-यद्गृहेषु धर्मेण लक्ष्मीः चापलं त्याजिता, यत् कोटिध्वजांचलव्याजात् तन्मूर्तं इव वीक्ष्यते. ॥ ३७ ॥

अर्थः—त्यांना घरोमां धर्मे (खरेखर) लक्ष्मीनुं चपलपणुं छोडावी दीधुं छे. कारणके, करोडपतिओना (घरपर उडती) ध्वजाओना ( चपल ) छेडाओना मिषथी जाणे ( लक्ष्मीनुं ते ) मूर्तिवंत चपलपणुं ( दूर उडीजतुं होय नही ! ) एम देखाय छे. ॥ ३७ ॥

**तस्मिन्पद्मोत्तरो राजा प्रजापालनलालसः । अभूदभूमिर्दोषाणां रोषाणामिव सन्मुनिः ॥ ३८ ॥**

अन्वयः-तस्मिन् प्रजापालनलालसः, सन्मुनिः रोषाणां इव, दोषाणां अभूमिः पद्मोत्तरः राजा अभूत्. ॥ ३८ ॥

अर्थः—ते नगरमां प्रजापालननी अभिलाषावालो, तथा उत्तम मुनि जेम रोषथी रहित होय छे, तेम दोषोथी रहित एवो पद्मोत्तर नामे राजा हतो ॥ ३८ ॥

**अंह्रिहस्तास्यनेत्राणि नलिन्याभान्ययं दधौ । अतोऽस्य नलिनीगुल्म इत्याख्याभिदधे बुधैः ॥ ३९ ॥**

अन्वयः—अयं नलिन्याभानि अंह्रि हस्त आस्य नेत्राणि दधौ, अतः अस्य " नलिनीगुल्म " इत्याख्या बुधैः अभिदधे. ॥३९॥

अर्थः—आ राजा " नलिन्याभानि " एटले कमलिनी सरखां ( कोमळ ) पग, हाथ, मुख, तथा नेत्रोने धारण करतो हतो, अने तेथी तेनुं " नलिनीगुल्म " एवुं नाम विद्वानोए पाडयुं हतुं. ॥ ३९ ॥

**स्वप्ने पद्मं महत्तस्मिन्गर्भस्थे ददृशेऽम्बया । अतः सद्भिर्महापद्म इत्यस्य विदधेऽभिधा ॥४०॥**

अन्वयः—तस्मिन् गर्भस्थे अंबया स्वप्ने महत् पद्म ददृशे, अतः सद्भिः अस्य " महापद्मः " इति अभिधा विदधे ॥ ४० ॥

अर्थः—ते राजा ज्यारे गर्भमां हता त्यारे तेमनी माताए स्वप्नमां मोटुं पद्म जोयुं हतुं, तेथी सज्जनोए तेमनुं " महापद्म "

एवुं नाम पाडयुं हतुं. ॥ ४० ॥

**व्योममण्डलमालिन्यच्छलकज्जलमालिनः । बभौ छायेव यत्तेजःप्रदीपस्यारिदुर्यशः ॥ ४१ ॥**

अन्वयः—व्योममंडलमालिन्यच्छलकज्जलमालिनः यत्तेजःप्रदीपस्य छाया इव अरिदुर्यशः बभौ. ॥ ४१ ॥

अर्थः—आकाशमंडलनी श्यामताना मिषथी काजलवाळा, एवा जे राजाना तेजरूपी दीपकनी छायानी पेठे दुश्मनोनो अपजश देखातो हतो. ॥ ४१ ॥

**आपीय विशदं वैरिवनितानां स्मितामृतम् । उद्गारवद्यशोभारं यस्यासिः शाश्वतं व्यधात् ॥ ४२ ॥**

अन्वयः—यस्यासिः वैरिवनितानां विशदं स्मितामृतं आपीय उद्गारवत् यशोभारं शाश्वतं व्यधात् ॥ ४२ ॥

अर्थः—जे राजानी तलवारे वैरीओनी स्त्रीओना (उज्ज्वल) हास्यरूपी अमृतने पीने, तेना उद्गारनी पेठे ते राजाना यशना समूहने शाश्वतो कर्यो. ॥ ४२ ॥

स देहद्युतिसंदोहसंदेहितविभूषणः । सभायां भूधनोऽन्येद्युर्भद्रासनमभूषयत् ॥ ४३ ॥

अन्वयः—देहद्युतिसंदोहसंदेहितविभूषणः स भूधनः अन्येद्युः सभायां भद्रासनं अभूषयत्. ॥ ४३ ॥

अर्थः—(पोताना) शरीरनी कांतिना समूहथीज आभूषणोनी शंका उपजावनारो एवो ते राजा एक दिवसे राजसभामां (आवीने) सिंहासनने शोभाववा लाग्यो. ॥ ४३ ॥

श्रीकेलिदीर्घिका संसदथ हंसकुलैरिव । रेजे राजपदाम्भोजसेवाहेवाकिभिर्नृभिः ॥ ४४ ॥

अन्वयः—अथ श्रीकेलिदीर्घिका हंसकुलैः इव, संसद् राजपदांभोजसेवाहेवाकिभिः नृभिः रेजे. ॥ ४४ ॥

अर्थः—हवे लक्ष्मीदेवीने क्रीडा करवानी वावडी जेम हंसोना समूहोवडे शोभे छे, तेम ते राजसभा राजाना चरणकमलोनी सेवा इच्छनारा पुरुषोवडे शोभती हती. ॥ ४४ ॥

अमान्त्यान्तर्विनिर्यान्त्या सितया पलितच्छलात् । बुद्ध्या विमलबोधाद्या रेजिरे तत्र मन्त्रिणः ॥ ४५ ॥

अन्वयः-तत्र पलितच्छलात् अंतः अमात्या विनिर्यात्या सितया बुध्ध्या विमलबोधाद्याः मंत्रिणः रेजिरे. ॥ ४५ ॥

अर्थः—ते सभामां श्वेत वाळना मिषथी, अंदर नही मावाथी बहार निकळती एवी उज्ज्वल बुद्धिवडे करीने " विमलबोध " आदिक मंत्रिओ शोभता हता ॥ ४५ ॥

मुहुः प्रकम्प्य मूर्धानं सभ्यैर्निबिडपूर्तये । क्षेप्यमाणानि कर्णेषु तत्र सूक्तान्यधुर्बुधाः ॥ ४६ ॥

अन्वयः-तत्र सभ्यैः क्षेप्यमाणानि सूक्तानि निबिडपूर्तये मुहुः मूर्धानं प्रकंप्य बुधाः कर्णेषु अधुः. ॥ ४६ ॥

अर्थः—ते सभामां सभासदो जे उत्तम काव्यो बोलता हता, तेने ( पोताना हृदयोमां ) खूब ठसाववा माटे वारंवार पोतानां मस्तक कंपावीने पंडितो ( पोताना ) कर्णोमां धारण करता हता. ॥ ४६ ॥

व्यवहारकृतस्तत्र देहार्चिर्याचकैरिव । रत्नैरन्योन्यसंघट्टवाचालैर्भूषिता स्थिताः ॥ ४७ ॥

अन्वयः-तत्र देहार्चिर्याचकैरिव अन्योन्यसंघट्टवाचालैः रत्नैः भूषिताः व्यवहारकृतः स्थिताः. ॥ ४७ ॥

अर्थः—( वळी ) त्यां शरीरनी कांतिनी जाणे याचना करता होय नही ? तेम परस्पर भटकावाथी बोलता ( जणाता ) एवा रत्नोवडे विभूषित थयेला व्यापारीओ बेठा हता. ॥ ४७ ॥

**यत्सैन्यप्रोच्छलद्धूलीमये तिमिरसंचये । दधौ खद्योतपोतस्य द्युतिं प्रद्योतनः सदा ॥ ४८ ॥**

अन्वयः-यत्सैन्यप्रोच्छलद्धूलीमये तिमिरसंचये प्रद्योतनः सदा खद्योतपोतस्य द्युतिं दधौ. ॥ ४८ ॥

अर्थः—जे राजाओना सैन्यना ( चालवाथी ) धूलीनो समूह ( उंचे ) उडतो हतो, अने तेथी ( आकाशमां ) अंधकारनो समूह ( व्यापतो हतो तथा तेनी अंदर रहेलो ) सूर्य हमेशां पतंगीयांना बच्चांनी कांतिने धारण करतो हतो. ॥ ४८ ॥

**उदेष्यतः प्रतापाग्नेर्धूमदण्ड इवोन्मुखः । यदसिर्युधि शत्रुस्त्रीनेत्रैर्दृष्टो जलाविलैः ॥ ४९ ॥**

अन्वयः—उदेष्यतः प्रतापाग्नेः उन्मुखः धूमदंडः इव, यदसिः युधि जलाविलैः शत्रुस्त्रीनेत्रैः दृष्टः, ॥ ४९ ॥

अर्थः—( जे राजाओना ) उछळता एवा प्रतापरूपी अग्निनो उंचे चडतो एवो जाणे धूमाडानो दंड होय नही ! तेम जेओनी

तलवार युद्धमां शत्रुओनी स्त्रीओनी अश्रुओथी भरेली आंखोए जोइ हती. ॥ ४९ ॥

**कर्पूरपूरवद्येषां यशो रोदःसमुद्गके । जज्ञेऽरिदुर्यशःकृष्णाङ्गारसङ्गाच्चिरं स्थिरम् ॥ ५० ॥**

अन्वयः—येषां यशः रोदःसमुद्गके अरिदुर्यशः कृष्णांगारसंगात् कर्पूरपूरवत् चिरं स्थिरं जज्ञे. ॥ ५० ॥

अर्थः—(वळी) जे राजाओनो जश पृथ्वीआकाशना बनेला डाभलामां, शत्रुओना अपजशरूपी कोलसाना संगथी कपूरना समूहनी पेठे घणा काळसुधी स्थिर रह्यो हतो ॥ ५० ॥

**स्वाम्यादेशघनावेशरसलालसचातकाः । उन्मुखास्तेऽपि भूपालास्तत्र तस्थुर्यथास्थिति ॥ ५१ ॥**

अन्वयः—तेऽपि भूपालाः तत्र स्वाम्यादेशघनावेशरसलालसचातकाः उन्मुखाः यथास्थिति तस्थुः. ॥ ५१ ॥ चतुर्भिः कलापकं ॥

अर्थः—(एवा एवा) ते राजाओ पण ते महापद्मराजानी सभामां (पोताना ते) स्वामिना आदेशरूपी वरसादना रसनी लालचथी चातकपक्षीओनी पेठे उंचां मुख राखीने उचित स्थानके बेठा हता. ॥ ५१ ॥ (उपरना चारे श्लोकोनो भेळो अर्थ जाणवो.)

**तांश्च भूमिभुजः स्वौ च भुजौ पश्यन्मुहुर्मदात् । राजा पद्मोत्तरो हृष्यन्नुवाच सचिवेश्वरम् ॥ ५२ ॥**

अन्वयः-तान् भूमिभुजः, च स्वौ भुजौ मुहुः मदात् पश्यन् पद्मोत्तरः राजा हृष्यन् सचिवेश्वरं उवाच. ॥ ५२ ॥

अर्थः—ते राजाओने, तथा पोतानी बन्ने भुजाओने वारंवार मदथी जोतो एवो ते पद्मोत्तर राजा हर्ष पामतोथको (पोताना) महोटा मंत्रीने कहेवा लाग्यो के, ॥ ५२ ॥

**यदाक्रामति दिक्चक्रं भूशक्रो भुजविक्रमात् । तन्न चित्रं यतः सर्वबलेभ्यो दोर्बलं महत् ॥ ५३ ॥**

अन्वयः-भूशक्रः भुजविक्रमात् यत् दिक्चक्रं आक्रामति, तत् चित्रं न, यतः सर्वबलेभ्यः दोर्बलं महत् . ॥ ५३ ॥

अर्थः—राजा भुजाबलथी दिक्चक्रनुं जे आक्रमण करे छे, (अर्थात् सर्व देशोमां विजय मेळवे छे) तेमां कंइ आश्चर्य नथी, कारणके सर्व बलोमां भुजबल महोटुं छे. ॥ ५३ ॥

**वदामीदमयुक्तं चेत्तन्नीतौ दक्ष शिक्षय । यन्मत्पितामहस्यापि सर्वशिक्षागुरुर्भवान् ॥ ५४ ॥**

अन्वयः-( हे ) दक्ष ! चेत् इदं अयुक्तं वदामि, तत् नीतौ शिक्षय? यत् भवान् मत्पितामहस्यापि सर्वशिक्षागुरुः. ॥ ५४ ॥

अर्थः—( वळी ) हे विचक्षणमंत्री ! जो आ हकीकत हुं अयोग्य कहेतो होउं, तो ( तमो मने ) न्याय माटे शिखामण आपजो? केमके तमो मारा दादाना पण सर्वरीते शिक्षागुरु छो. ॥ ५४ ॥

अथामात्यपतिर्दध्यौ नृपोऽयं भुजदुर्मदः । ततस्तत्त्वविदां हृद्भिरुपहास्यं वदत्यदः ॥ ५५ ॥

अन्वयः-अथ अमात्यपतिः दध्यौ, अयं नृपः भुजदुर्मदः, ततः तत्त्वविदां हृद्भिः उपहास्यं अदः वदति. ॥ ५५ ॥

अर्थः—हवे ते मंत्रीश्वरे विचार्युं के, आ राजा ( पोताना ) भुजबळना गर्ववाळो थयो छे, अने तेथीज विद्वानोना हृदयमां हांसी उपजे एवुं आ वचन बोले छे. ॥ ५५ ॥

नृपस्तं चिरमित्यन्तश्चिन्तयन्तमभाषत । किं न मद्वचसां किंचिद्भवद्भिर्दत्तमुत्तरम् ॥ ५६ ॥

अन्वयः—इति चिरं अंतः चिंतयंतं तं नृपः अभाषत, भवद्भिः मद्वचसां किंचिदुत्तरं किं न दत्तं? ॥ ५६ ॥

अर्थः—एवी रीते घणा वखतसुधी हृदयमां विचार करता एवा ते मंत्रीने राजाए कह्युं के, तमोए मारां वचनोनो कंइ पण उत्तर केम न आप्यो? ॥ ५६ ॥

**एवं निशम्य मन्त्रीन्दुर्जगाद नृपतिंप्रति । दन्तेन्दुद्युतिभिर्दूरान्नृणां मोहतमो हरन् ॥ ५७ ॥**

अन्वयः—एवं निशम्य दंतेंदुद्युतिभिः दूरात् नृणां मोहतमः हरन् मंत्रींदुः नृपतिंप्रति जगाद. ॥ ५७ ॥

अर्थः—एम सांभळीने (पोताना) दांतरूपी चंद्रनी कांतिवडे करीने दूरथीज माणसोना मोहरूपी अंधकारने हरतांथकां ते मंत्रीश्वरे राजाने कह्युं के, ॥ ५७ ॥

**प्रभोऽयुक्तं त्वयोक्तं यद्बलेभ्यो दोर्बलं महत् । तत्तु स्यात्सफलं येन तत्पुण्यं प्रबलं न किम् ॥ ५८ ॥**

अन्वयः—हे प्रभो! त्वया यद् उक्तं, बलेभ्यः दोर्बलं महत्, अयुक्तं, तत् तु येन सफलं स्यात्, तत्पुण्यं किं न प्रबलं? ॥ ५८ ॥

अर्थः—हे स्वामी! आपे जे कह्युं के, सर्व बलोथी भुजाबल मोटुं छे, ते अयुक्त छे. केमके ते भुजाबल जेथी सफल थाय, ते

पुण्य शामाटे प्रबल न कहेवाय? ॥ ५८ ॥

**अथाह भूपो भूपानां शौर्यमेवार्थसाधकम् । तदादिशसि मन्त्रीन्द्र यत्पुण्यमिति किं नु तत् ॥ ५९ ॥**

अन्वयः-अथ भूपः आह, मंत्रींद्र! भूपानां तत् शौर्यं एव अर्थसाधकं, यत् पुण्यं इति आदिशसि, तत् नु किं? ॥ ५९ ॥

अर्थः—पछी राजाए कह्युं के, हे मंत्रीश्वर! राजाओनो स्वार्थ साधनारुं तो ते भुजाबलज छे. परंतु तमो जे पुण्यनी वात करो छो, ते पुण्य वळी शुं छे? ॥ ५९ ॥

**इत्युक्तिभाजि राजेन्द्रे मन्त्रीन्द्रो वदतिस्म सः । प्राच्यधर्मपरीपाकः पुण्यमेवोच्यतेऽर्थकृत् ॥ ६० ॥**

अन्वयः-राजेंद्रे इति उक्तिभाजि सः मंत्रींद्रः वदतिस्म. प्राच्यधर्मपरीपाकः पुण्यं एव अर्थकृत् उच्यते. ॥ ६० ॥

अर्थः—राजाए एम कहेवाथी ते मंत्रीश्वरे कह्युं के, पूर्वे करेला धर्मना परीपाकरूप (फलरुप) जे पुण्य तेज स्वार्थ साधनारुं कहेवाय छे. ॥ ६० ॥

अथापृच्छदतुच्छाशः पृथ्वीन्दुरिति मन्त्रिणम् । साक्षात्तेजोऽर्थकृत्तावद्धर्मास्तित्वे तु का प्रमा ॥ ६१ ॥

अन्वयः-अथ अतुच्छाशः पृथ्वींदुः मंत्रिणं इति अपृच्छत्, तेजः तावत् साक्षात् अर्थकृत्, धर्म अस्तित्वे तु प्रमा का? ॥ ६१ ॥

अर्थः—पछी उमदी आशावाळा राजाए ( ते ) मंत्रीश्वरने एम पूछ्युं के, भुजबळ तो प्रत्यक्षपणे स्वार्थ साधनारुं ( देखाय छे ) अने धर्मनी हयातिमाटे तो प्रमाण शुं छे. ? ॥ ६१ ॥

मुदे दुरितविच्छेद*नाद्यसभ्यस्य भूपतेः । ततः सुकृतसूचेव प्रत्यूचे सचिवेन वाक् ॥ ६२ ॥

अन्वयः-ततः दुरितविच्छेदनआदिअसभ्यस्य (दुरितविच्छेदनाद्यसभ्यस्य) भूपतेः मुदे सुकृतसूचा इव सचिवेन वाक् प्रत्यूचे. ।६२।

अर्थः—त्यारपछी पुण्यआदिकने नही माननारा ( पुण्यनाटकना प्रेक्षकसभासद ) एवा (ते) राजाने खुशी करवामाटे (ते) मंत्रीश्वर जाणे पुण्यने सूचवती होय नही ! एवी वाणी बोल्या. ॥ ६२ ॥

राज्यं सुकृतहीनस्य तेजसा च बलेन च । अभोगसारं सारङ्गराजस्य क्व नु राजते ॥ ६३ ॥

अन्वयः--सुकृतहीनस्य सारंगराजस्य तेजसा च बलेन च अभोगसारं राज्यं नु क्व राजते? ॥ ६३ ॥

अर्थः—पुण्यरहित एवा सिंहनुं (तेना) पराक्रम तथा बल छतां पण भोगविलासविनानुं राज्य क्यां शोभा पामे छे? ॥ ६३ ॥

**भूपेभ्यः शोभते भूरि धाम स्थाम च दन्तिनाम् । यदमीषाममी यानं जाने धर्मोऽत्र कारणम् ॥ ६४ ॥**

अन्वयः--दंतिनां धाम च स्थाम भूपेभ्यः भूरि शोभते, अमीषां अमी यद् यानं, अत्र धर्मः कारणं जाने. ॥ ६४ ॥

अर्थः--हाथीओनुं पराक्रम तथा बळ राजाओथी पण घणुं शोभे छे, (छतां)ते राजाओना ते हाथीओ जे वाहनरूप थाय छे, ते बाबतमां ( हुं ) धर्मनेज कारणभूत जाणुं छुं. ॥ ६४ ॥

**शक्तो दीनोऽकुलीनोऽङ्गहीनोऽपि नृपपुङ्गवैः । यत्पुण्याढ्यनृपोऽसेवि पुण्यं तेन प्रमीयते ॥ ६५ ॥**

अन्वयः--शक्तो दीनः, अकुलीनः, अंगहीनः अपि पुण्याढ्यनृपः यत् नृपपुंगवैः असेवि, तेन पुण्यं प्रमीयते. ॥ ६५ ॥

अर्थः--अशक्त, हीन कुलमां जन्मेलो तथा हाथपग विनानो छतां पण पुण्याढ्य नामनो राजा जे महान् राजाओवडे सेवायो,

तेथी पुण्यनी हयाती साबीत थाय छे ॥ ६५ ॥

**तथाहि विश्वहृद्ग्राहि महत्त्वद्योति विद्यते । क्ष्माकेलिपद्मं पद्मायाः सद्म पद्मपुरं पुरम् ॥ ६६ ॥**

अन्वयः—तथाहि—विश्वहृद्ग्राहि, महत्त्वद्योति, क्ष्माकेलिपद्मं, पद्मायाः सद्म पद्मपुरं पुरं विद्यते. ॥ ६६ ॥

अर्थः—जगतना हृदयमां ( पोतामाटे ) उमदो अभिप्राय धरावनारुं, विस्तारथी शोभीतुं थयेलुं, पृथ्वीने क्रीडा करवा माटे कमल सरखुं, अने लक्ष्मीदेवीना आवास सरखुं पद्मपुर नामनुं नगर छे. ॥ ६६ ॥

**तत्र क्षत्रियसंग्रामसत्त्रधाम भुवो विभुः । अभवद्भुवनाम्भोजतपनस्तपनाभिधः ॥ ६७ ॥**

अन्वयः—तत्र क्षत्रियसंग्रामसत्रधाम, भुवनांभोजतपनः, तपनाभिधः भुवः विभुः अभवत् ॥ ६७ ॥

अर्थः—ते नगरमां क्षत्रिओना संग्रामनी दानशाळासरखो, तथा जगतरूपी कमलने (विकस्वर करवामां) सूर्यसरखो तपन नामनो राजा हतो. ॥ ६७ ॥

हस्तिरत्नं गृहीत्वात्र व्यवहारी धनावहः । कदाचिदाययौ कृष्टो भूपभाग्यगुणैरिव ॥ ६८ ॥

अन्वयः—अत्र कदाचित् धनावहः व्यवहारी हस्तिरत्नं गृहीत्वा भूपभाग्यगुणैः कृष्टः इव आययौ. ॥ ६८ ॥

अर्थः—त्यां कोइक दिवसे धनावह नामनो व्यापारी (एक) उत्तम हाथी लेइने जाणे ते राजाना भाग्यगुणोथी (दोरीथी) खेंचायो होय नही ! तेम आव्यो. ॥ ६८ ॥

भाग्याभोगेन भूपानां रत्नमेतीदृशं भृशम् । इति दक्षैस्तदा पुम्भिः ख्याते तत्कुम्भिगौरवे ॥ ६९ ॥

असामान्यो गुणैर्मान्यो ममायमिति तस्य सः । ययौ कुञ्जरराजस्य सम्मुखं राजकुंजरः ॥ ७० ॥ युग्मम् ॥

अन्वयः—भूपानां भृशं भाग्याभोगेन ईदृशं रत्नं एति, इति दक्षैः पुंभिः तदा तत्कुंभिगौरवे ख्याते ॥ ६९ ॥ गुणैः असामान्यः अयं मम मान्यः, इति सः राजकुंजरः तस्य कुंजरराजस्य सन्मुखं ययौ. ॥ ७० ॥ युग्मं ॥

अर्थः—राजाओना घणा भाग्ययोगे आवुं रत्न आवे छे, एम चतुर पुरुषोए ते वखते ते हाथीनी प्रशंसा करवाथी ॥ ६९ ॥ असाधा-

रण गुणोवाळा आ हाथीनुं मारे सन्मान करवुं जोइये, एम विचारीने ते महान् राजा ते हस्तिराजनी सन्मुख आव्यो. ॥७०॥ युग्मं॥

**ननादाम्बुदनादेन प्रीतः प्रेक्ष्य नृपं द्विपः । नृपस्त्वपूरि रोमाञ्चैर्वैडूरी भूरिवाङ्कुरैः ॥ ७१ ॥**

अन्वयः-नृपं प्रेक्ष्य द्विपः अंबुदनादेन ननाद, अंकुरैः वैडूरी भूः इव नृपः तु रोमांचैः अपूरि. ॥ ७१ ॥

अर्थः—राजाने जोइने ते हाथी मेघना गर्जारवसरखो नाद करवा लाग्यो, तथा वरसादथी भींजायेली जमीन जेम अंकुराओथी तेम ( ते ) राजा पण रोमांचोवडे प्रफुल्लित थयो. ॥ ७१ ॥

**वामं च दक्षिणं चाङ्गं शिरःकम्पनकैतवात् । मुहुरस्याद्भुतं पश्यन्निवेति ध्यायतिस्म सः ॥ ७२ ॥**

अन्वयः-शिरःकंपनकैतवात् अस्य अद्भुतं वामं च दक्षिणं च अंगं मुहुः पश्यन् इव सः इति ध्यायतिस्म. ॥ ७२ ॥

अर्थः—मस्तक कंपाववाना मिषथी जाणे ते हाथीना डाबा अने जमणा अंगने वारंवार जोतो होय नही ! तेम ते राजा एम विचारवा लाग्यो के, ॥ ७२ ॥

द्रष्टुमैरावणमसौ तद्गुणग्रहधीरिव । उच्चैस्त्वात्तु नभोगर्भगतोऽब्द इव गर्जति ॥ ७३ ॥

इन्द्रेभस्पर्धया शङ्के यशोभिर्विशदीभवन् । इन्द्रतायोग्यभाग्यानामेवायं याति यानताम् ॥ ७४ ॥

इति ध्यायन्धराजानिः सम्मान्य व्यवहारिणम् । विधातुं दन्तिनो मूल्यं तद्विदः स समादिशत् ॥ ७५ ॥

अन्वयः—असौ उच्चैस्त्वात् तद्गुणग्रहधीः इव ऐरावणं द्दष्टुं, तु नभोगर्भगतः अब्दः इव गर्जति, ॥ ७३ ॥ अयं इंद्रेभस्पर्धया यशोभिः विशदीभवन् इंद्रतायोग्यभाग्यानां एव यानतां याति शंके, ॥ ७४ ॥ इति ध्यायन् स धराजानिः व्यवहारिणं संमान्य तद्विदः दंतिनो मूल्यं विधातुं समादिशत्. ॥ ७५ ॥ त्रिभिर्विशेषकं ॥

अर्थः—आ हाथी उंचो होनाथी जाणे ऐरावणना गुणो लेवानी इच्छावाळो होय नही ! तेम ते ऐरावणने मळवाने खरेखर आकाशनी अंदर रहेला मेघनी पेठे गर्जना करेछे. ॥ ७३ ॥ वळी आ हाथी इंद्रना हाथीनी स्पर्धाथी जशवडे उज्ज्वल थयोथको इंद्रपणाने लायक एवा भाग्यशालीओनाज वाहनरूप थाय छे एवी हुं शंका करुंछुं, ॥ ७४ ॥ एम विचारता एवा ते राजाए ते व्यापारीनुं सन्मान

[ते]यों बाद हाथीना परीक्षकोने तेनी किमत आंकवामाटे हुकम कर्यो. ॥ ७५ ॥ त्रिभिर्विशेषकं ॥

निरीक्ष्य लक्षणान्यस्य द्विरदस्य विशारदाः। जगदीशं जगुर्लोलमौलयः पुलकाङ्किताः ॥७६॥

अन्वयः–अस्य द्विरदस्य लक्षणानि निरीक्ष्य लोलमौलयः पुलकांकिताः विशारदाः जगदीशं जगुः. ॥ ७६ ॥

अर्थः—आ हाथीना लक्षणो (शुभचिह्नो) जोइने मस्तक धुणावता अने रोमांचित थयेला (ते) परीक्षको राजाने कहेवा लाग्या के, ।७६।

शास्त्रोक्तानामदोषाणां सर्वसल्लक्षणस्पृशाम् । हस्ती दृष्टोऽयमेवाद्य द्विरदानामुदाहृतिः ॥ ७७ ॥

अन्वयः–शास्त्रोक्तानां अदोषाणां, सर्वसत्लक्षणस्पृशां द्विरदानां उदाहृतिः अयं एव हस्ती अद्य दृष्टः. ॥ ७७ ॥

अर्थः—शास्त्रोमां कहेला गुणोवाळा, तथा सर्व प्रकारना उत्तम लक्षणोवाळा हाथीओना उदाहरणसरखो आज हाथी आजे (अमोए) जोयो छे. ॥ ७७ ॥

भूपस्य यस्य कस्यापि स्यादसौ द्वारभूषणम् । संसाधयति दुःसाधानप्यरींल्लीलयैव सः ॥ ७८ ॥

अन्वयः-असौ यस्य कस्यापि भूपस्य द्वारभूषणं स्यात्, सः दुःसाधान् अपि अरीन् लीलया एव संसाधयति. ॥ ७८ ॥

अर्थः—आ हाथी जे कोइ राजाना द्वारने शोभावे, ते राजा दुःसाध्य शत्रुओने पण फक्त क्रीडामात्रमांज जीती शके. ॥ ७८ ॥

पदं कृतयुगस्येव निरीतिः सुकृतैकभूः । एतद्दन्तिभृतो भूमिभर्तुर्देशोऽपि शोभते ॥ ७९ ॥

अन्वयः-एतद्दंतिभृतः भूमिभर्तुः देशः अपि कृतयुगस्य पदं इव निरीतिः सुकृतैकभूः शोभते. ॥ ७९ ॥

अर्थः-आ हाथीनी मालिकीवाळा राजानो देश पण सतयुगना मारंभनी पेठे निर्भय तथा पुण्यनाज एक स्थान सरखो शोभे एम छे. ।७९।

स्वामिन्न स्यादमूल्यस्य मूल्यमस्य गजस्य तत् । याचते वणिग्यादृग्देयं देव तदेव हि ॥ ८० ॥

अन्वयः-(हे) स्वामिन्! अस्य अमूल्यस्य गजस्य मूल्यं न स्यात्, तत् (हे) देव! वणिक् यादृग् यद् याचते, तदेव हि देयं. ॥८०॥

अर्थः—हे स्वामी! आ अमूल्य हाथीनुं मूल्य थइ शके एम नथी, माटे हे देव! आ व्यापारी जेवुं अने जे मूल्य मागे, तेज मूल्य खरेखर तमारे आपवुं. ॥ ८० ॥

किं ते मूल्यं ददामीति राज्ञ प्रीतेऽथ पृच्छति । व्याहारि व्यवहारैकहारिणा व्यवहारिणा ॥ ८१ ॥

अन्वयः-अथ ते किं मूल्यं ददामि? इति प्रीते राज्ञि पृच्छति व्यवहारैकहारिणा व्यवहारिणा व्याहारि. ॥ ८१ ॥

अर्थः—हवे तमोने (आ हाथीनुं) शुं मूल्य आपुं? एम (ते) खुशी थयेला राजाए पूछतां व्यापारथी शोभता एवा ते व्यापारीए कह्युं के, ॥ ८१ ॥

स्वामिन्विन्ध्याद्रिराजस्य युवराज इव द्विपः । अत्युत्तमोऽयं विख्यातः साम्प्रतं हस्तिबन्धिषु ॥ ८२ ॥

अन्वयः—(हे स्वामिन्!) विंध्याद्रिराजस्य युवराज इव अतिउत्तमः अयं द्विपः सांप्रतं हस्तिबंधिषु विख्यातः. ॥ ८२ ॥

अर्थः—विंध्याचलरूपी राजानो जाणे युवराज होय नही! एवो आ अति मनोहर हाथी हालमां हाथी पकडनाराओमां प्रख्यात थयेलो छे. ॥ ८२ ॥

स्वदारिद्र्यद्रुमद्रोहकृतेऽसौ केन केन न । महोपायसहस्त्रेण धर्तुमारभ्यताभितः ॥ ८३ ॥

अन्वयः—स्व दारिद्र्य द्रुम द्रोह कृते केन केन महोपाय सहस्रेण असौ अभितः धर्तुं न आरभ्यत? ॥ ८३ ॥

अर्थः—पोताना निर्धनपणारूपी वृक्षने उखेडी नाखवा माटे कोणे कोणे हजारोगमे महान् उपायोवडे आ हाथीने चोतरफथी पकडवा नहोतो मांड्यो ? ॥ ८३ ॥

**वितन्वतीभिः साम्यं वा वैषम्यं वा किमप्ययम् । बध्धुं शेके न वारिभिर्नारीभिरिव संयमी ॥८४॥**

अन्वयः—किमपि साम्यं वा वैषम्यं वा वितन्वतीभिः नारीभिः संयमी इव वारीभिः अयं बध्धुं न शेके. ॥ ८४ ॥

अर्थः—गमे ते प्रकारना अनुकूल अथवा प्रतिकूल उपायो अजमावती स्त्रीओथी जेम महामुनि, तेम मावतोथी आ हाथी बांधी (पकडी) शकायो नही. ॥ ८४ ॥

**सम्यग्मत्वैनमग्राह्यं गन्धेभं गन्धवाहवत् । अवल्यत विलक्षेण लक्षेण करिबन्धिनाम् ॥ ८५ ॥**

अन्वयः—एनं गंधेभं गंधवाहवत् सम्यग् अग्राह्यं मत्वा करिबंधिनां लक्षेण विलक्षेण अवल्यत. ॥ ८५ ॥

अर्थः—आ हाथीने वायुनी पेठे सेहेलथी न पकडी शकाय एवो जाणीने लाखोगमे मावतो निराश थइ पाछा वल्या. ॥ ८५ ॥

अथाहमधिकोत्साहः सुस्वप्नशकुनव्रजैः । अस्य बंधाय विन्ध्याद्रिं गत्वा वासमदापयम् ॥ ८६ ॥

अन्वयः—अथ सुस्वप्नशकुनव्रजैः अधिकोत्साहः अहं अस्य बंधाय विंध्याद्रिं गत्वा वासं अदापयं. ॥ ८६ ॥

अर्थः पछी उत्तम स्वप्नो तथा शकुनोना समूहोथी अधिक उत्साहवाळाएवा में आहाथीने पकडवामाटे विंध्याचलमांजइ निवासकर्यो.

कथं ग्राह्यः स हस्तीति चिन्ताचकितचेतसः । मम प्रमोदरोमाञ्चप्रचयं रचयन्नथ ॥ ८७ ॥

मुक्तिस्पृहमसम्यक्त्वमिव मामेतदर्थिनम् । सतां प्रहसतां चित्ते चमत्कारं प्रपञ्चयन् ॥ ८८ ॥

मृदुगर्जितवाद्येन मदषट्पदगीतिभिः । श्रियमग्रे निजक्रीडानर्तकीमिव नर्तयन् ॥ ८९ ॥

वनदेवीभिरप्येष वीक्ष्यमाणः कुतूहलात् । शनैर्वनान्ममागारमागान्नागाधिपः स्वयम् ॥ ९० ॥

अन्वयः—अथ स हस्ती कथं ग्राह्यः ! इति चिंताचकितचेतसः मम प्रमोदरोमांचप्रचयं रचयन् ॥ ८७ ! असम्यक्त्वं मुक्तिस्पृहं इव एतदर्थिनं मां प्रहसतां सतां चित्ते चमत्कारं प्रपंचयन्, ॥ ८८ ॥ मृदुगर्जितवाद्येन, मदषट्पदगीतिभिः निजक्रीडानर्तकीं इव श्रियं अग्रे नर्तयन् ॥ ८९ ॥ वनदेवीभिः अपि कुतूहलात् वीक्ष्यमाणः एषः नागाधिपः स्वयं शनैः वनात् मम आगारं आगात् ॥ ९० ॥ चतुर्भिः कलापकं ॥

अर्थः—हवे आ हाथीने केम पकडवो ? ए रीते चिंतातुर मनवाळा एवा मने हर्षना रोमांचोनो समूह उपजावतो, ॥ ८७ ॥ तथा ( पोते ) समकीतरहित छतां मुक्तिनी इच्छा राखनारनी पेठे, आ हाथीनी इच्छा करनारो जे हुं, तेनी हांसी करता एवा सज्जनोना मनमां आश्चर्य उपजावतो, ॥ ८८ ॥ मनोहर गर्जनारूपी वाजित्रसाथे, तथा ( झरता ) मदनी ( आसपास भमता ) भमराओना नादरूपी गायन साथे, पोतानी क्रीडारूपी नटीनीपेठे लक्ष्मीने ( शोभाने ) अग्रभागमां नचावतोथको, ॥ ८९ ॥ तथा वनदेवताओवडे पण आश्चर्यथी जोवातो एवो आ हस्तिराज पोतानीमेळे धीमे धीमे वनमांथी मारा आवासे आव्यो. ॥९०॥

आश्चर्योन्मत्तचित्तेन मयोत्थाय रयादथ । असावपूजि प्रत्यक्षं स्वभाग्यस्येव दैवतम् ॥ ९१ ॥

अन्वयः-अथ आश्चर्यउन्मत्तचित्तेन मया रयात् उत्थाय स्वभाग्यस्य प्रत्यक्षं दैवतं इव असौ अपूजि. ॥ ९१ ॥

अर्थः-पछी आश्चर्यथी अत्यंत उत्सुक मनवाळा एवा में एकदम उठीने मारा भाग्यना प्रत्यक्ष थयेला देवनी पेठे आ हाथीने पूज्यो. ॥ ९१ ॥

नमतो मम तोषेण सुप्रसन्नः करी करम् । सुस्वामीव दधावेष पृष्ठे कमलकोमलम् ॥ ९२ ॥

अन्वयः-तोषेण सुप्रसन्नः एषः करी नमतो मम पृष्ठे सुस्वामी इव कमलकोमलं करं दधौ. ॥ ९२ ॥

अर्थः—आनंदथी अति प्रसन्न थयेला आ हाथीए नमतो एवो जे हुं, तेनी पीठपर उत्तम शेठ ( सेवकनी पीठपर जेम पोतानो हाथ मूके ) तेम ( पोतानी ) कमलसरखी कोमल सुंढ स्थापन करी. ॥ ९२ ॥

भूभृद्वनीं विरागीव भूभृतामवनीं प्रति । संचचालाथ संज्ञाप्य हस्ती हस्तेन मामसौ ॥ ९३ ॥

अन्वयः—अथ असौ हस्ती मां हस्तेन संज्ञाप्य विरागी भूभृद्वनीं इव भूभृतां अवनींप्रति संचचाल. ॥ ९३ ॥

अर्थः—पछी आ हाथी सुंढवडे मने इशारत करीने, वैराग्यवान मुनि जेम पर्वतवाळा अरण्यमां जाय, तेम राजाओनी भूमि (राजधानीओ) तरफ चालवा लाग्यो. ॥ ९३ ॥

अथैनं पृथिवीलीलाचारिणं वारणेश्वरम् । वयं प्रीत्यान्वगच्छामो विवेकमिव सद्गुणाः ॥ ९४ ॥

अन्वयः—अथ विवेकं सद्गुणाः इव, पृथिवीलीलाचारिणं एनं वारणेश्वरं वयं प्रीत्या अन्वगच्छाम ॥ ९४ ॥

अर्थः—हवे विवेकनी पाछळ जेम सद्गुणो जाय, तेम पृथ्वीपर इच्छामुजब चालता एवा आ हस्तिराजनी पाछळ अमो आनंदथी चालीये छीये. ॥ ९४ ॥

दूरतो राजधानीनामुपकण्ठमपि त्यजन् । क्रयोत्कं भूभृतां सङ्घं लङ्घमानो बलादपि ॥ ९५ ॥

मयानुगम्यमानोऽयमेत्य नित्यप्रयाणकः । इह स्वगृहवत्तस्थौ यूथनाथोऽद्य सुस्थितः ॥ ९६ ॥ युग्मं ॥

अन्वयः—राजधानीनां उपकंठं अपि दूरतः त्यजन्, भूभृतां क्रयोत्कं संघं बलादपि लंघमानः ॥ ९५ ॥ मया अनुगम्यमानः

नित्यप्रयाणकः अयं यूथनाथः स्वगृहवत् इह एत्य अत्र सुस्थितः तस्थौ. ॥ ९६ ॥ युग्मं ॥

अर्थः—राजधानीओना सीमाडाने पण दूरथीज तजतो, तथा खरीद करवामाटे उत्सुक थयेला एवा राजाओना समूहने ( पण ) पराणे उल्लंघी जतो ( कोइ पण रीते नही गणकारतो ) ॥ ९५ ॥ तथा हुं जेनी पाछळ पाछळ चालुं छुं एवो, तथा हमेशां प्रयाण करतो, एवो आ हस्तिराज पोताना आवासमां जेम, तेम अहीं आजे सुखेसमाधे आवी उभो छे. ॥ ९६ ॥ युग्मं ॥

**रक्ता कोपाग्नितप्तेव जज्ञे यान्येषु राजसु । प्रमोददुग्धधौतेव धवला त्वयि सास्य दृक् ॥ ९७ ॥**

अन्वयः-अस्य या दृक् अन्येषु राजसु कोपाग्नितप्ता इव रक्ता जज्ञे सा त्वयि प्रमोददुग्धधौता इव. ॥ ९७ ॥

अर्थः—आ हाथीनी जे दृष्टि बीजा राजाओप्रते कोपरूपी अग्निथी जाणे तपेली होय नही ! एवी लाल थती हती, तेज (तेनी) दृष्टि तमारा प्रते जाणे आनंदरूपी दूधथी धोयेली होय नही ! ( एम देखाय छे. ) ॥ ९७ ॥

**तन्नूनमयमानिन्ये त्वद्भाग्यैरेव वारणः । ममैतदनुगामित्वान्मद्भाग्यैरसि दर्शितः ॥ ९८ ॥**

अन्वयः-तत् नूनं त्वद्भाग्यैः एव अयं वारणः आनिन्ये, एतद्अनुगामित्वात् मद्भाग्यैः मम दर्शितः असि. ॥ ९८ ॥
अर्थः—माटे खरेखर आपना सद्भाग्योज आ हाथीने (अहीं) लाव्या छे, अने तेनी पाछळ पाछळ चालवाथी मारां सद्भाग्योए मने आपनुं दर्शन कराव्युं छे. ॥ ९८ ॥

**ततः स्वसुकृतक्रीतं गृहाणैनमिभं विभो । अहं कृतार्थ एवाद्य भवद्भालनिभासनात् ॥ ९९ ॥**

अन्वयः-ततः (हे) विभो ! स्वसुकृतक्रीतं एनं इभं गृहाण ? भवद्भालनिभालनात् अद्य अहं कृतार्थः एव. ॥ ९९ ॥
अर्थः-माटे हे स्वामी! आपना पुण्ये खरीदेला एवा आ हाथीने आप स्वीकारो? आपना ललाटना दर्शनथी आजे हुं कृतार्थज थयोछुं।९९।

**एतद्वचःसुधाधारा–पूर्णकर्णेंद्रियद्वयः । प्रीतो महीन्दुर्मन्त्रीन्द्रमुखसंमुखदृग्जगौ ॥ १०० ॥**

अन्वयः-एतद्वचः सुधाधारा आपूर्णकर्णेंद्रियद्वयः प्रीतः महींदुः मंत्रींद्रमुखसंमुखदृग् जगौ. ॥ १०० ॥
अर्थः—ते व्यापारीना वचनोरूपी अमृतनी धाराथी संपूर्ण भरायेला छे बन्ने कर्णो जेना एवो ते राजा मंत्रीश्वरना मुखसामे दृष्टि

राखीने कहेवा लाग्यो के, ॥ १०० ॥

**अमूल्यमेनमानिन्ये वन्येभमयमेकतः । अमूल्यमेकतोऽवोचद्वचनं वञ्चनोज्झितं ॥ १०१ ॥**

अन्वयः—एकतः अयं एनं अमूल्यं वन्येभं आनिन्ये, एकतः वंचनोज्झितं अमूल्यं वचनं अवोचत्. ॥ १०१ ॥

अर्थः—एक तो आ व्यापारी आ अमूल्य वनगजने लाव्यो छे, तेमज पाछुं (ते) कपटरहित अमूल्य वचन बोल्यो छे, ॥१०१॥

**तदमूल्यद्वयीदातुरुर्वीसर्वस्वमप्यहं । दत्वाप्यस्यानृणीभावं न गच्छामि करोमि किं ॥ १०२ ॥**

अन्वयः—तत् अमूल्यद्वयीदातुः अस्य ऊर्वी सर्वस्वं अपि दत्वा अपि अहं अनृणीभावं न गच्छामि, किं करोमि. ? ॥१०२॥

अर्थः—माटे बे अमूल्य वस्तु आपनारा एवा आ व्यापारीने पृथ्वीपरनुं सघळुं आपतां पण हुं तेना करजथी मुक्त थइ शकुं तेम नथी, माटे हुं शुं करुं ? ॥ १०२ ॥

**इति स्थिते नरेन्द्रेऽथ व्याहारि व्यवहारिणा । स्वामिन् गजस्तवैवोक्तो मूल्यं गृह्णेऽस्य न ध्रुवम् ॥१०३॥**

अन्वयः—अथ इति नरेंद्रे स्थिते व्यवहारिणा व्याहारि, (हे) स्वामिन्! गजः तव एव उक्तः, ध्रुवं अस्य मूल्यं न गृह्णे ॥१०३॥

अर्थः—पछी एम कहीने राजा ज्यारे मौन रह्यो, त्यारे ते व्यापारी बोल्यो के, हे स्वामी! हाथी आपनोज छे, एम में कही दीधु छे, माटे खरेखर तेनु मूल्य हुं लेवानो नथी. ॥ १०३ ॥

**इत्यस्मै निश्चयवते सचिवानुमतो नृपः। दत्वा बलेन राज्यार्धं तं द्विपेन्द्रमुपाददे ॥ १०४ ॥**

अन्वयः—इति निश्चयवते अस्मै सचिवानुमतः नृपः बलेन राज्यार्धं दत्वा तं द्विपेंद्रं उपाददे ॥ १०४ ॥

अर्थः—एवी रीतना निश्चयवाळा एवा ते व्यापारीने मंत्रीनी अनुमतिथी राजाए पराणे अर्धुं राज्य आपीने ते हाथी ग्रहण कर्यो. ॥१०४॥

**ततः कृतेभरत्नाप्तिमङ्गलोऽयं महीपतिः। चक्रे यात्रां जगत्कम्पहेतुं जेतुं दिशोऽखिलाः ॥ १०५ ॥**

अन्वयः-ततः कृतइभरत्नआप्तिमंगलः अयं महीपतिः अखिलाः दिशः जेतुं जगत्कंपहेतुं यात्रां चक्रे. ॥ १०५ ॥

अर्थः—पछी करेलछे हस्तिराजनी प्राप्तिमाटे मंगल जेणे एवा आ राजाए सघळी दिशाओ जीतवा माटे जगत्ने कंपावनारुं (त्यांथी)

प्रयाण कर्युं. ॥ १०५ ॥

निस्वानध्वानधूलीभिर्बधिरान्धारिविक्रमम् । संकटीभूतभूगोलं लोलं प्रास्थित तद्दलम् ॥ १०६ ॥

अन्वयः-निस्वानध्वान धूलीभिः बधिर अंधारिविक्रमं संकटीभूतभूगोलं तदूवलं प्रास्थित. ॥ १०६ ॥

अर्थः—ढोलडंकाओना अवाजथी, तथा ( उडती ) धूलिथी बेहेरुं तथा अंधकारवाळुं थयेलु छे आकाश जेथी, अने सांकडी थयेल छे पृथ्वी जेथी, एवुं ते राजानुं सैन्य चालवा लाग्युं. ॥ १०६ ॥

स गन्धसिन्धुरो बद्धरत्नपट्टः पुरोऽचलत् । मूर्धोर्ध्वभ्रान्तकोपाग्निरिव लोपाय विद्विषाम् ॥ १०७ ॥

अन्वयः-विद्विषां लोपाय मूर्धऊर्ध्वभ्रांत कोपाग्निः इव बद्धरत्नपट्टः सः गंधसिंधुरः पुरः अचलत्. ॥ १०७ ॥

अर्थः—शत्रुओना विनाशमाटे मस्तकपर जाणे क्रोधरूपी अग्नि भमतो होय नही ! एवीरीते बांधेला रत्नपट्टवाळो ते गंधहस्ति आगळ चालवा लाग्यो. ॥ १०७ ॥

न नेमुः सर्वतो गर्वकुशीभिः कीलिता इव । ये पुरा वैरिणस्तेषु स तत्याज कृपां नृपः ॥ १०८ ॥

अन्वयः- गर्वकुशीभिः सर्वतः कीलिताः इव ये वैरिणः पुरा न नेमुः, तेषु स नृपः कृपां तत्याज. ॥ १०८ ॥

अर्थ —गर्वरूपी खीलीओथी सर्व बाजुए जडाइने जाणे अक्कड थया होय नहीं ! एवा जे वैरीओ पूर्वे नमता नहोता, तेओमते ते राजाए दयानो त्याग कर्यो. ॥ १०८ ॥

रणेषु वारणेन्द्रस्तु स वात्यावर्तवद् द्रुमान् । लोडयामास विद्वेषिचमूस्तृणसमूहवत् ॥ १०९ ॥

अन्वयः-रणेषु स वारणेंद्रः तु द्रुमान् वात्यावर्तवत् तृणसमूहवत् विद्वेषिचमूः लोडयामास. ॥ १०९ ॥

अर्थः—राणसंग्राममां ते गजराज तो वंटोळीयो जेम वृक्षोने तथा घासना समूहने वीखेरी नाखे, तेम शत्रुओनां सैन्योने विखेरी नाखवा लाग्यो. ॥ १०९ ॥

द्विपेन्द्रः प्रेक्षकीभूतसकलस्वबलोच्चयः । शत्रून् स त्रासयामास द्रुतमब्दानिवानिलः ॥ ११० ॥

अन्वयः-प्रेक्षकीभूतसकलस्वबलोच्चयः सः द्विपेंद्रः अनिलः अब्दान् इव द्रुतं शत्रून् त्रासयामास. ॥ ११० ॥

अर्थः—पोताना सर्व लश्करनो समूह जेने जोइ रहेलो छे, एवो ते गजराज, वायु जेम वादळांओने, तेम तुरत शत्रुओने नसाडवा लाग्यो. ॥ ११० ॥

**दन्तघातदलद्वप्रकपाटः पाटयन्भटान् । अरीन्करीन्द्रश्चक्रेऽसौ दुर्गस्थानपि दुर्गतान् ॥ १११ ॥**

अन्वयः-दंतघातदलद्वप्रकपाटः असौ करींद्रः भटान् पाटयन् दुर्गस्थान् अपि अरीन् दुर्गतान् चक्रे. ॥ १११ ॥

अर्थः—दांतोना प्रहारथी किल्लाओना कमाडोने तोडतो एवो आ हस्तिराज सुभटोने पाडतोथको किल्लामां संतायेला शत्रुओने पण दुःखी करवा लाग्यो. ॥ १११ ॥

**इत्येष समरेऽजैषीद्दन्तलक्षीकृतान्द्विपः । लक्षीकृतं तदस्त्रैः स्वं गतिवेगादलक्षयन् ॥ ११२ ॥**

अन्वयः-इति एषः तदस्त्रैः लक्षीकृतं स्वं गतिवेगात् अलक्षयन् समरे दंतलक्षीकृतान् द्विपः अजैषीत्. ॥ ११२ ॥

अर्थः--एवी रीते आ हाथी ते शत्रुओना शस्त्रोए चींधेला एवा पोताने गतिवेगथी अदृश्य करतो थको रणसंग्राममां (पोताना) दांतोनी चींधणीमां आवेला शत्रुओने जीतवा लाग्यो. ॥ ११२ ॥

दिशामन्तेषु मिथ्यात्वख्यातान्प्रेक्ष्येव दिग्गजान् । जितकाशी स कुम्भीन्द्रो ववलेऽनुचलद्बलः ॥ ११३ ॥

अन्वयः—मिथ्यात्वख्यातान् दिग्गजान् प्रेक्ष्य जितकाशी इव अनुचलद्बलः स कुंभींद्रः दिशां अंतेषु ववले. ॥ ११३ ॥

अर्थः—जूठीरीते प्रख्याति पामेला एवा दिग्हस्तीओने जोइने जाणे तेओने जीतवानी इच्छाथी होय नही ! तेम जेनी पाछळ पाछळ सैन्य चाली रह्युं छे, एवो ते हस्तिराज दिशाओना छेडाओतरफ चालवा लाग्यो. ॥ ११३ ॥

शक्तिसाधितदुःसाधे सिन्धुरे जयबन्धुरे । तस्मिन् सविस्मयप्रेम रेमे भूमीशमानसम् ॥ ११४ ॥

अन्वयः--शक्तिसाधितदुःसाधे जयबंधुरे तस्मिन् सिंधुरे भूमिईशमानसं सविस्मयप्रेम रेमे. ॥ ११४ ॥

अर्थः--( पोताना ) बळथी जेणे दुर्जय ( शत्रुओने पण ) जीतेला छे, अने जयशाली एवा ते हाथीमां (ते) राजानुं मन आश्चर्य

अने प्रीतिसहित रमवा लाग्युं. ॥ ११४ ॥

**तमेवेभविभुं भूपैर्जयश्रीमङ्गलागतैः । पदे पदेऽर्चयन्नाप पुरं नरपुरन्दरः ॥ ११५ ॥**

अन्वयः—तं एव इभविभुं पदे पदे अर्चयन् नरपुरंदरः जयश्रीमंगलआगतैः भूपैः (सह) पुरं आप. ॥ ११५ ॥

अर्थः—तेज गजराजने पगले पगले पूजतो एवो ते राजा जयलक्ष्मीना मंगलमाटे आवेला राजाओ सहित ( पोताना ) नगरमां आ यो. ॥ ११५ ॥

**महोत्सवमयं भूपप्रवेशावेशपेशलम् । सचिवैस्तत्पुरं चक्रे शक्रेणापीप्सितास्पदम् ॥ ११६ ॥**

अन्वयः-सचिवैः भूपप्रवेशावेशपेशलं शक्रेण अपि ईप्सितास्पदं महोत्सवमयं तत्पुरं चक्रे. ॥ ११६ ॥

अर्थ—( ते वखते ) मंत्रिओए राजाने प्रवेश कराववाना उत्साहथी मनोहर, तथा इंद्र पण जेमां रहेवानी इच्छा करे, एवुं महान् उत्सववालुं ते नगर बनाव्युं ( शणगार्युं. ) ॥ ११६ ॥

आलोककामवामाक्षीजालमालितजालकम् । काश्मीरनीरनीरन्ध्रच्छटाछोटितभूतलम् ॥ ११७ ॥

व्योमापगां जयन्तीभिर्वैजयन्तीभिरद्भुतम् । उत्तुङ्गतोरणस्तम्भानद्धसंमदसिन्धुरम् ॥ ११८ ॥

कृताकल्पमिवानल्पैरुच्चस्थानासनैर्जनैः । सहासमिव दन्ताभमुक्तातोरणकान्तिभिः ॥ ११९ ॥

दुर्जयारिजयारोहप्ररोहन्मोहसंमदः । तत्पुरं प्रविवेशाथ नृपस्तद्द्विपसंगतः ॥ १२० ॥ चतुर्भिः कलापकम्॥

अन्वयः—आलोककामवामाक्षीजालमालितजालकं, काश्मीरनीरनीरंध्रच्छटाछोटितभूतलं ॥ ११७ ॥ व्योमापगां जयंतीभिः वैजयंतीभिः अद्भुतं, उत्तुंगतोरण स्तंभ आनद्ध संमदसिंधुरं ॥ ११८ ॥ उच्चस्थानासनैः अनल्पैः जनैः कृताकल्पं इव, दंताभमुक्तातोरणकांतिभिः सहासं इव, ॥ ११९ ॥ तत्पुरं दुर्जयअरिजय आरोह प्ररोहत् मोहसंमदः नृपः तद्द्विपसंगतः अथ प्रविवेश. ॥ १२० ॥

अर्थः—जोवानी इच्छावाळी स्त्रीओना समूहोथी शोभायुक्त झरुखाओवाळां, केसरना भरपूर छांटणांओवडे छंटकाव करेल भूमित-

लवाळां, ॥ ११७ ॥ आकाशगंगाने पण जीतती एवी पताकाओवडे शणगारेलां, उंचां तोरणोना थांभलाओमां बांधेला मदोन्मत्त हाथीओवाळां, ॥ ११८ ॥ उंचे चडीने बेठेला अनेक मनुष्योवडे करीने जाणे अलंकारयुक्त थयेलां, दांतजेवां उज्ज्वल मोतीओनां तोरणोनी कांतिथी जाणे हास्ययुक्त थयेलां, ॥ ११९ ॥ एवां ते नगरमां अजित शत्रुओने पण जीतवाना आवेशथी उछळता गर्वयुक्त हर्षवाळा एवा ते राजाए ते हाथीपर बेशीने प्रवेश कर्यो. ॥ १२० ॥ चतुर्भिः कलापकं ॥

प्रीतिगौरैर्मुहुः पौरैः स्तूयमानः पदे पदे । लिखन्करी करेणोर्वीं सविलक्ष इवैक्ष्यत ॥ १२१ ॥

अन्वयः—प्रीतिगौरैः पौरैः पदे पदे स्तूयमानः सः करी विलक्षः इव करेण ऊर्वीं लिखन् ऐक्ष्यत ॥ १२१ ॥

अर्थः—अत्यंत प्रेमवाळा नगरना लोकोवडे पगले पगले स्तुति करातो एवो ते हाथी गभरायेलानी पेठे सुंढथी जमीन खोतरतो जोवामां आव्यो. ॥ १२१ ॥

खेलन् सहेलममलं कराग्रेणायमग्रहीत् । कुतोऽप्यट्टात्खटीखण्डं बीजं धर्मतरोरिव ॥ १२२ ॥

अन्वयः-सहेलं खेलन् अयं कुतः अपि अट्टात् धर्मतरोः बीजं इव अमलं खटीखंड कराग्रेण अग्रहीत्. ॥ १२२ ॥

अर्थः—मोजथी चालता एवा आ हाथीए कोइक दुकानमांथी जाणे धर्मरूपी वृक्षनुं बीज लेतो होय नही ! तेम श्वेत खडीनो टुकडो सुंढना अग्रभागवडे ग्रहण कर्यो. ॥ १२२ ॥

**करात्तखटिकाखण्डः शुण्डारः स व्यराजत । स्वर्गदण्डाग्रसंसर्गिसोमव्योमतलोपमः ॥ १२३ ॥**

अन्वयः-करात्तखटिकाखंडः सः शुंडारः स्वर्गदंडअग्रसंसर्गिसोमव्योमतलोपमः व्यराजत ॥ १२३ ॥

अर्थः-शुंडमां पकडेला खडीना टुकडावाळो ते हाथी, स्वर्गदंडना अग्रभागमां लटकता चंद्रवाळा आकाशतलसरखो शोभवा लाग्यो ।१२३।

**किं कर्तानेन करटी खटीखण्डेन संप्रति । इत्यसौ विस्मयस्मेरैः प्रेक्ष्यमाणः पुरीजनैः ॥ १२४ ॥**

**आत्तनागरमङ्गल्यः प्रतिस्थानं मतङ्गजः । लीलालसगतिः प्राप भूपालभवनाङ्गणम् ॥ १२५ ॥ युग्मं ॥**

अन्वयः-सप्रति अनेन खटीखंडेन असौ करटी किं कर्ता ? इति विस्मयस्मेरैः पुरीजनैः प्रेक्ष्यमाणः, ॥ १२४ ॥ प्रतिस्थानं

आत्तनागरमंगल्यः, लीलालसगतिः मतंगजः भूपालभवनअंगणं प्राप. ॥ १२५ ॥ युग्मं ॥

अर्थः—हवे आ खडोना टुकडावडे आ हाथी शुं करशे? एम आश्चर्यथी हसता एवा नगरना लोकोथी जोवातो, ॥ १२४ ॥ जगोजगोए नगरजनोथी पूजन करातो अने क्रीडाथी मंदगतिवाळो, ते मदोन्मत्त हाथी राजभुवनना आंगणामां आव्यो. । १२५ । युग्मं ।

**मृग्यमाणो महाश्चर्यनिश्चलैः खेचरैरपि । स गुणी प्रगुणीकृत्य कृत्यवित्खटिकामिमाम् ॥ १२६ ॥**

**चतुष्पंक्ति भवचतुर्गतिनिर्गतिमार्गवत् । श्लोकमेतन्नृपागारद्वारभित्तौ द्विपोऽलिखत् ॥ १२७ ॥युग्मम्॥**

अन्वयः—महाश्चर्यनिश्चलैः खेचरैः अपि मृग्यमाणः, कृत्यवित्, गुणी सः द्विपः इमां खटिकां प्रगुणीकृत्य ॥ १२६ ॥ नृपागारभित्तौ भवचतुर्गतिनिर्गतिमार्गवत् चतुष्पंक्ति एतत् श्लोकं अलिखत्. ॥ १२७ ॥ युग्मं ॥

अर्थः—अति आश्चर्यथी स्थिर थइ गयेला एवा विद्याधरो पण (जेने मेळववानी) शोध करी रह्या छे एवो, तथा कार्यने जाणनारो, अने गुणवान एवो ते हाथी आ खडी पकडीने ॥ १२६ ॥ राजमहेलनी भींतपर संसारनी चारे गतिओमांथी निकळवाना मार्गसरखो

चार लींटीनो नीचे मुजब श्लोक लखवा लाग्यो. ॥ १२७ ॥ युग्मं ॥

**अविज्ञातत्रयीतत्त्वो मिथ्यासत्त्वोल्लसद्भुजः । हा मूढ शत्रुपोषेण मित्रप्लोषेण हृष्यसि ॥ १२८ ॥**

अन्वयः—हा मूढ ! अविज्ञातत्रयीतत्त्वः मिथ्यासत्त्वोल्लसद्भुजः ( त्वं ) शत्रुपोषेण मित्रप्लोषेण हृष्यसि. ॥ १२८ ॥

अर्थः—अरे मूर्ख ! त्रण तत्वोने जाण्याविना निरर्थक भुजाबलना गर्ववाळो एवो तुं शत्रुओने खुशी करीने, अने मित्रोनो विनाश करीने, आनंद पामे छे ! ! ॥ १२८ ॥

**श्लोकमालोकयन्नेनमनेनसमसौ नृपः । अजानन्नर्थमर्थज्ञानपृच्छन्मित्रमन्त्रिणः ॥ १२९ ॥**

अन्वयः—एनं अनेनसं श्लोकं आलोकयन् असौ नृपः अर्थं अजानन् अर्थज्ञान् मित्रमंत्रिणः अपृच्छत्. ॥ १२९ ॥

अर्थः—आ निर्दोष श्लोकने जोता एवा आ राजाए ( तेना ) अर्थने नही जाणवाथी तेनो भावार्थ जाणनारा ( पोताना ) मित्र-सरखा मंत्रीओने ( तेनो अर्थ ) पूछयो. ॥ १२९ ॥

श्लोकः कथंचिद्बुबुधे बुधेशैरपि तैर्न सः । अतिदीर्घोऽपि न पुमान्पदाभ्यां लङ्घतेऽर्णवम् ॥ १३० ॥

अन्वयः—तैः बुधेशैः अपि सः श्लोकः कथंचिद् न बुबुधे. अतिदीर्घः अपि पुमान् पदाभ्यां अर्णवं न लंघते. ॥ १३० ॥

अर्थः—ते पंडितराजो पण ते श्लोकनो अर्थ कोइ पण रीते जाणी शक्या नही. केमके अतिलांबो पुरुष पण बे पगोथी महासागर ओळंगी शकतो नथी. ॥ १३० ॥

मुखाग्रे तोरणीकुर्वन्नथ दन्तांशुधोरणीम् । न्यवीविशन्नृदेवोऽसौ वाग्देवीं रसनासने ॥ १३१ ॥

अन्वयः—अथ मुखाग्रे दंतांशुधोरणीं तोरणीकुर्वन् असौ नृदेवः वाग्देवीं रसनासने न्यवीविशत्. ॥ १३१ ॥

अर्थः—पछी (पोताना) मुखना अग्रभागमां दांतोना किरणोनी श्रेणिने तोरणरूप करता एवा ते राजाए सरस्वतीदेवीने पोतानी जीभरूपी आसनपर बेसाडी. (अर्थात् ते राजा बोल्यो.) ॥ १३१ ॥

मद्दिष्टदेवता कापि मयि दत्वा जगज्जयम् । श्लोकं शिक्षाविशेषाय लिलेख द्विपरूपभाक् ॥ १३२ ॥

अन्वयः—कापि मदिष्टदेवता मयि जगज्जयं दत्वा शिक्षाविशेषाय द्विपरूपभाक् श्लोकं लिलेख. ॥ १३२ ॥

अर्थः—मारापर स्नेह राखती कोइक देवीए मने जगत्नो विजय अपावीने खास शिखामण आपवामाटे हाथीनुं रूप लेइ आ श्लोक लख्यो छे. ॥ १३२ ॥

तदस्यार्थमविज्ञाय न विशामि निवेशनम्। अमित्रमित्रसंदेहे कास्तु देहेऽपि निर्वृतिः ॥ १३३ ॥

अन्वयः-तत् अस्य अर्थं अविज्ञाय निवेशनं न विशामि, अमित्रमित्रसंदेहे देहे अपि का निर्वृतिः अस्तु. ॥ १३३ ॥

अर्थः—माटे आ श्लोकनो अर्थ जाण्याविना (हुं) आवासमां दाखल थइश नही. केमके शत्रु कोण? अने मित्र कोण? ते संबंधि ज्यांसुधी संशय होय, त्यांसुधी शरीरमां पण निवृत्ति क्यांथी थाय? ॥ १३३ ॥

तदित्युदीर्य काव्यार्थविज्ञानैकमनाः खलु। तत्रैवास्थानमास्थाय विभुर्निविविशे विशाम् ॥ १३४ ॥

अन्वयः-इति उदीर्य खलु काव्यार्थविज्ञानएकमनाः विशां विभुः तदा तत्रैव आस्थानं आस्थाय निविविशे. ॥ १३४ ॥

अर्थः–एम कहीने खरेखर ते श्लोकना अर्थने जाणवामांज एक चित्त छे जेनुं एवो ते राजा ते वखते त्यांज पडाव नाखीने रह्यो. ।१३४।

संहताः सूरयः प्रज्ञावज्ञातसुरसूरयः । तैरप्यभेदि न श्लोकष्टङ्कैर्वज्रमणिर्यथा ॥ १३५ ॥

अन्वयः–प्रज्ञावज्ञातसुरसूरयः सूरयः संहताः, यथा टंकैः वज्रमणिः ( तथा ) तैरपि श्लोकः न अभेदि. ॥ १३५ ॥

अर्थः––बुद्धिवडे सुरगुरुनो पण तिरस्कार करनारा एवा पंडितो ( त्यां ) एकठा थया, परंतु टांकणांओथी जेम वज्रमणि, तेम तेओथी पण आ श्लोक भेदायो नही. ( अर्थात् ते श्लोकनो अर्थ थइ शक्यो नही. ) ॥ १३५ ॥

श्लोकार्थं लोकसार्थेषु समन्तान्मतिगर्वितान् । धर्माचार्यानथाकार्याप्रृच्छत्पृथ्वीपतिः क्रमात् ॥ १३६ ॥

अन्वयः–अथ पृथ्वीपतिः लोकसार्थेषु मतिगर्वितान् धर्माचार्यान् समंतात् क्रमात् आकार्य श्लोकार्थं अपृच्छत् ॥ १३६ ॥

अर्थः––पछी ( ते ) राजा लोकोना समूहमां बुद्धिना गर्ववाळा धर्माचार्योने चोतरफथी अनुक्रमे बोलावीने ते श्लोकनो अर्थ पूछवा लाग्यो. ॥ १३६ ॥

**अर्थेष्वघटमानेषु तेषामप्युक्तियुक्तिभिः । विषादपात्रं धात्रीशः किंकर्तव्यजडो जगौ ॥ १३७ ॥**

अन्वयः—तेषां उक्तियुक्तिभिः अपि अर्थेषु अघटमानेषु विषादपात्रं किंकर्तव्यजडः धात्रीशः जगौ. ॥ १३७ ॥

अर्थः—तेओनां वचनोनी युक्तिथी पण ते श्लोकनो अर्थ बंधबेसतो न थवाथी खेद पामतो, तथा हवे शुं करवुं? एम मूढ थयेलो ते राजा कहेवा लाग्यो के, ॥ १३७ ॥

**श्लोकेनानेन कनकाचलेनेव प्रकम्पनाः । सर्वज्ञमानिनः सर्वे गर्वेण रहिताः कृताः ॥ १३८ ॥**

अन्वयः—कनकाचलेन प्रकंपनाः इव अनेन श्लोकेन सर्वज्ञमानिनः सर्वे गर्वेण रहिताः कृताः. ॥ १३८ ॥

अर्थः—मेरुपर्वते जेम वायुने, तेम आ श्लोके तो सर्वज्ञपणानो अहंकार राखनारा सर्व ( पंडितोने ) गर्वरहित कर्या. ॥ १३८ ॥

**अद्यापि विद्यते क्वापि कोऽपि प्रष्टव्यतास्पदम् । न वेति वदति क्ष्मापे सचिवेन्दुरवोचत ॥ १३९ ॥**

अन्वयः–अद्यापि क्वापि कः अपि प्रष्टव्यतास्पदं विद्यते ? न वा ? इति क्ष्मापे वदति सचिवेंदुः अवोचत. ॥ १३९ ॥

अर्थः—हजु क्यांय कोइ पण पूछवा लायक छे? के नही? एम राजाए कहेवाथी मुख्यमंत्री बोल्यो के, ॥ १३९ ॥

**अद्याप्येको विवेकोर्मिसमुद्रो न समेति सः। आनन्दचन्द्रसूरीन्द्रो जिनशासनतत्त्ववित् ॥ १४० ॥**

अन्वयः-विवेकोर्मिसमुद्रः जिनशासनतत्त्ववित् एकः सः आनंदचंद्रसूरींद्रः अद्यापि न समेति. ॥ १४० ॥

अर्थः—विवेकरूपी मोजांओना समुद्र सरखा, तथा जिनशासनना तत्वोने जाणनारा एक ते "आनंदचंद्र नामना सूरिराज" हजु आव्या नथी. ॥ १४० ॥

**ऊचेऽथ राज्ञा नाज्ञायि यदन्यैस्तत्कथं नु सः। तथाप्याहूयतां सोऽपि दीर्णशल्योऽस्तु संशयः ॥ १४१ ॥**

अन्वयः-अथ राज्ञा उचे, यत् अन्यैः न अज्ञायि, तत् नु सः कथं? तथापि सः अपि आहूयतां? शल्यः दीर्ण शल्यः अस्तु. ।१४१।

अर्थः—पछी राजाए कह्युं के, जे अर्थ बीजाओए न जाण्यो, तेने ते शीरीते जाणशे? तोपण तेने पण बोलावो? के जेथी (आपणो) संशय दूर थाय. ॥ १४१ ॥

**अथ मन्त्री स्वयं गत्वा नत्वा विनयवामनः । निवेद्य कार्यमाचार्यवर्यमावर्ज्य हूतवान् ॥ १४२ ॥**

अन्वयः–अथ मंत्री स्वयं गत्वा, आचार्यवर्यं विनयवामनः नत्वा, कार्यं निवेद्य आवर्ज्य हूतवान्. ॥ १४२ ॥

अर्थः–पछी (ते) मंत्री पोते जइ, आचार्य महाराजने विनयथी वांदीने, तथा कार्य निवेदन करी खुशी करी बोलावी लाव्यो. ।१४२।

**ते कर्तुकामास्तीर्थेशशासनस्य प्रभावनाम् । राजमन्दिरमाजग्मुः सूरयोऽथ नयोज्ज्वलाः ॥ १४३ ॥**

अन्वयः–अथ तीर्थेशशासनस्य प्रभावनां कर्तुकामाः, नयोज्ज्वलाः ते सूरयः राजमंदिरं आजग्मुः ॥ १४३ ॥

अर्थः––वळी तीर्थंकरप्रभुना शासननी शोभा करवानी इच्छावाळा, तथा न्यायथी निर्मल थयेला ते आचार्यजी पण राज-दरबारमां पधार्या. ॥ १४३ ॥

**मूर्तं शममिवायान्तं तमवेक्ष्य महामुनिम् । भून्यस्तदशनो हस्ती नमश्चक्रे मुदा नदन् ॥ १४४ ॥**

अन्वयः–मूर्तं शमं इव तं महामुनिं आयांतं अवेक्ष्य भून्यस्तदशनः, मुदा नदन् हस्ती नमश्चक्रे. ॥ १४४ ॥

अर्थः—जाणे देहधारी शांतरसज होय नही ? एवा ते मुनिराजने आवता जोइने ( पोताना ) बन्ने दांतो जमीनपर स्थापन करी हर्षनाद करताथका ते हाथीए ( तेमने ) नमस्कार कर्यो. ॥ १४४ ॥

**देवांशः कोऽप्यसौ कुम्भी मोहशुम्भी ननाम यम् । न किं मुनीन्द्रं निस्तन्द्रा नमामो वयमप्यमुम् ॥ १४५ ॥**

अन्वयः—मोहशुंभी असौ कोऽपि देवांशः कुंभी यं ननाम, अमुं मुनींद्रं वयं अपि निस्तंद्राः किं न नमामः ? ॥ १४५ ॥

अर्थः—मोहरहित एवो आ कोइ देवांशी हाथी जेमने नम्यो, एवा आ मुनीश्वरने अमो पण प्रमाद तजीने केम न नमीयें? ॥१४५॥

**इति ध्यायन्समुत्थाय भद्रपीठाद्विभुर्भुवः । ननमश्चकार सपरीवारः संसारतारणम् ॥ १४६ ॥**

अन्वयः—इति ध्यायन् भुवः विभुः भद्रपीठात् समुत्थाय सपरिवारः संसारतारणं नमश्चकार. ॥ १४६ ॥

अर्थः—एम विचारता एवा ते राजाए सिंहासनपरथी उठीने परिवारसहित संसारथी तारनारा (एवा ते मुनिराजने) नमस्कार कर्यो. ॥१४६॥

**सूरिं सिंहासानेऽध्यास्य निविश्याग्रेऽतिभक्तिभाक् । तं श्लोकं दर्शयन्भित्त्यामर्थं पप्रच्छ पार्थिवः ॥ १४७ ॥**

अन्वयः—अतिभक्तिभाक् पार्थिवः सूरिं सिंहासने अध्यास्य अग्रे निविश्य भित्त्यां तं श्लोकं दर्शयन् अर्थं पप्रच्छ. ॥ १४७ ॥

अर्थः—अत्यंत भक्तिवाळा एवा ( ते ) राजाए ( ते ) आचार्य महाराजने सिंहासनपर बेसाडी, तथा (पोते) आगळ बेशी भींतमां लखेला ते श्लोकने देखाडी तेनो अर्थ पूछयो. ॥ १४७ ॥

**दन्तच्छविच्छलान्मुक्तिशिलादीधितिवर्णिकाम् । दर्शयन्निव भक्तेभ्यो गुरुर्गिरमथाकिरत् ॥ १४८ ॥**

अन्वयः—अथ दंतच्छविच्छलात् भक्तेभ्यः मुक्तिशिलादीधितिवर्णिकां दर्शयन्निव गुरुः गिरं अकिरत्. ॥ १४८ ॥

अर्थः-हवे दांतोनी कांतिना मिषथी भक्तोने जाणे सिद्धशिलाना किरणोनो नमुनो देखाडता होय नही? तेम ते गुरुमहाराज वाणी बोल्या. ॥ १४८ ॥

**यो देवगुरुधर्माणां त्रयीं जानाति तत्त्वतः । रमते तन्मतिः सत्त्वे स मित्रामित्रभेदवित् ॥ १४९ ॥**

अन्वयः—यः तत्त्वतः देवगुरुधर्माणां त्रयीं जानाति, तन्मतिः सत्त्वे रमते, सः मित्रअमित्रभेदवित् ॥ १४९ ॥

अर्थः—जे सत्य रीते देव, गुरु अने धर्मरूपी त्रणे तत्त्वोने जाणे छे, तेनी बुद्धि सत्त्वगुणमां रमे छे, अने तेज शत्रु अने मित्रना तफावतने जाणी शके छे. ॥ १४९ ॥

वीतरागप्रभुर्देवो गुरुस्तत्वोपदेशकः । धर्मश्च करुणारम्यस्त्रयीतत्वमिदं विदुः ॥ १५० ॥

अन्वयः—वीतरागप्रभुः देवः, तत्त्वोपदेशकः गुरुः, च करुणारम्यः धर्मः, इदं त्रयीतत्त्वं विदुः. ॥ १५० ॥

अर्थः—रागरहितप्रभु देव, सत्य उपदेश देनारा गुरु, अने दयामय धर्म, एवी रीतनां त्रण तत्वो कहेलां छे. ॥ १५० ॥

तत्सत्वं यद्भवाम्भोधिः क्रममात्रेण लङ्घ्यते । मिथ्या सत्वं पुनः कर्ममरिष्यन्मार्यमारणम् ॥ १५१ ॥

अन्वयः—यत् भवांभोधिः क्रममात्रेण लंघ्यते, तत् सत्त्वं, कर्ममरिष्यत् मार्यमारणं पुनः मिथ्या सत्त्वं. ॥ १५१ ॥

अर्थः—आ संसाररूपी समुद्रने एक पगलां मात्रमांज जे उल्लंघी जवो, तेनुं नाम (खरुं) सत्त्व (कहेवाय छे), परंतु (पोताना) कर्मोथी मरनारा शत्रुओने जे मारवा, ते तो मिथ्या सत्त्व छे ॥ १५१ ॥

**रिपवो रागरोषाद्या मुहुर्देहं दहन्ति ये । मूलादुन्मूलनीयास्ते समत्वास्त्रेण धीधनैः ॥ १५२ ॥**

अन्वयः—रागरोषाद्याः रिपवः, ये मुहुः देहं दहंति. धीधनैः समत्वअस्त्रेण ते मूलात् उन्मूलनीयाः. ॥ १५२ ॥

अर्थः—राग अने द्वेष आदिक शत्रुओ छे, के जेओ वारंवार शरीरने बाळया करे छे, माटे बुद्धिवानोए समतारूपी शस्त्रथी तेओने छेक मूळमांथीज उखेडी नाखवा जोइये ॥ १५२ ॥

**मित्राणि प्राणिवर्गस्तु यो द्विषन्नपि कर्महा । कामं क्षा(शा)मयितव्योऽसौ क्रुधा दीप्तः शमामृतैः ॥१५३॥**

अन्वयः-प्राणिवर्गः तु मित्राणि, यः द्विषन्नपि कर्महा. क्रुधा दीप्तः असौ कामं शमअमृतैः शामयितव्यः. ॥ १५३ ॥

अर्थः-प्राणिमात्र खरेखर मित्रो छे, के जे शत्रुता बतावे, तोपण ते (आपणां) कर्मोनो नाश करनारा छे. माटे क्रोधथी जाज्वल्यमान थयेला एवा पण ते प्राणीमात्रने शांतिरूपी अमृतथी खूब शांत करवा. ॥ १५३ ॥

**कषायविषयान् शत्रून्परिपुष्यन्ति मित्रवत् । सुहृदोऽसुमतः शत्रूकृत्य निघ्नन्ति धिग्जडाः ॥ १५४ ॥**

अन्वयः–जडाः कषायविषयान् शत्रून् मित्रवत् परिपुष्यंति, सुहृदः असुमतः शत्रूकृत्य निघ्नंति, धिक्. ॥ १५४ ॥

अर्थः—मूर्ख माणसो कषाय अने विषयोरूपी शत्रुओनुं मित्रनीपेठे पोषण करे छे, अने मित्ररूप माणीओने शत्रु गणी, तेओनो घात करे छे, माटे तेओने धिक्कार छे! ॥ १५४ ॥

**राजन्कोऽप्यवधिज्ञानी तव पूर्वसुहृत्करी । सूक्त्यानया ददौ शिक्षां भुक्तराज्यस्य संयमे ॥ १५५ ॥**

अन्वयः–( हे ) राजन्! अवधिज्ञानी, कः अपि पूर्वसुहृत् करी अनया सूक्त्या भुक्तराजस्य तव संयमे शिक्षां ददौ. ॥१५५॥

अर्थः—माटे हे राजन्! अवधिज्ञानी, तथा तारा पूर्वभवना कोइक मित्र एवा आ हाथीए आ उत्तम श्लोक लखीने, राज्य भोगवी लीधेला एवा तने ( हवे ) दीक्षा लेवामाटे शिखामण आपी छे ॥ १५५ ॥

**इति विज्ञाय सूक्तार्थं चमत्कुर्वन्गुरोर्गिरा । मेदिनीजानिरानन्दहृष्टरोमपदोऽवदत् ॥ १५६ ॥**

अन्वयः—इति गुरोः गिरा सूक्तअर्थं विज्ञाय चमत्कुर्वन् मेदिनीजानिः आनंदहृष्टरोमपदः अवदत् ॥ १५६ ॥

अर्थः—एवीरीतनां गुरुमहाराजनां वचनथी श्लोकनो अर्थ जाणीने आश्चर्य पामतो एवो (ते) राजा हर्षथी प्रफुल्लित रोमांचवाळो थयोथको बोलवा लाग्यो के, ॥ १५६ ॥

**अद्य मे फलवज्जन्म यद्भवान्भवपारदः । अलभ्यत गुरुर्गौरगुणगौरवभाजनम् ॥ १५७ ॥**

अन्वयः—अद्य मे जन्म फलवत्, यत् भवपारदः गौरगुणगौरवभाजनं भवान् गुरुः अलभ्यत. ॥ १५७ ॥

अर्थः—आजे मारो जन्म सफल थयो, केमके संसारसमुद्रथी पार पहोंचाडनारा, तथा उत्तम गुणोथी सन्मान करवालायक एवा आपसरखा गुरुमहाराज ( मने ) प्राप्त थया. ॥ १५७ ॥

**त्वत्प्रसादेन संसारसारासारविचारवित् । जानेऽधुना धुनाम्युर्वीभोगान्योगानुरक्तधीः ॥ १५८ ॥**

अन्वयः—त्वत्प्रसादेन संसारसारअसारवित् योगअनुरक्तधीः जाने अधुना ऊर्वीभोगान् धुनामि. ॥ १५८ ॥

अर्थः—(वळी) आपनी कृपाथी हुं संसारना सार असार पदार्थोने जाणनारो, तथा योगमां आसक्त बुद्धिवाळो (वैराग्यवान)

थयो छुं, अनें तेथी जाणे हमणाज आ संसारसंबंधि भोगोने हुं छोडी आपुं. ॥ १५८ ॥

प्रभो पीयूषसदृशा दृशा मां वीक्ष्य दीक्षय । विलीयन्तां भवोत्थाना देहदाहज्वरोर्मयः ॥ १५९ ॥

अन्वयः—(हे) प्रभो ! पीयूषसदृशा दृशा मां वीक्ष्य दीक्षय ? भवोत्थानाः देहदाहज्वरऊर्मयः विलीयंतां ॥ १५९ ॥

अर्थः-हे प्रभो ! (हवे) अमृतसरखी दृष्टिथी मारातरफ जोइ मने दीक्षा आपो ? (के जेथी) आ संसारसंबंधि शरीरमां व्यापेला दाहज्वरना मोजांओ विखराइ जाय. ॥ १५९ ॥

इत्युदीर्य पदद्वन्द्वमद्वन्द्वस्थिरमानसः । आनन्दचन्द्रसूरीणामग्रहीदाग्रही नृपः ॥ १६० ॥

अन्वयः—इति उदीर्य अद्वंद्वस्थिरमानसः आग्रही नृपः आनंदचंद्रसूरीणां पदद्वंद्वं अग्रहीत. ॥ १६० ॥

अर्थः-एम कहीने अनुपम स्थिर मनवाळा तथा आग्रहवाळा एवा ते राजाए ते श्रीआनंदचंद्रमुनीश्वरना बन्ने चरणो ग्रहण कर्या. ॥ १६०

श्लोकार्थज्ञानसंविग्नाः परेऽपि बहवो जनाः । दृक्षा दीक्षामयाचन्त मुनिमानम्य तं तदा ॥ १६१ ॥

अन्वयः-तदा श्लोकअर्थज्ञानसंविग्नीः परे अपि बहवः दक्षाः जनाः तं मुनिं आनम्य दीक्षां अयाचंत. ॥ १६१ ॥

अर्थः—ते वखते ते श्लोकना अर्थने जाणवाथी वैराग्य पामेला बीजा पण घणा चतुर माणसोए ते मुनिराजने नमीने दीक्षामाटे मागणी करी. ॥ १६१ ॥

**अयं करात्तकल्याणकलशः करिशेखरः । अभिषिञ्चति यं राज्ये स्थाप्यः कामं स मामके ॥ १६२ ॥**

अन्वयः-करात्तकल्याणकलशः अयं करिशेखरः य अभिषिञ्चति, सः कामं मामके राज्ये स्थाप्यः, ॥ १६२ ॥

अर्थः--सुंढमां सुवर्णनो कलश लेइने आ हस्तिराज जेनो अभिषेक करे, तेने खुशथी मारा राज्यपर स्थापन करवो, ॥ १६२ ॥

**इत्यादिश्य तदा मन्त्रिवृन्दं वृन्दारको नृणाम् । मुक्तिवीक्षाप्रतिभुवं दीक्षामादत्त संमदी ॥ १६३ ॥ युग्मं ॥**

अन्वयः-इति तदा मंत्रिवृंदं आदिश्य संमदी नृणां वृंदारकः मुक्तिवीक्षाप्रतिभुवं दीक्षां आदत्त. ॥ १६३ ॥

अर्थः--एवीरीते ते वखते ( पोताना ) मंत्रीओना समूहने हुकम करीने हर्षित थयेला ते राजाए मुक्ति देखाडवाने खातरी

आपनारी दीक्षा ग्रहण करी. ॥ १६३ ॥

तेऽपि शुद्धधियो धीराः क्षीराब्धिस्फूर्तिकीर्तयः । कति नाददिरे दीक्षां भवक्षोदविनोदिनीम् ॥ १६४ ॥

अन्वयः—शुद्धधियः क्षीराब्धिस्फूर्तिकीर्तयः ते अपि कति भवक्षोदविनोदिनीं दीक्षां न आददिरे ? ॥ १६४ ॥

अर्थः—निर्मल बुद्धिवाळा, तथा क्षीरसमुद्रना विस्तारसरखी उज्ज्वल कीर्तिवाळा एवा तेओमाना पण केटलाओए संसारना नाशथी आनंद आपनारी दीक्षा न लीधी ? (अर्थात् घणाओए लीधी.) ॥ १६४ ॥

जिनप्रवचनप्रौढप्रभावपृथुभावनः । अथातः सपरीवारो विजहार महामुनिः ॥ १६५ ॥

अन्वयः—अथ जिनप्रवचनप्रौढप्रभावपृथुभावनः महामुनिः सपरीवारः अतः विजहार. ॥ १६५ ॥

अर्थः—पछी जिनशासननो घणो प्रभाव करवानी विस्तीर्ण भावनावाळा ते मुनिमहाराज परिवारसहित त्यांथी विहार करी गया. ॥१६५

मङ्गल्यकलशं तस्य करे न्यस्य करीशितुः । पविला मन्त्रिणस्तत्र ततः प्राञ्जलयो जगुः ॥ १६६ ॥

अन्वयः-ततः तत्र पवित्राः मंत्रिणः तस्य करीशितुः करे मंगलयकलशं न्यस्य प्रांजलयः जगुः. ॥ १६६ ।

अर्थः—पछी ते नगरमां निर्मल मनवाळा एवा ( ते ) मंत्रीओ ते हस्तीराजनी सुंढमां मंगलीक कलश आपीने हाथ जोडी कहेवा लाग्या के, ॥ १६६ ॥

**गजेकराज राजत्वं विराजयति यो गुणैः । तस्मै कस्मैचिदैश्वर्यं वितीर्य विजयी भव ॥ १६७ ॥**

अन्वयः-(हे) गजेकराज ! यः गुणैः राजत्वं विराजयति, तस्मै कस्मैचित् ऐश्वर्यं वितीर्य विजयी भव ? ॥ १६७ ॥

अर्थः-हे हस्तिराज ! जे माणस गुणोवडे राजने शोभावी शके, एवा कोइकने आ राज्यलक्ष्मी आपीने तुं विजयवंत था ? ॥१६७॥

**ततो मतङ्गजस्वामी चामीकरविभूषणः । मन्द्रगर्जितवाचालदिक्चक्रः प्रचचाल सः ॥ १६८ ॥**

अन्वयः-ततः चामीकरविभूषणः, मंद्रगर्जितवाचालदिक्चक्रः, सः मतंगजस्वामी प्रचचाल. ॥ १६८ ॥

अर्थः—पछी सुवर्णना आभूषणोवाळो, अने गंभीर गर्जनाथी दिक्चक्रने गजावतो, एवो ते मदोन्मत्त हस्तिराज ( त्यांथी

चालवा लाग्यो. ॥ १६८ ॥

रङ्कान्राज्ञश्च राज्याय पुरोऽसौ परिपातिनः । सदृशैव दृशा पश्यन्मार्गविघ्नानमन्यत ॥ १६९ ॥

अन्वयः-राज्याय पुरः पातिनः रंकान् राज्ञश्च सदृशैव दृशा पश्यन् असौ मार्गविघ्नान् अमन्यत. ॥ १६९ ॥

अर्थः--राज्य माटे ( पोतानी ) आगळ आवीने पडता एवा रंकोने अने राजाओने पण तुल्य दृष्टिथीज जोतो एवो ते हाथी ( तेओने पोताना ) मार्गमां विघ्नरूप मानवा लाग्यो. ॥ १६९ ॥

सरलं तरलं गच्छन्सदागतिरिव द्विपः । स तस्थौ नगरारामग्रामोर्वीष्वपि न क्वचित् ॥ १७० ॥

अन्वयः-सदागतिः इव सरलं तरलं गच्छन् सः द्विपः क्वचित् नगरआरामग्रामऊर्वीषु अपि न तस्थौ. ॥ १७० ॥

अर्थः-वायुनी पेठे सिद्धो तथा उतावळे चालतो एवो ते हाथी क्यांय नगर, बगीचा, के गामडानी जमीनपर पण उभो नही. । १७० ।

क्वानेन हन्त गन्तव्यमित्यन्तश्चिंतयातुराः । तं मन्त्रिणोऽन्वगुर्मन्त्रं प्रभावा इव साधितम् ॥ १७१ ॥

अन्वयः—हंत अनेन क्व गंतव्यं? इति अंतः चिंतयातुराः मंत्रिणः प्रभावाः साधितं मंत्रं इव तं अन्वगुः. ॥ १७१ ॥

अर्थः—अरे! आ हाथीने क्यां जवु छे? एम हृदयमां चिंतातुर थयेला मंत्रिओ, प्रभावो जेम साधेला मंत्र पाछळ जाय, तेम तेनी पाछळ जवा लाग्या. ॥ १७१ ॥

**रत्नार्थीव पुमानब्धिं पुंरत्नार्थी स वारणः । दुःप्रवेशं विवेशाथ दूरदेशाटवीपथम् ॥ १७२ ॥**

अन्वयः—रत्नार्थी पुमान् अब्धिं इव पुंरत्नार्थी सः वारणः अथ दुःप्रवेशं दूरदेशाटवीपथं विवेश. ॥ १७२ ॥

अर्थः—रत्नो मेळववानी इच्छावाळो मनुष्य जेम समुद्रमां जाय, तेम ( राज्यने लायक ) उत्तम पुरुष मेळववानी इच्छावाळो ते हाथी हवे दुर्गम एवा दूरदेशना अरण्यमार्गमां दाखल थयो. ॥ १७२ ॥

**सुप्तं तरुतले कंचिच्चीरच्छन्नशरीरकम् । तत्राभ्यषिञ्चदम्भोभिः कुम्भी कल्याणकुम्भजैः ॥ १७३ ॥**

अन्वयः—तत्र तरुतले सुप्तं, चीरच्छन्नशरीरकं कंचित् कुंभी कल्याणकुंभजैः अंभोभिः अभ्यषिंचत. ॥ १७३ ॥

अर्थः—त्यां वृक्ष नीचे सुतेला, तथा वस्त्रथी ढांकेला शरीरवाळा कोइक पुरुषपर ते हाथीए ते सुवर्णकलशमां रहेला जलवडे अभिषेक कर्यो. ॥ १७३ ॥

ततो बन्दिकदम्बेन कृते जयजयारवे । दूरमापूर्यमाणे च तूर्यक्काणेन दिग्गणे ॥ १७४ ॥

अयमुत्थापयांचक्रे यावद्राज्याय मंत्रिभिः । दृष्टस्तावद्विसंकोचिहस्ताद्यवयवः पुमान् ॥ १७५ ॥ युग्मं ॥

अन्वयः-ततः बंदिकदंबेन जयजयारवे कृते, च तूर्यक्काणेन दूरं दिग्गणे आपूर्यमाणे ॥ १७४ ॥ मंत्रिभिः यावत् राज्याय अयं उत्थापयांचक्रे, तावत् विसंकोचिहस्ताद्यवयवः पुमान् दृष्टः. ॥ १७५ ॥

अर्थः—पछी बंदिओना समूहे जयजय शब्द करते छते, अने वाजित्रोना नादथी छेक दूरसुधी दिशाओनो समूह पूराते छते, ॥ १७४ ॥ मंत्रिओए जेटलामां राज्यमाटे तेने उठाड्यो, तेटलामां तो संकुचित थयेला हाथआदिक अवयवोवाळो ते पुरुष (तेओना) जोवामां आव्यो. ॥ १७५ ॥ युग्मं ॥

प्रत्यक्षलक्षितक्ष्मापलक्षणोऽपि हहा महान् । नैष पद्भ्यां गतौ शक्तो न पाणिभ्यां तृणग्रहे ॥ १७६ ॥

अन्वयः—प्रत्यक्षलक्षितक्ष्मापलक्षणः एषः महान् अपि हहा ! पद्भ्यां गतौ, पाणिभ्यां तृणग्रहे शक्तः न ॥ १७६ ॥

अर्थः—जेना राजलक्षणो प्रत्यक्ष देखाय छे, एवो आ महान् पुरुष पण अरेरे ! बे पगे चालवामां, तथा बन्ने हाथे तणखलुं उपाडवामां पण अशक्त छे. ॥ १७६ ॥

किमीदृशोऽपि राज्ये स्यादिति ध्यायिषु मन्त्रिषु । करेणारोप्य तं पृष्ठे पुराय प्रययौ द्विपः ॥ १७७ ॥

अन्वयः—किं ईदृशः अपि राज्ये स्यात् ! इति मंत्रिषु ध्यायिषु द्विपः करेण तं पृष्ठे आरोप्य पुराय प्रययौ. ॥ १७७ ॥

अर्थः—शुं आवाने राज्यपर बेसाडाय ? एम मंत्रिओ विचारते छते ते हाथी सुंढवडे तेने पोतानी पीठपर चडावी नगर तरफ जवा लाग्यो. ॥ १७७ ॥

नूनं ज्ञानी गजोऽनेन राज्यं वर्धिष्णु वीक्ष्यते । प्रवेशोत्सवमित्यस्य विचित्रं मन्त्रिणो व्यधुः ॥१७८॥

अन्वयः—नूनं गजः ज्ञानी, अनेन राज्यं वर्धिष्णु वीक्ष्यते, इति मंत्रिणः अस्य विचित्रं प्रवेशोत्सवं व्यधुः. ॥ १७८ ॥

अर्थः—खरेखर ( आ ) हाथी ज्ञानी छे, अने ते आ पुरुषवडे राज्यनी वृद्धि जोइ रहेलो छे, एम विचारी मंत्रिओए तेनो आश्चर्यकारक प्रवेशमहोत्सव कर्यो. ॥ १७८ ॥

**अज्ञातकुलशीलस्याप्युन्मीलद्भाग्यशालिनः । राज्याभिषेकमङ्गल्यं तेनिरेऽस्य नरोत्तमाः ॥ १७९ ॥**

अन्वयः—अज्ञातकुलशीलस्य अपि उन्मीलद्भाग्यशालिनः अस्य नरोत्तमाः राज्याभिषेकमंगल्यं तेनिरे. ॥ १७९ ॥

अर्थः—अजाण्या कुल शीलवाळो छतां पण उदय पामता भाग्योथी मनोहर थयेला एवा ते पुरुषनो ते उत्तम पुरुषोए मंगलकारी राज्याभिषेक कर्यो. ॥ १७९ ॥

**राज्यप्रधानपुंवर्गस्तं ननाम च नाम च । पुण्यर्द्धिभावतस्तस्मिन्पुण्याढ्य इति निर्ममे ॥ १८० ॥**

अन्वयः—च राज्यप्रधानपुंवर्गः तं ननाम, च पुण्यऋद्धिभावतः तस्मिन् “ पुण्याढ्यः ” इति नाम निर्ममे. ॥ १८० ॥

अर्थः—पछी राज्यना मुख्य मुख्य पुरुषोना समूहे तेने नमस्कार कर्यो, तथा पुण्यथी मळेली समृद्धिना प्रभावथी तेनुं "पुण्याढ्य" एवुं नाम पाडयुं. ॥ १८० ॥

**राज्यार्धस्वामितागर्वादखर्वस्तु धनावहः । पङ्गुं नामुं नमामीति निर्ययो नगराद्बहिः ॥ १८१ ॥**

अन्वयः—राज्यार्धस्वामितागर्वात् अखर्वः धनावहः तु अमुं पंगुं न नमामि, इति नगरात् बहिः निर्ययौ. ॥ १८१ ॥

अर्थः—अर्ध राज्यनी मालिकीना गर्वथी अक्कड थयेलो धनावहशेठ तो, आ पांगळाने हुं नही नमुं, एम ( कही ) नगरथी बहार निकळी गयो. ॥ १८१ ॥

**तद्राज्यार्धबलं तस्य मण्डलेशाः परेऽपि च । विधुराङ्गधराधीशवैराग्येण तमन्वगुः ॥ १८२ ॥**

अन्वयः—तद्राज्य अर्धबलं, च तस्य परे मंडलेशाः अपि विधुरांगधराधीशवैराग्येण तं अन्वगुः. ॥ १८२ ॥

अर्थः—तेना राज्यनुं अर्धुं लश्कर, अने तेना बीजा मंडलीको पण आ पांगळा राजाथी विरक्त थइने ते धनावहशेठनी पाछळ गया. ।१८२।

सहस्तिकैर्हस्तिपकैः सतुरङ्गैस्तुरङ्गिभिः । नृपमूलबलाधीशैरप्यसावन्वगम्यत ॥ १८३ ॥

अन्वयः—सहस्तिकैः हस्तिपकैः, सतुरंगैः तुरंगिभिः, नृपमूलबलाधीशैः अपि असौ अन्वगम्यत. ॥ १८३ ॥

अर्थः—हाथीओसहित मावतो, घोडाओसहित स्वारो, तथा राजाना ( जूना ) मूल सेनापतिओ पण ते धनावहशेठनी पाछळ चालता थया. ॥ १८३ ॥

बलीयाञ्जयतीत्येष नियोगिभिरपि श्रितः । बहिर्बहुबलत्वेन नागरैरप्यगामि सः ॥ १८४ ॥

अन्वयः—बलीयान् जयति, इति नियोगिभिः अपि एषः श्रितः, बहुबलत्वेन नागरैः अपि सः बहिः अगामि. ॥ १८४ ॥

अर्थः—बलवान जय पामे छे, एम विचारि अमलदारोए पण ते धनावह शेठनो आश्रय लीधो, अने (ए रीते) बहुबल थवाथी नगरना लोको पण ( तेनी पाछळ ) बहार निकळया. ॥ १८४ ॥

अपि हस्तिपकेनोच्चैर्नुन्नो हस्तिपतिस्तु सः । एक एव बहिर्नागान्निर्भाग्येषु क्व तादृशः ॥ १८५ ॥

अन्वयः—तु हस्तिपकेन उच्चैः नुन्नः अपि सः एकः हस्तिपतिः एव तु बहिः न अगात्, निर्भाग्येषु तादृशः क्व ?॥ १८५ ॥

अर्थः—परंतु मावते बहु प्रेर्या छतां पण ते एक हस्तिराजज ( नगरनी ) बहार गयो नही, ( केमके ) निर्भागीओने तेवुं (अमूल्य रत्न ) क्यांथी प्राप्त थाय ? ॥ १८५ ॥

**अभूत्पुण्याढ्यभूपस्य भूपसद्मैव केवलम् । ययौ राज्यं समस्तं तदर्धराज्यहरे नरे ॥ १८६ ॥**

अन्वयः—पुण्याढ्यभूपस्य केवलं भूपसद्म एव अभूत्, समस्तं राज्यं तत् अर्धराज्यहरे नरे ययौ. ॥ १८६ ॥

अर्थः—( ते ) पुण्याढ्यराजानी मालीकीनो तो केवल राजमेहेलज बालासमां रह्यो, बाकी तेनु सघळुं राज्य तो अर्धुं राज्य हरनारा ते धनावह शेठनेज स्वाधीन थयुं. ॥ १८६ ॥

**भद्रासनैकभक्तात्ममध्येऽपि भुजभृद्गुणः । कोऽपि स्यादिति संनद्धबलजालश्चचाल सः ॥ १८७ ॥**

अन्वयः—भद्रासनैकभक्तआत्म मध्येऽपि कः अपि भुजभृद्गुणः स्यात्, इति संनद्धबलजालः सः चचाल. ॥ १८७ ॥

अर्थः—राजगादीना भक्तोमां पण कोइक सर्पसरखो दुर्गुणवालो पण होय, एम (ते हाथीना संबंधमां) विचारतो एवो ते धनावह शेठ सैन्यसमूह तैयार थयाबाद (त्यांथी) चालवा लाग्यो. ॥ १८७ ॥

**आधोरणाग्रणीस्तस्य वारणाधिपतेस्तदा । प्राञ्जलिर्जगतीजानिं विजयाय व्यजिज्ञपत् ॥ १८८ ॥**

अन्वयः—तदा तस्य वारणाधिपतेः आधोरणाग्रणीः प्रांजलिः जगतीजानिं विजयाय व्यजिज्ञपत्. ॥ १८८ ॥

अर्थः—ते वखते ते हस्तिराजना मुख्य मावते हाथ जोडीने ते पुण्याढ्यराजाने जयप्रयाण करवामाटे विनंति करी के, ॥ १८८ ॥

**जयत्येव रणोत्सङ्गसंगतोऽसाविभो विभो । अस्मिन्नारुह्यतामाशु मुह्यतां माऽसुहृद्गणैः ॥ १८९ ॥**

अन्वयः-(हे) विभो! रणोत्संगसंगतः असौ इभः जयत्येव, अस्मिन् आशु आरुह्यतां? असुहृद्गणैः मा मुह्यतां? ॥ १८९ ॥

अर्थः—हे स्वामी! रणसंग्राममां चडेलो आ हाथी जय मेळववानोज छे, माटे (तमो) आ हाथीपर तुरत चडो? अने शत्रुओना समूहथी डरो नही. ॥ १८९ ॥

एवमस्त्विति जल्पन्तं गोपमारोपयद् द्विपे । हस्तिपालस्तदा काल इव पूर्वाचले रविम् ॥ १९० ॥

अन्वयः—एवं अस्तु, इति जल्पंतं गोपं तदा कालः पूर्वाचले रविं इव हस्तिपालः द्विपे आरोपयत्. ॥ १९० ॥

अर्थः—भले एम थाओ ? एम बोलता एवा ते पुण्याढ्यराजाने ते वखते, प्रभातकाळ पूर्वाचलपर जेम सूर्यने चडावे, तेम ते हस्तिपाले हाथीपर चडाव्यो. ॥ १९० ॥

अथायमचलद्योद्धुमचलश्रीरिभप्रभुः । अवेपिनो भटाः केऽपि पट्टभक्ताः पुरोऽभवन् ॥ १९१ ॥

अन्वयः—अथ अचलश्रीः अयं इभ प्रभुः योध्धुं अचलत्, पट्टभक्ताः अवेपिनः के अपि भटाः पुरः अभवन्. ॥ १९१ ॥

अर्थः—हवे निश्चल शोभावाळो एवो ते हस्तिराज युद्ध करवामाटे चाल्यो, त्यारे राजगादीना भक्त, तथा शूरवीर एवा केटलाक सुभटो पण ( तेनी ) आगळ चालवा लाग्या. ॥ १९१ ॥

शौर्यलक्ष्मीनटीनाट्यारम्भसंभ्रमभृत्ततः । अमिलत्तुमुलोत्तालं तालवत्तद्दलद्वयम् ॥ १९२ ॥

अन्वयः—ततः शौर्यलक्ष्मीनटीनाट्यआरंभसंभ्रमभृत् तालवत् तुमुलोत्तालं तत् बलद्वयं अमिलत्. ॥ १९२ ॥

अर्थः—पछी शूरवीरपणानी शोभारूपी नटीना नाटकना प्रारंभना भ्रमवाळुं, तथा वागता तालनी पेठे कोलाहलवाळुं एवुं ते बन्ने सैन्य (त्यां) एकठुं मळ्युं. ॥ १९२ ॥

**विपक्षासिप्रहाराणां हाराणामिव पातिनाम् । सज्जीचक्रुः शरीराणि वीरश्रीलम्पटा भटाः ॥ १९३ ॥**

अन्वयः—वीरश्रीलंपटाः भटाः हाराणां इव पातिनां विपक्षासिप्रहाराणां शरीराणि सज्जीचक्रुः. ॥ १९३ ॥

अर्थः—शौर्यलक्ष्मीनी चाहनावाळा सुभटो माळाओनी पेठे पडनारा शत्रुओनी तलवारोना प्रहारो ( झीलवापाटे ) पोतानां शरीरो तैयार करवा लाग्या ॥ १९३ ॥

**गायत्कोदण्डदण्डज्यो नदद्द्विरदमर्दलः । नृत्यद्वीरकबन्धोऽयं बन्धुरोऽभूद्रणक्षणः ॥ १९४ ॥**

अन्वयः—गायत्कोदंडदंडज्यः, नदद्द्विरदमर्दलः, नृत्यद्वीरकबंधः अयं बंधुरः रणक्षणः अभूत् ॥ १९४ ॥

अर्थः—गायन करती छे धनुषदंडनी दोरी जेमां, नाद करता हाथीओ रूपी छे मृदंगो जेमां, तथा नाच करता छे शूरवीरोना धडो जेमां, एवुं आ मनोहर रणसंग्रामरूपी नाटक थवा मांडयुं. ॥ १९४ ॥

**भटान्पुण्याढ्यभूभर्तुः क्षणेनाथ द्रुमानिव । उन्मूलयद्भिः प्रसृतं द्विट्पूरैः सिन्धुपूरवत् ॥ १९५ ॥**

अन्वयः—अथ पुण्याढ्यभूभर्तुः भटान् द्रुमान् इव क्षणेन उन्मूलयद्भिः द्विट्पूरैः सिंधुपूरवत् प्रसृतं. ॥ १९५ ॥

अर्थः—हवे ( ते ) पुण्याढ्य राजाना सुभटोने वृक्षोनी पेठे क्षणवारमां मूळमांथीज उखेडी नाखता एवा शत्रुओना समूहो नदीना पूरनीपेठे धसी आववा लाग्या. ॥ १९५ ॥

**हस्ती न हन्त हन्तव्यः पंगुरेवैष हन्यताम् । इत्यूर्ध्वपाणिरवदत्तदा धीरान्धनावहः ॥ १९६ ॥**

अन्वयः–तदा हंत हस्ती न हंतव्यः, एषः पंगुः एव हन्यतां ? इति ऊर्ध्वपाणिः धनावहः धीरान् अवदत्. ॥ १९६ ॥

अर्थः—ते वखते, अरे! (तमारे ) आ हाथीने मारवो नही, परंतु आ पांगळा पुण्याढ्यनेज मारवो, एम उंचो हाथ करीने ते

धनावहशेठ ( पोताना ) सुभटोने कहेवा लाग्यो. ॥ १९६ ॥

क्षीणोपान्तस्वसैन्योऽपि दुर्धर्षोऽथ करीश्वरः । रिपुसैन्यं ममन्थासौ दधि मन्थानको यथा ॥ १९७ ॥

अन्वयः--अथ क्षीण उपांतस्वसैन्यः अपि दुर्धर्षः असौ करीश्वरः, यथा मंथानको दधि, रिपुसैन्यं ममंथ. ॥ १९७ ॥

अर्थः—हवे ( पोतानी ) पासेनुं सैन्य नष्ट थया छतां पण (कोइथी) गांज्यो न जाय एवो आ हस्तिराज, जेम रवायो दहींने तेम शत्रुना सैन्यने तोडी पाडवा लाग्यो. ॥ १९७ ॥

करी सर्वाभिसारेण ततोऽरोधि विरोधिभिः । रजनीसमयोद्भ्रान्तैर्ध्वान्तैरिव वियत्पथः ॥ १९८ ॥

अन्वयः-ततः रजनीसमयोद्भ्रांतैः ध्वांतैः वियत्पथः इव, विरोधिभिः सर्वाभिसारेण करी अरोधि. ॥ १९८ ॥

अर्थः-पछी रात्रिसमये प्रसरेला अंधकारवडे जेम आकाशमार्ग घेराइ जाय तेम शत्रुओए सर्व तरफथी धसी आवीने ते हाथीने घेर्यो ।१९८।

इत्यस्मिन्संकटे तिष्टन्पुण्याढ्यनृपतिर्जनैः । किमध्यासि करीशेन राज्येऽसावित्यशोच्यत ॥ १९९ ॥

अन्वयः—इति अस्मिन् संकटे तिष्ठन् पुण्याढ्यनृपतिः जनैः इति अशोच्यत, करीशेन असौ राज्ये किं अध्यासि!! ॥ १९९ ॥

अर्थः—एवी रीते आवा प्रकारना संकटमां आवी पडेला ते पुण्याढयराजामाटे लोको एम शोच करवा लाग्या के, (आ) हस्तिराजे आवाने राजगादीपर केम बेसाड्यो ! ! ॥ १९९ ॥

**तृणमप्यात्महस्तेन कुरु शस्त्रं रिपूञ्जय । तदेत्युवाच पुण्याढ्यमदृश्या भाग्यदेवता ॥ २०० ॥**

अन्वयः—आत्महस्तेन तृणं अपि शस्त्रं कुरु? रिपून् जय? इति अदृश्या भाग्यदेवता तदा पुण्याढ्यं उवाच ॥ २०० ॥

अर्थः—तारा हाथे तुं एक तणखलांने पण शस्त्रतरीके वापर? अने शत्रुओने जीत? एम अदृश्य रहेली (तेनी) भाग्यदेवीए ते वखते (ते) पुण्याढय राजाने कह्युं. ॥ २०० ॥

**तदैव दैवतस्तस्य मारुतप्रेरितं करे । आरोहच्च तृणं शत्रौ शस्त्रमित्यक्षिपच्च सः ॥ २०१ ॥**

अन्वयः—तदैव दैवतः मारुतप्रेरितं तृणं तस्य करे आरोहत्, च शस्त्रं इति सः शत्रौ अक्षिपत् ॥ २०१ ॥

अर्थः—तेज वखते दैवयोगे वायुथी उडेलुं तणखलुं तेना हाथमां आव्युं, अने आ शस्त्र छे, एम मानी तेणे ते शत्रुपर फेंक्युं.॥२०१॥

**अथाशु स्फूर्जदूर्जस्विस्फूर्जथुस्फोटिताम्बरम् । लोलकीलाकुलौद्धत्यधगद्दिग्मण्डलोदरम् ॥ २०२ ॥**

**कम्पमानाचलचयं भयभुग्नजगत्त्रयम् । तृणमप्यभवद्वज्रं व्योम्नि पुण्याढ्यपुण्यतः ॥ २०३ ॥ युग्मं ॥**

अन्वयः—अथ आशु स्फूर्जत् ऊर्जस्विस्फूर्जथुस्फोटित अंबरं, लोलकीलाकुल औद्धत्य धगत्दिग्मंडलउदरं॥ २०२ ॥ कंपमानअचलचयं, भय भुग्न जगत्त्रयं तृणं अपि पुण्याढ्यपुण्यतः व्योम्नि वज्रं अभवत्. ॥ २०३ ॥ युग्मं ॥

अर्थः—हवे तुरतज विकस्वर तेजवाळुं, तथा अवाजथी आकाशने पण फोडी नाखनारुं चपल ज्वालाओना समूहना फेलावाथी दिग्मंडलना मध्यभागने पण धगधगायमान करतुं, ॥ २०२ ॥ पर्वतोना समूहने कंपावातुं, अने भयथी त्रणे जगत्ने धुजावतुं एवुं ते तणखलुं पण पुण्याढ्य राजाना पुण्यथी आकाशमां वज्ररूप थयुं. ॥ युग्मं ॥

**यो न नंस्यति पुण्याढ्यं तत्र वज्रं पतिष्यति । इत्यभूच्च नभोवाणी भूपभाग्याधिदैवतात् ॥ २०४ ॥**

अन्वयः—च भूपभाग्याधिदैवतात् इति नभोवाणी अभूत्, यः पुण्याढयं न नंस्यति तत्र वज्रं पतिष्यति. ॥ २०४ ॥

अर्थः—वळी ते राजना भाग्यनी अधिष्ठाता देवी तरफथी एवी आकाशवाणी थइ के, जे माणस ( आ ) पुण्याढय राजाने नमशे नहीं, तेनापर ( आ ) वज्र पडशे. ॥ २०४ ॥

इत्युदन्तेन दन्तेषु नृणामीशास्तृणान्यधुः । नृपं नेमुश्च पुण्याढयमहो पुण्यमहोदयः ॥ २०५ ॥

अन्वयः—इति उदंतेन नृणां ईशाः दंतेषु तृणानि अधुः, च पुण्याढयं नृपं नेमुः, अहो ! पुण्यमहोदयः ! ॥२०५ ॥

अर्थः—एवीरीतना वृत्तांतथी राजाओ दांतोमां घास धारण करवा लाग्या, अने (ते) पुण्याढयराजाने नमवा लाग्या, अहो ! पुण्योनो (केवो) महान् प्रभाव छे ! ॥ २०५ ॥

दासस्तेऽस्मीति जल्पन्तं कल्पयन्तं मुहुः स्तुतिम् । लुठन्तं भूतले भूपोऽनुजग्राह धनावहम् ॥ २०६ ॥

अन्वयः—ते दासः अस्मि, इति जल्पंतं, मुहुः स्तुतिं कल्पयंतं, भूतले लुठंतं धनावहं भूपः अनुजग्राह. ॥ २०६ ॥

अर्थः—(हुं) तारो दास छुं, एम बोलता, तथा वारंवार स्तुति करता, अने पृथ्वीपीठपर लोटता, एवा (ने) धनावहशेठपर राजाए कृपा करी. ॥ २०६ ॥

पुरं प्रविशतस्तस्य राज्ञोऽथ जितकाशिनः । प्रथीयानरिवारोऽपि परिवारोऽभवत्तदा ॥ २०७ ॥

अन्वयः—अथ तदा पुरं प्रविशतः, जितकाशिनः तस्य राज्ञः प्रथीयान् अरिवारः अपि परिवारः अभवत् ॥ २०९ ॥

अर्थः-पछी ते वखते नगरमां प्रवेश करता, तथा जीत मेळवनारा एवा ते राजानो महोटो एवो शत्रुसमूह पण परिवाररूपे थयो ।२०९।

पुण्याढ्यभूपतेराज्ञां राज्ञां मूर्धन्यतन्वताम् । प्राणनाशार्थमाशासु कुलिशं विलसत्यदः ॥ २०८ ॥

इत्यम्बरगिरा साकं साकम्पभुवनत्रयम् । दूरादसंख्यदेशेषु दिवि तद्वज्रमभ्रमत् ॥ २०९ ॥ युग्मं ॥

अन्वयः—पुण्याढ्य भूपतेः आज्ञां मुर्ध्नि अतन्वतां राज्ञां प्राणनाशार्थं अदः कुलिशं आशासु विलसति, ॥ २०८ ॥ इति अंबरगिरा साकं साकंपभुवनत्रयं तद्वज्रं दूरात् असंख्य देशेषु अभ्रमत्. ॥ २०९ ॥ युग्मं ॥

अर्थः---(आ) पुण्याढ्यराजानी आज्ञाने मस्तकपर नही धारण करनारा राजाओना प्राणोनो नाश करवामाटे आ वज्र दिशाओ-मां फरे छे, ॥ २०८ ॥ एवीरीतनी आकाशवाणीसहित त्रणे जगत्‌ने कंपावनारुं ते वज्र दूर रहेला असंख्य देशोमां भमवा लाग्युं. ॥ २०९ ॥ युग्मं ॥

प्रदत्तासंख्यदेशान्तःपृथ्वीनाथाज्ञमित्यदः । अनिशं तासु सीमासु भीमार्चिर्वज्रमस्फुरत् ॥ २१० ॥

अन्वयः—इति प्रदत्तअसंख्यदेशांतः पृथ्वीनाथ आज्ञं भीमार्चिः अदः वज्रं अनिशं तासु सीमासु अस्फुरत्. ॥ २१० ॥

अर्थः-एवी रीते असंख्यदेशोमां राजानी आज्ञा मनावनारुं, तथा भयंकर तेजवाळुं आ वज्र हमेशां ते सीमाओमां दीपवा लाग्युं. ॥२१०॥

अन्यायवार्तामपि यश्चक्रे दध्यौ च तद्‌भुवि । तमेवाकम्पयद्वज्रमन्यायकरकायभित् ॥ २११ ॥

अन्वयः-तद्‌भुवि यः अन्यायवार्तां अपि चक्रे, च दध्यौ, तं एव अन्याय कर कायभित् वज्रं अकंपयत्. ॥ २११ ॥

अर्थः—ते राजानी जमीनपर जे कोइ अनीतिनी वात पण करतो, के चिंतवतो, तेनेज अन्याय करनारना शरीरने भय पमाडनारुं

( ते ) वज्र कंपाववा लाग्युं ॥ २११ ॥

तस्य बिभ्रद्भिरित्याशामाशङ्कां च प्रथीयसीम् । आज्ञा मूर्ध्नि दधे कामं तत्सीमावासिभिर्नृभिः ॥२१२॥

अन्वयः-इति तस्य प्रथीयसीं आशां च आशंकां बिभ्रद्भिः तत्सीमावासिभिः नृभिः कामं आज्ञा मूर्ध्नि दधे. ॥ २१२ ॥

अर्थः—एवी रीते तेना तरफनी विस्तीर्ण आशाने तथा भयनी शंकाने धारण करनारा, सीमाडामां वसनारा माणसोए खुशीथी ते राजानी आज्ञाने मस्तकपर धारण करी. ॥ २१२ ॥

वज्रसंचारनिश्चिन्तो बहुदेशमहीपतिः । श्रीपुण्याढ्यः सुखं तस्थावित्थं स्वर्गे हरिर्यथा ॥ २१३ ॥

अन्वयः-इत्थं वज्रसंचारनिश्चितः, बहुदेशमहीपतिः श्रीपुण्याढ्यः यथा स्वर्गे हरिः, सुखं तस्थौ. ॥ २१३ ॥

अर्थः—एवी रीते वज्रना फरवाथी चिंतारहित थयेलो, तथा घणा देशोनो स्वामी, एवो ते पुण्याढ्यराजा स्वर्गमां इंद्रनीपेठे सुखे रहेवा लाग्यो. ॥ २१३ ॥

**हृष्यन्नेत्यावनीपालं वनीपालः कदापि तम् । अवतंसीभवत्पाणिपङ्कजश्रीर्व्यजिज्ञपत् ॥ २१४ ॥**

अन्वयः—कदापि हृष्यन् अवतंसीभवत्पाणिपंकजश्रीः वनीपालः एत्य तं अवनीपालं व्यजिज्ञपत्. ॥ २१४ ॥

अर्थः—एक दिवसे खुशी थता, तथा मुकुटरूप थता हस्तकमलनी शोभावाळा ( मस्तकपर जोडेला हाथवाळा ) वनपाले आवीने ते राजाने वधामणी आपी के, ॥ २१४ ॥

**स्वामिन्नेतत्पुरस्वामी तपनस्तपसि स्थितः । आजगाम तवाराममवधिज्ञानभानुमान् ॥ २१५ ॥**

अन्वयः-( हे ) स्वामिन् ! तपसि स्थितः, अवधिज्ञान भानुमान् एतत्पुरस्वामी तपनः तव आरामं आजगाम. ॥ २१५ ॥

अर्थः—हे स्वामी ! तपस्या करतो, तथा अवधिज्ञानरूपी किरणोवाळो, आ नगरनो स्वामी तपन आपना बगीचामां आव्योछे. ।२१५।

**इत्याकर्ण्य श्रियः कर्णाभरणं धरणीपतिः । मुदितो दन्तिराजं तमारुह्योद्यानमासदत् ॥ २१६ ॥**

अन्वयः-श्रियः कर्णाभरणं इति आकर्ण्य मुदितः धरणीपतिः तं दंतिराजं आरुह्य उद्यानं आसदत्. ॥ २१६ ॥

अर्थः—लक्ष्मीना कर्णना आभूषण सरखुं एवीरीतनुं वचन सांभळीने खुशी थयेलो ते राजा ते हस्तिराजपर चडीने बगीचामां आव्यो. ॥ २१६ ॥

**महामुनिमिहानम्य निविष्टो हृष्टहृन्नृपः । कृतानतिः करीन्द्रोऽपि तस्थौ वचनगोचरे ॥ २१७ ॥**

अन्वयः-महामुनिं आनम्य हृष्टहृत् नृपः इह निविष्टः, करींद्रः अपि कृतानतिः वचनगोचरे तस्थौ. ॥ २१७ ॥

अर्थः—( ते ) मुनिमहाराजने नमीने खुशी थयेला हृदयवाळो ते राजा त्यां बेठो, अने ( ते ) हस्तिराज पण नमस्कार करीने ( मुनिराजनां ) वचनो सांभळवा उभो. ॥ २१७ ॥

**पुरस्य पुरभर्तुश्च प्रधानपुरुषैः क्रमात् । दूरं मुनिसभापूरि भूरिभिर्द्यौरिवोडुभिः ॥ २१८ ॥**

अन्वयः-क्रमात् पुरस्य पुरभर्तुः च भूरिभिः प्रधानपुरुषैः उडुभिः द्यौः इव दूरं मुनि सभा अपूरि. ॥ २१८ ॥

अर्थः—( पछी ) अनुक्रमे नगरना घणा मुख्य लोकोए तथा राजाना प्रधानोए, ताराओवडे आकाशनी पेठे दूर सुधी ते

मुनिनी सभा भरी ॥ २१८ ॥

ततः श्रुतसुधाम्भोधिविहरल्लहरीनिभाम् । निर्ममे निर्ममेशोऽयं निर्मलां धर्मदेशनाम् ॥ २१९ ॥

अन्वयः–ततः अयं निर्ममेशः श्रुतसुधांभोधिविहरल्लहरीनिभां निर्मलां धर्मदेशनां निर्ममे. ॥ २१९ ॥

अर्थः––पछी आ मुनिराजे सिद्धांतोरूपी अमृतसमुद्रनी वहेती छोळोसरखी निर्मल धर्मदेशना आपवा मांडी. ॥ २१९ ॥

इहानादौ भवेऽनादिजीवोऽनादिस्वकर्मतः । अव्यवहारराशौ स्याद् दुःसहग्रहदुःखभाक् ॥ २२० ॥

अन्वयः–इह अनादौ भवे अनादिजीवः अनादिस्वकर्मतः अव्यवहारराशौ दुःसहग्रहदुःखभाक् स्यात्. ॥ २२० ॥

अर्थः––आदिरहित एवा आ संसारमां आदिविनानो जीव पोताना अनादिकर्मोने योगे अव्यवहारराशिमां (निगोदना गोळामां) असह्य दुःखो भोगवनारो होय छे. ॥ २२० ॥

असंख्या ह्यत्र गोलाः स्युर्गोलोऽसंख्यनिगोदकः । एकैकस्मिन्निगोदे स्युरनन्ता जन्तवः स्थिराः ॥ २२१ ॥

अन्वयः—अत्र हि असंख्याः गोलाः स्युः, गोलः असंख्यनिगोदकः, एकैकस्मिन् निगोदे स्थिराः अनंताः जंतवः स्युः॥२२१॥

अर्थः—आ अव्यवहारराशिमां खरेखर असंख्य गोळा होय छे, अने ते (एकेको) गोळो असंख्य निगोदोथी भरेलो होय छे, अने ते एकेका निगोदमां स्थिर एवा अनंता जीवो होय छे. ॥ २२१ ॥

अन्योन्यजन्तुसंवाससंमर्दोत्पीडपीडितः । जीवोऽनन्तान्भवानेकेन्द्रिय एवात्र संवसेत् ॥ २२२ ॥

अन्वयः-अन्योन्यजंतुसंवाससंमर्दउत्पीडपीडितः जीवः अनंतान् भवान् एकेंद्रियः एव अत्र संवसेत्. ॥ २२२ ॥

अर्थः—एकबीजा जीवोना नजीक निवासथी थयेला संघट्टनी पीडाथी दुःखी थयेलो ते जीव अनंता भवो सुधी एकेंद्रियपणामांज अहीं रहे छे. ॥ २२२ ॥

उत्पत्तिनाशैस्तत्रैवाकामनिर्जरया चिरात् । स क्षिपेत्कानिचित्किंचित्कर्माणि कथमप्यथ ॥ २२३ ॥

अन्वयः-अथ तत्रैव उत्पत्तिनाशैः चिरात् अकाम निर्जरया सः कथं अपि कानिचित् कर्माणि किंचित् क्षिपेत्. ॥ २२३ ॥

अर्थः-पछी त्यांज जन्म मरणथी केटलेक काळे अकामनिर्जरावडे करीने ते जीव केटलेक मयासे केटलांक कर्मोने कंइक खपावे छे. ।२२३।

**एवं तेषु निगोदेषु सोऽनुभूय महाव्यथाम् । आयाति व्यवहाराख्यराशौ दैववशादिह ॥ २२४ ॥**

अन्वयः-एवं तेषु निगोदेषु सः महाव्यथां अनुभूय दैववशात् इह व्यवहार आख्य राशौ आयाति. ॥ २२४ ॥

अर्थः—एवी रीते ते निगोदोमां ते जीव अतिकष्ट भोगवीने दैवयोगे अहीं व्यवहारनामनी राशिमां आवे छे. ॥ २२४ ॥

**अत्यन्तस्थावरोऽप्यत्र कथंचित्कर्मलाघवात् । मानुष्यमुत्तमं प्राप्य भवे तत्रैव सिध्यति ॥ २२५ ॥**

अन्वयः-अत्र अत्यंतस्थावरः अपि कर्मलाघवात् कथंचित् उत्तमं मानुष्यं प्राप्य तत्र एव भवे सिध्यति. ॥ २२५ ॥

अर्थः-अहीं अत्यंत स्थावर एवो पण ते जीव कर्मोनी लघुताथी केटलेक मयासे उत्तम मनुष्यपणुं पामीने तेज भवमां मोक्षे जाय छे. २२५

**प्रायेणान्यस्तु सर्वोऽपि संसारे स्वस्वकर्मभिः। चतुरशीतिलक्षासु जीवो भ्राम्यति योनिषु॥ २२६ ॥**

अन्वयः—प्रायेण अन्यः सर्वः अपि जीवः तु स्वस्व कर्मभिः संसारे चतुरशीतिलक्षासु योनिषु भ्राम्यति. ॥ २२६ ॥

अर्थः—प्रायें करीने बीजा सर्वे जीवो पण पोतपोताना कर्मोवडे (आ) संसारमां चोर्यासीलाख योनिओमां भम्या करे छे. ॥२२६॥

**तथाहि। जन्मानि सप्त लक्षाः स्युः पृथ्वीकाये शरीरिणः। जले सप्तानले सप्तानिले सप्त स्वकर्मतः ॥ २२७ ॥**

अन्वयः—तथाहि—शरीरिणः स्वकर्मतः सप्त लक्षाः जन्मानि पृथ्वीकाये, सप्त जले, सप्त अनले, सप्त अनिले स्युः. ॥ २२७ ॥

अर्थः—ते कहे छे—जीवनी पोताना कर्मयोगे सातलाख योनिओ पृथ्वीकायमां, सातलाख अप्कायमां, सातलाख तेजस्कायमां, अने सातलाख वायुकायमां थाय छे. ॥ २२७ ॥

**द्विधा वनस्पतिर्ज्ञेयः प्रत्येकानन्तभेदतः। तत्राद्ये दश लक्षाणि द्वितीये तु चतुर्दश ॥ २२८ ॥**

अन्वयः—वनस्पतिः प्रत्येक अनंत भेदतः द्विधा ज्ञेयः, तत्र आद्ये दश लक्षणि, द्वितीये तु चतुर्दश ॥ २२८॥

अर्थः—वनस्पतिकाय प्रत्येक अने अनंत एटले साधारणना भेदथी बे प्रकारनो जाणवो, तेमना पेहेलानी दशलाख, अने बीजानी चौदलाख योनिओ छे. ॥ २२८ ॥

द्वीन्द्रिये त्रीन्द्रिये द्वे द्वे द्वे लक्षे चतुरिन्द्रिये । लक्षाश्चतस्रो निरये चतस्रस्त्रिदशालये ॥ २२९ ॥

अन्वयः-द्वींद्रिये द्वे, चतुरिंद्रिये द्वे, त्रींद्रिये द्वे लक्षे, निरये चतस्र लक्षाः, त्रिदशालये चतस्रः ॥ २२९ ॥

अर्थः-बेंद्रियमां बे लाख, त्रेंद्रियमां बे लाख, चउरिंद्रियमां बे लाख, नारकीमां चार लाख, अने देवोमां पण चार लाख योनिओ छे. ॥ २२९ ॥

लक्षाश्चतस्रस्तिर्यक्षु मनुष्येषु चतुर्दश । वर्णाद्यैः सममेकं तदुक्तं स्थानं तु बह्वपि ॥ २३० ॥

अन्वयः-तिर्यक्षु चतस्रः लक्षाः, मनुष्येषु चतुर्दश, तत् एकं स्थानं तु वर्णाद्यैः समं बहु अपि उक्तं. ॥२३०॥ चतुर्भिः कलापकं॥

अर्थः—तिर्यंचोमां चार लाख, तथा मनुष्योमां चौदलाख योनिओ छे, वळी ते एकेकुं स्थान तेना रंगआदिकथी घणा प्रकारनुं कह्युं छे. ॥ चतुर्भिः कलापकं ॥ २३० ॥

इत्थं भ्राम्यन्भृशं भाग्यैरात्माभ्येति भवे नृणाम् । आर्यक्षेत्रसुगोत्रायुरङ्गाक्षपटुतान्विते ॥ २३१ ॥

अन्वयः—इत्थं भृशं भ्राम्यन् आत्मा आर्यक्षेत्र सुगोत्र आयुः अंग अक्ष पटुता अन्विते नृणां भवे भाग्यैः अभ्येति. ॥ २३१ ॥
अर्थः—एवीरीते घणुं भमतो एवो आ आत्मा आर्यक्षेत्र, उत्तम गोत्र, (लांबुं) आयु, (निरोगी) शरीर, अने अखंडित इंद्रियोवाळा आ मनुष्यभवमां भाग्ययोगे आवे छे. ॥ २३१ ॥

**न स्यात्तत्र गुरुप्राप्तिः स चेत्तन्नागमश्रुतिः । सापि चेत्तन्न जीवस्य हृदि श्रद्धा समुल्लसेत् ॥ २३२ ॥**

अन्वयः-तत्र गुरुप्राप्तिः न स्यात्, चेत् सा आगमश्रुतिः न, चेत् सा अपि जीवस्य हृदि श्रद्धा न समुल्लसेत्. ॥ २३२ ॥
अर्थः—वळी ते मनुष्यभवमां सुगुरुनो मेळाप न थाय, कदाच ते थाय, पण सिद्धांतोनुं श्रवण न थाय, कदाच ते थाय, तोपण जीवने हृदयमां ते पर श्रद्धा न आवे. ॥ २३२ ॥

**सत्यां तस्यामपि प्रायस्तुच्छपुण्यस्तु मानवः । कर्तुं न लभते धर्ममाधिव्याधिप्रमादतः ॥ २३३ ॥**

अन्वयः-तस्यां सत्यां अपि प्रायः तुच्छपुण्यः मानवः तु आधिव्याधिप्रमादतः धर्मं कर्तुं न लभते. ॥ २३३ ॥

अर्थः—कदाच श्रद्धा थाय, तोपण मायें करीने स्वल्प पुण्यवाळो ते मनुष्य मानसिक चिंता, रोग, तथा प्रमादने लीधे धर्म करी शकतो नथी. ॥ २३३ ॥

निदानं सर्वसौख्यानां फलं मर्त्यत्वभूरुहः । विरलः कोऽपि शुद्धात्मा शश्वद्धर्मं निषेवते ॥ २३४ ॥

अन्वयः—सर्व सौख्यानां निदानं, मर्त्यत्वभूरुहः फलं धर्मं कः अपि विरलः शुद्धात्मा शश्वत् निषेवते. ॥ २३४ ॥

अर्थः—सर्व सुखोनां कारणरूप, तथा मनुष्यजन्मरूपी वृक्षना फलरूप एवा धर्मने कोइक विरलो निर्मल जीव हमेशां आराधी शकेछे।२३४।

विरुद्धाचरणैः केचिद्‌धन्या धर्ममप्यहो । विराधयन्ति दुर्बुद्धिबाधिता ह्यात्मवैरिणः ॥ २३५ ॥

अन्वयः—अहो ! दुर्बुद्धिबाधिताः, हि आत्मवैरिणः केचित् अधन्याः विरुद्धआचरणैः धर्मं अपि विराधयंति. ॥ २३५ ॥

अर्थः—अरे ! दुष्ट बुद्धिथी उद्धत थयेला, तथा खरेखर पोतानाज शत्रु बनेला, एवा केटलाक निर्भागी मनुष्यो उलटां आचरणोवडे ते धर्मने पण विराधे छे. ॥ २३५ ॥

आराद्धाच्च विराद्धाच्च धर्मादेव शुभाशुभे । लभते जन्तुरन्यत्तु मुख्यं किंचिन्न कारणम् ॥ २३६ ॥

अन्वयः—जंतुः आराद्धात् च विराद्धात् च धर्मात् एव शुभ अशुभे लभते, अन्यत् तु किंचित् मुख्यं कारणं न. ॥ २३६ ॥

अर्थः—प्राणी आराधेला तथा विराधेला धर्मथीज सारुंनरसुं मेळवे छे, ( शिवाय ) बीजुं कंई पण मुख्य कारण नथी. ॥ २३६ ॥

इति निश्चित्य सत्कृत्यमावितत्य शुभात्मना । धर्मः संसेव्य एवैषोऽतुल्यकल्याणजन्मभूः ॥ २३७ ॥

अन्वयः—इति निश्चित्य शुभआत्मना सत्कृत्यं आवितत्य अतुल्य कल्याण जन्म भूः एषः धर्मः एव संसेव्यः. ॥ २३७ ॥

अर्थः—एवो निश्चिय करीने उत्तम माणसे सत्कार्य करीने अनुपम कल्याणनी जन्मभूमिसरखो आ धर्मज सेववो जोइये. ॥२३७॥

इत्थं तस्य मुनीशस्य तैः पपे वचनामृतम् । अतृप्तैरिव मूर्धानं धुनानैर्धर्मिभिर्नृभिः ॥ २३८ ॥

अन्वयः-इत्थं अतृप्तैः इव मूर्धानं धुनानैः तैः धर्मिभिः नृभिः तस्य मुनीशस्य वचनअमृतं पपे. ॥ २३८ ॥

अर्थः—एवी रीते जाणे हजु तृप्त न थया होय नही ? एम मस्तक धुणावता एवा ते धर्मी माणसोए ते मुनिराजना वचनोरूपी

अमृतने पीधुं. ॥ २३८ ॥

**अथ पृथ्वीश्वरोऽत्यर्थं सव्यथो हृदये दधौ । किं मया युगपद्धर्माधर्मौ पूर्वभवे कृतौ ॥ २३९ ॥**

अन्वयः—अथ अत्यर्थं सव्यथः पृथ्वीश्वरः हृदये दधौ, पूर्वभवे मया किं युगपत् धर्मअधर्मौ कृतौ ? ॥ २३९ ॥

अर्थः—हवे घणोज खेद पामतो एवो ते पुण्याढ्यराजा मनमां विचारवा लाग्यो के, पूर्वजन्ममां में शुं एकीहारे धर्म अने पाप कर्या छे ? ॥ २३९ ॥

**यदेवं देहवैधुर्यं राज्यं चाप्यत तत्क्षणं । इन्द्रवारणनारंगसमास्वादनसोदरम् ॥ २४० ॥ युग्मं ॥**

अन्वयः—यत् एवं तत्क्षणं इंद्रवारण नारंग समास्वादन सोदरं देहवैधुर्यं राज्यं च आप्यत ॥ २४० ॥ युग्मं ॥

अर्थः—के जेथी आवी रीते एकी वेळाये कडवां इंद्रावण तथा मीठी नारंगीना स्वाद सरखां शरीरनी खोड अने राज्य (मने) मळ्यां. ॥ २४० ॥ युग्मं ॥

**इति ध्यात्वाधिकं धात्रीधवः साधुशिरोमणिम् । अपृच्छत्कायसंकोचभाग्यासंकोचकारणम् ॥ २४१ ॥**

अन्वयः--इति अधिकं ध्यात्वा धात्रीधवः कायसंकोच भाग्य असंकोच कारणं साधु शिरोमणिं अपृच्छत्. ॥२४१॥

अर्थः--एम खूब विचारीने ते राजाए ( पोताना ) शरीरना संकोचनुं, तथा भाग्योना असंकोचनुं ( अर्थात् राज्यआदिक समृद्धिनी प्राप्तिनुं ) कारण ते मुनिराजने पूछयुं. ॥ २४१ ॥

**ततो दन्तद्युतिच्छद्मद्दश्यधर्मद्रुपुष्पया । आसन्नमुक्तिफलया गिराप्रीणाज्जनं मुनिः ॥ २४२ ॥**

अन्वयः--ततः दंतद्युतिच्छद्मदृश्यधर्मद्रुपुष्पया, आसन्नमुक्तिफलया गिरा मुनिः जनं अप्रीणात्. ॥ २४२ ॥

अर्थः--पछी दांतोनी कांतिना मिषथी धर्मरूपी वृक्षनां पुष्पो देखाडती, अने नजीक छे मुक्तिरूपी फल जेनुं, एवी वाणीवडे करीने ते मुनिराज लोकोने आनंद पमाडवा लाग्या. ॥ २४२ ॥

**पुरं लक्ष्मीपुरं नाम शोणश्यामाश्मवेश्मभिः । पदं धर्ममुनेरस्ति महस्तिमिरमेलकृत् ॥ २४३ ॥**

अन्वयः—शोणश्यामाश्मवेश्मभिः महःतिमिरमेलकृत् धर्ममुनेः पदं लक्ष्मीपुरं नाम पुरं अस्ति. ॥ २४३ ॥

अर्थः--लाल अने श्याम रंगना पत्थरोथी ( बांधेला ) घरोवडे करीने उजास तथा अंधकारनो मेलाप करनारुं धर्मरूपी मुनिना स्थान सरखुं लक्ष्मीपुर नामनुं नगर छे. ॥ २४३ ॥

**जज्ञिरे तत्र मित्राणि त्रयः क्षत्रियगोत्रजाः । रामवामनसंग्रामनामानः प्रीतिभाजनम् ॥ २४४ ॥**

अन्वयः--तत्र क्षत्रियगोत्रजाः प्रीतिभाजनं राम वामन संग्रामनामानः त्रयः मित्राणि जज्ञिरे. ॥ २४४ ॥

अर्थः—ते नगरमां क्षत्रिय कुलमां जन्मेला, तथा परस्पर प्रीतिवाळा राम, वामन अने संग्राम नामना त्रण मित्रो हता. ॥ २४४

**चतुर्दशाब्ददेशीयाः कामं विरहकातराः । खेलन्तिस्म सहेलं ते पुरि पौरप्रियश्रियः ॥ २४५ ॥**

अन्वयः--चतुर्दशअब्ददेशीयाः, कामं विरहकातराः, पौरप्रियश्रियः ते सहेलं पुरि खेलंतिस्म. ॥ २४५

अर्थः--चौद वर्षोनी उमरना तथा कोइपण रीते एक बीजानो विरह सहन नही करनारा, अने नगरना लोकोने प्रिय शोभावाळा

एवा ते त्रणे मित्रो मोजथी नगरमां क्रीडा करता हता. ।। २४५ ।।

ते सज्जनमनस्तोषकारितुल्यक्रियास्त्रयः । साधोर्मनोवचःकायप्रपञ्चा इव रेजिरे ॥ २४६ ॥

अन्वयः–सज्जनमनःतोषकारितुल्यक्रियाः ते त्रयः साधोः मनःवचःकायप्रपंचाः इव रेजिरे. ।। २४६ ।।

अर्थः––सज्जनोना मनने संतोष आपनारी सरखी क्रिया करनारा एवा ते त्रणे मित्रो मुनिना मन, वचन अने कायाना बंधारणोनी पेठे शोभता हता. ।। २४६ ।।

कदाप्युद्यानमेदिन्यां ते ययुः केलिलालसाः । ददृशुश्च कमप्युद्यत्कायोत्सर्गस्थितं यतिम् ॥ २४७ ॥

अन्वयः–केलिलालसाः ते कदापि उद्यानमेदिन्यां ययुः, च उद्यत्कायोत्सर्गस्थितं कं अपि यतिं ददृशुः. ।। २४७ ।।

अर्थः––क्रीडा करवानी इच्छावाळा एवा ते त्रणे कोइक दिवसे बगीचामां गया, अने ( त्यां ) तेओए कायोत्सर्ग ध्यानमां रहेल कोइक मुनिने जोया. ।। २४७ ।।

प्रीतिमन्तो नमन्ति स्म ते यतेः पद्योः पुरः । उन्नमन्ति स्म लोकाग्रं यावत्पुण्येन वर्ष्मणा ॥ २४८॥

अन्वयः-प्रीतिमंतः ते यतेः पदयोः पुरः वर्ष्मणा नमंतिस्म, पुण्येन लोकाग्रं यावत् उन्नमंतिस्म. ॥ २४८ ॥

अर्थः--प्रीतिवाळा एवा तेओ ते मुनिना चरणोमां शरीरवडे नम्या एटले नमस्कार कर्यो, ( अने तेथी ) पुण्यवडे तेओ छेक लोकना अग्रभागसुधी उंचा थया. ॥ २४८ ॥

पयःकणोऽपतत्पृष्ठे वामनस्य नमस्यतः । मुक्तिसीमन्तिनीमुक्तलीलाकर्करकोपमः ॥ २४९ ॥

अन्वयः-नमस्यतः वामनस्य पृष्ठे मुक्ति सीमंतिनी मुक्तलीलाकर्करकउपमः पयःकणः अपतत्. ॥ २४९ ॥

अर्थः—नमता एवा वामननी पीठपर मुक्तिरूपी स्त्रीए विलासमाटे फेंकेला इशारतना कांकरा सरखो जलबिंदु पडयो. ॥ २४९ ॥

स चातक इवोत्पश्यः पश्यन्वारिलवागमम् । गलदश्रुजलं साधोरेकमीक्षणमैक्षत ॥ २५० ॥

अन्वयः—चातकः इव उत्पश्यः वारिलवागमं पश्यन् सः गलदश्रुजलं साधोः एकं ईक्षणं ऐक्षत. ॥ २५० ॥

अर्थः—चातकपक्षीनी पेठे उंची नजर करीने ते जलबिंदु पडवानुं ( स्थान ) जोवा लाग्यो, एटले जेमांथी अश्रुजल टपके छे, एवी ते साधुनी एक आंख तेणे जोइ. ॥ २५० ॥

**निरीक्ष्य निपुणं दक्षः स्ववयस्यावुवाच सः । नेत्रं मुनेर्दुनोत्यस्य दृश्यतामेष कण्टकः ॥ २५१ ॥**

अन्वयः—दक्षः सः निपुणं निरीक्ष्य स्ववयस्यौ उवाच, दृश्यतां ! एषः कंटकः अस्य मुनेः नेत्रं दुनोति. ॥ २५१ ॥

अर्थः–चतुर एवा ते वामने सारी रीते तपासीने पोताना बन्ने मित्रोने कह्युं के, जुओ ! आ कांटो आ मुनिना चक्षुने कष्ट आपेछे ।२५१।

**मारुतोर्मिधुतो नूनमयमस्यापतद्दृशि । नाकृष्येत शरीरेऽपि निरीहेणामुना पुनः ॥ २५२ ॥**

अन्वयः—नूनं मारुतोर्मिधुतः अयं अस्य दृशि अपतत्, पुनः शरीरे अपि निरीहेण अमुना न आकृष्येत ॥ २५२ ॥

अर्थः—खरेखर वायुना झपाटाथी उडीने आ कांटो आ मुनिनी आंखमां पडेलो लागे छे, परंतु शरीरनी पण ममता विनाना एवा आ मुनिए ते कांटो पाछो खेंची कहाड्यो नथी. ॥ २५२

**अस्मत्करोऽल्पकायत्वान्नैतदम्बकचुम्बकः । तत्कथं कण्टकः क्रष्टुं शक्योऽरिष्टमिवात्मनः ॥ २५३ ॥**

अन्वयः—अल्पकायत्वात् अस्मत्करः एतत् अंबकचुंबकः न, तत् आत्मनः अरिष्टं इव कंटकः कथं क्रष्टुं शक्यः ? ॥ २५३ ॥

अर्थः—आपणे नीचा होवाथी आपणो हाथ आ मुनिराजनी आंखने पहोंची शकशे नही, माटे आपणा विघ्ननी पेठे आ कांटाने आपणे खेंचीने केम कहाडी शकीशुं ? ॥ २५३ ॥

**रामो वामनमाचष्ट सखे मा खेदमुद्वह । चतुष्पदीभवाम्येष पाणिस्पृष्टमहीतलः ॥ २५४ ॥**

अन्वयः—रामः वामनं आचष्ट, ( हे ) सखे ! खेदं मा उद्वह ? पाणिस्पृष्टमहीतलः एषः चतुष्पदीभवामि ॥ २५४ ॥

अर्थः— ( त्यारे ) रामे वामनने कह्युं के, हे मित्र ! तुं निराश नहीं था ? बन्ने हाथवडे पृथ्वीतलने अडकीने आ हुं चोपगो थाउं छुं. ॥ २५४ ॥

**मत्पृष्ठदत्तपादाग्रो वामनत्व मवामनः । भव हर्षगृहं कर्ष कण्टकं मुनिनेत्रतः ॥ २५५ ॥**

अन्वयः-( हे ) वामन! मत्पृष्ठदत्तपादअग्रः त्वं अवामनः, हर्षगृहं भव? मुनिनेत्रतः कंटकं कर्ष? ॥ २५५ ॥

अर्थः—( माटे हे वामन ! मारी पीठपर तारा पगना अग्र भाग मूकीने तुं उंचो थइ खुशी था ? अने आ मुनिराजनी आंखमांथी कांटो कहाड ? २५५ ॥

अथ जग्राह संग्रामो व्यामोहद्रोहकृद्वचः । सखे निर्माहि कर्मेदमव्यग्रो मत्करग्रहात् ॥ २५६ ॥

अन्वयः--अथ संग्रामः व्यामोहद्रोहकृत् वचः जग्राह, ( हे ) सखे! मत्करग्रहात् अव्यग्रः इदं कर्म निर्माहि? ॥ २५६ ॥

अर्थः—पछी संग्राम (पण) मोहनो नाश करनारूं वचन बोल्यो के, हे मित्र ! मारो हाथ पकडीने गभराटविना (निश्चिंतपणे) आ कार्य तुं कर ? ॥ २५६ ॥

ततश्चतुष्पदीभूततनौ रामे कृतक्रमः । संग्रामहस्तविन्यस्तवामहस्तः स वामनः ॥ २५७ ॥

अहो कियन्मलाद्रोऽयं संकुचन्निति शङ्कया । अवामपाणिनाकर्षन्महर्षेः कण्टकं दृशः ॥ २५८ ॥ युग्मं ॥

अन्वयः—ततः चतुष्पदीभूत तनौ रामे कृत क्रमः, संग्राम हस्त विन्यस्त वाम हस्तः सः वामनः, ।।२५७ अहो! अयं कियत् मलार्द्रः ! इति शूकया संकुचन् अवाम पाणिना महर्षेः दृशः कंटकं अकर्षत्. ॥ २५८ ॥ युग्मं ॥

अर्थः—पछी चोपगांरूप थयेल शरीरवाळा रामनी पीठ उपर पग राखीने तथा डाबे हाथे संग्रामनो हाथ पकडीने ते वामने,॥२५७॥ अहो ! आ मुनि केवो गंदो छे ! एम सूगथी संकोच पामतांथकां (पोताना) जमणा हाथथी ते मुनिराजनी आंखमांथी कांटो खेंची कहाड्यो. ॥ २५८ ॥ युग्मं ॥

॥ सुखसंचरणार्थं ते मुक्तिमार्गमिवात्मनः । कृत्वा निष्कण्टकं नेत्रं मुनेर्मुमुदिरेतराम् ॥ २५९ ॥

अन्वयः-ते सुखसंचरणार्थं आत्मनः मुक्तिमार्गं इव मुनेः नेत्रं निष्कंटकं कृत्वा मुमुदिरेतरां. ॥ २५९ ॥

अर्थः—तेओ सुखे चालवामाटे जाणे पोताना मोक्षमार्गने कांटारहित करता होय नही ? तेम ते मुनिनी आंखने कांटारहित करीने बहु खुशी थवा लाग्या. ॥ २५९ ॥

**उपकारपरो न स्यात्को ऽप्यस्मान्क्षत्रियान्विना । इति गोत्रमदं दध्यो मुग्धत्वाद्वामनस्तदा ॥ २६० ॥**

अन्वयः-अस्मान् क्षत्रियान् विना उपकारपरः कः अपि न स्यात् , इति मुग्धत्वात् वामनः तदा गोत्रमदं दध्यौ. २६० ॥

अर्थः—अमो क्षत्रिओविना ( बीजो ) कोइ पण ( आवो ) उपकार करनार होइ शके नही, एम भोळपणथी ते वामने ते वखते गोत्रमद धारण कर्यो ॥ २६० ॥

**कृतिनः कृतकृत्यास्ते नमस्कृत्य यतिं ततः । पुराय प्राचलन्वाचमिति चोवाच वामनः ॥ २६१ ॥**

अन्वयः-कृतकृत्याः ते कृतिनः यतिं नमस्कृत्य ततः पुराय प्राचलन्, वामनः च इति वाचं उवाच. ॥ २६१ ॥

अर्थः—कृतार्थ थयेला ते त्रणे सज्जनो मुनिने नमस्कार करीने त्यांथी नगर तरफ चाल्या, (त्यारे) वामन एवुं वचन बोल्यो के, ।२६१।

**निर्वृतानामिवेहापि येनानन्दोऽजनिष्ट नः । अहो भविष्यति कियत्कर्मणोऽस्याग्रतः फलम् ॥ २६२ ॥**

अन्वयः-येन इह अपि निर्वृतानां इव नः आनंदः अजनिष्ट, अहो ! अस्य कर्मणः अग्रतः कियत् फलं भविष्यति ! ॥ २६२ ॥

अर्थः—जे कार्यथी अहीं पण सिद्धोनी पेठे आपणने आनंद थयेलो छे, त्यारे अहो! आ कार्यनुं आगळ हजु केटलुं (मोटुं) फळ मळशे ! ॥ २६३ ॥

**आस्येन बहुहास्येन तदा रामोऽकिरद्गिरम् । इहाभूत्पशुरूपत्वं ममैतत्कर्मणः फलम् ॥ २६३ ॥**

अन्वयः—तदा रामः बहुहास्येन आस्येन गिरं अकिरत्, इह मम एतत्कर्मणः फलं पशुरूपत्वं अभूत्. ॥ २६३ ॥

अर्थः—त्यारे राम घणा हास्ययुक्त मुखथी (एवुं) वचन बोल्यो के, अहीं मने तो आ कार्यना फलरूपे पशुपणुं धारण करवुं पड्युं ।२६३।

**गामग्रहीच्च संग्रामो राम मा मैवमुच्यताम् । हास्योक्त्यापि भवत्येव पुण्यकर्म गलत्फलम् ॥ २६४ ॥**

अन्वयः—च संग्रामः गां अग्रहीत्, (हे) राम! एवं मा मा उच्यतां ? हास्यउक्त्या अपि पुण्यकर्म गलत्फलं भवति एव. ॥२६४॥

अर्थः—पछी संग्राम बोल्यो के, हे रामः (तुं) एवुं वचन नहीं बोल? (केमके) हांसीयुक्त वचनथी पण पुण्यकार्य स्वल्प फलवाळुं थायज छे. ॥ २६४ ॥

यदस्य मुनिराजस्य नेत्रं निःकण्टकं कृतम् । राज्यं भवान्तरे भावि तदकण्टकमेव नः ॥ २६५ ॥

अन्वयः-यत् अस्य मुनिराजस्य नेत्रं निःकंटकी कृतं, तत् नः भवांतरे अकंटकं एव राज्यं भावि. ॥ २६५ ॥

अर्थः---( आपणे ) जे आ मुनिराजनी आंख कंटकरहित करी छे, तेथी आपणने आवता भवमां निःकंटक ( शत्रुओ विनानुं ) राज्य प्राप्त थशे. ॥ २६५ ॥

अथ प्रोन्मीलदुद्दामकामनो वामनोऽवदत् । कर्मामेयफलं ह्येतत्फलमानोऽस्य नोच्यते ॥ २६६ ॥

अन्वयः-अथ प्रोन्मीलत्उद्दामकामनः वामनः अवदत् , एतत् कर्म अमेयफलं, अस्य फलमानः न उच्यते. ॥ २६६ ॥

अर्थः—पछी उंची इच्छा धरावनारो वामन बोल्यो के, आ कार्य तो अनंत फलवाळुं छे, आ कार्यना फलनुं प्रमाण कही शकायज नहीं. ॥ २६६ ॥

इत्थं मिथः कथालापशालिनः प्रीतिमालिनः । अद्भुतं भावयन्तस्तत्कर्म हर्म्यमहीमगुः ॥ २६७ ॥

अन्वयः--इत्थं मिथः कथालापशालिनः प्रीतिमालिनः तत्कर्म अद्भुतं भावयंतः हर्म्यमहीं अगुः. ॥ २६७ ॥

अर्थः-एवी रीते परस्पर वातो करवाथी शोभता, तथा आनंद पामता (एवा तेओ) ते कार्यने आश्चर्यवाळुं मानताथका घेर गया.।२६७।

अजातपौरपीडाभिः क्रीडाभिस्ते निरन्तरम् । वयस्या गमयामासुर्वासरान्धर्मभासुरान् ॥ २६८ ॥

अन्वयः—अजातपौरपीडाभिः निरंतरं क्रीडाभिः ते वयस्याः धर्मभासुरान् वासरान् गमयामासुः. ॥ २६८ ॥

अर्थः—जेथी नगरना लोकोने कंइ दुःख न थाय, एवी हमेशनी क्रीडाथी ते त्रणे मित्रो धर्मकार्योथी तेजस्वी थयेला दिवसो गाळवा लाग्या. ॥ २६८ ॥

तेऽथ पातकपूरेण दूरिताः पूरितायुषः । यथा यथा समुत्पन्नाः शृणु भूप तथा तथा ॥ २६९ ॥

अन्वयः-अथ ( हे ) भूप ! पातकपूरेण दूरिताः ते पूरितायुषः यथा यथा समुत्पन्नाः, तथा तथा शृणु ? ॥ २६९ ॥

अर्थः-पछी हे राजन् ! पापोना समूहथी रहित एवा ते त्रणे आयु संपूर्ण थयाबाद जेम जेम (पाछा) उत्पन्न थया, तेम तेम सांभळो?

फलं मे पशुरूपत्वमिति हासोक्तिकर्मणः । स रामः सामजो जज्ञे तैः पुण्यैर्ज्ञानवानयम् ॥ २७० ॥

अन्वयः—मे पशुरूपत्वं फलं, इति हासोक्तिकर्मणः स रामः सामजः जज्ञे, तैः पुण्यैः अयं ज्ञानवान्. ॥ २७० ॥

अर्थः—" मने तो आ पशुरूप धारण करवानुं फल मळ्युं, " एम हांसीयुक्त वचनना कर्मथी ते रामनो जीव हाथी थयो, परंतु ते पुण्योवडे आ ज्ञानवाळो थयो छे. ॥ २७० ॥

मुनिदृक्कण्टकाकर्षाद्राज्यं निष्कण्टकं भवेत् । इत्युक्त्वा प्राप संग्रामजीवोऽहं तादृशं फलम् ॥ २७१ ॥

अन्वयः—मुनिदृक्कंटकआकर्षात् निष्कंटकं राज्यं भवेत, इति उक्त्वा संग्रामजीवः अहं तादृशं फलं प्राप. ॥ २७१ ॥

अर्थः—मुनिनी आंखमांथी कांटो कहाडवाथी निष्कंटक (शत्रुविनानुं) राज्य मळे. एवां वचनथी संग्रामनो जीव एवो ( आ ) हुं तेवुं ( राज्यरूप ) फल पाम्यो. ॥ २७१ ॥

प्राग्मैत्रीरागतो नागवरोऽसौ मामुपागतः । बोधितोऽहमनेनेदं प्राक्कर्मफलमासदम् ॥ २७२ ॥

अन्वयः—प्राक्मैत्रीरागतः असौ नागवरः मां उपागतः, अनेन अहं बोधितः, इदं प्राक्कर्मफलं आसदं ॥ २७२ ॥

अर्थः—पूर्वभवनी मित्राइना रागथी आ हस्तिराज मारीपासे आव्यो. अने तेणे मने बोध आप्यो, एवी रीते में पूर्वना कर्मोनुं फल मेळव्युं. ॥ २७२ ॥

**यस्त्वासीद्वामनः किंचिद्गोत्रगर्वाद्वामनः । भूप स्वरूपमेतस्य शृणु शेषं विशेषतः ॥ २७३ ॥**

अन्वयः—( हे ) भूप ! यः तु वामनः गोत्रगर्वात् किंचित् अवामनः आसीत्, एतस्य शेषं स्वरूपं विशेषतः शृणु. ? ॥ २७३ ॥

अर्थः—वळी हे राजन्. ! वामन के जे गोत्रना गर्वथी कंइक अक्कड रह्यो हतो, तेनुं बाकी रहेलुं वृत्तांत तमो विशेष प्रकारे सांभळो ? ।२७३

**अस्त्यवन्ती समस्तार्थानवन्ती नामतः पुरी । वाग्लक्ष्म्यौ क्रीडतोऽपीडं यस्यां जनमुखाम्बुजे ॥ २७४ ॥**

अन्वयः—समस्त अर्थान अवंती अवंती नामतः पुरी अस्ति, यस्यां वाग्लक्ष्म्यौ जन मुख अंबुजे अपीडं क्रीडतः ।।२७४।।

अर्थः—सर्व पदार्थोनुं रक्षण करती ( एटले ज्यां सर्व वस्तुओ मळे छे एवी ) अवंती नामनी नगरी छे, के जेमां सरस्वती अने

लक्ष्मी लोकोना मुखकमलपर बाधारहित क्रीडा करे छे. ॥ १७४ ॥

**तस्यां शस्यांसशैलाग्रझरत्पौरुषनिर्झरः । विरोधिरोधकृद्बाहुः सुबाहुरिति भूपतिः ॥ २७५ ॥**

अन्वयः—तस्यां शस्यांसशैल अग्र झरत्पौरुष निर्झरः, विरोधि रोधकृत् बाहुः सुबाहुः इति भूपतिः ॥ २७५ ॥

अर्थः—ते नगरीमां मनोहर खभारूपी पर्वतना शिखरपरथी झरतुं छे पराक्रमरूपी झरणुं जेमांथी, तथा शत्रुओने अटकावनारी छे भुजा जेनी एवो " सुबाहु " नामे राजा छे. ॥ २७५ ॥

**तस्य धात्रीपतेश्छत्रधरः किन्नरसंज्ञकः । गृहिणी हरिणी तस्य हरिणीनयनाजनि ॥ २७६ ॥**

अन्वयः—तस्य धात्रीपतेः किन्नरसंज्ञकः छत्रधरः, तस्य हरिणीनयना हरिणी गृहिणी अजनि. ॥ २७६ ॥

अर्थः—ते राजानो किन्नरनामनो छत्रधर हतो, अने तेनी हरिणीसरखी आंखोवाळी हरिणी नामनी स्त्री हती. ॥ २७६ ॥

**सुकृती वामनस्यात्मा गर्भेऽस्याः समवातरत् । गर्भानुभावतोऽपश्यत्तदा सा स्वप्नमद्भुतम् ॥ २७७ ॥**

अन्वयः—सुकृती वामनस्य आत्मा अस्याः गर्भे समवातरत्, तदा गर्भअनुभावतः सा अद्भुत स्वप्नं अपश्यत्. ॥ २७७ ॥

अर्थः—पुण्यशाली एवो वामननो जीव तेणीना गर्भमां उत्पन्न थयो. ते वखते ते गर्भना प्रभावथी तेणीए अद्भुत स्वप्न जोयुं.।२७७।

तत्क्षणं हरिणी त्यक्तनिद्रा चन्द्रमुखी सुखम् । पल्यङ्कादुत्थिता पत्युः सुस्थितेति व्यजिज्ञपत् ॥ २७८ ॥

अन्वयः—तत्क्षणं त्यक्तनिद्रा चंद्रमुखी हरिणी सुखं पल्यंकात् उत्थिता सुस्थिता पत्युः इति व्यजिज्ञपत्. ॥ २७८ ॥

अर्थः—तेज क्षणे निद्रा तजीने चंद्रसरखा मुखवाळी एवी ते हरिणी सुखेथी पलंगपरथी उठीने सावधान थइ थकी ( पोताना ) स्वामीने आ प्रमाणे कहेवा लागी. ॥ २७८ ॥

ममोदरे रुचां राशेरभिषेकं वितन्वती । मेरुशृंगे महालक्ष्मीः स्वप्नेऽद्य ददृशे मया ॥ २७९ ॥

अन्वयः—अद्य मया स्वप्ने मम उदरे रुचां राशेः अभिषेकं वितन्वती मेरुशृंगे महालक्ष्मीः ददृशे. ॥ २७९ ॥

अर्थः—आजे में स्वप्नमां मारा उदरमां तेजना समूहनो अभिषेक करतां. तथा मेरुपर्वतना शिखरपर रहेली एवी महालक्ष्मीने जोइ.

**अथावददद्दो नारीं किन्नरः श्रृणु सुन्दरि । सर्वोत्तमसुतोत्पत्तिसूचकः स्वप्न एष ते ॥ २८० ॥**

अन्वयः—अथ किन्नरः नारीं अदः अवदत्, (हे) सुंदरि ! श्रृणु ? एषः ते स्वप्नः सर्वउत्तमसुतउत्पत्तिसूचकः ॥ २८० ॥

अर्थः—पछी ते किन्नरे ( पोतानी ते ) स्त्रीने एम कह्युं के, हे सुंदरि ! सांभळ? आ तारुं स्वप्न सर्व प्रकारे उत्तम एवा पुत्रनी उत्पत्तिने सूचवनारुं छे. ॥ २८० ॥

**ततोऽवादीन्मुदा वाणीं हरिणी हारिणीमसौ । स्वामिन्धुतसुधावस्तु सत्यमस्तु तवोदितम् ॥ २८१ ॥**

अन्वयः-ततः असौ हरिणी मुदा हारिणीं वाणीं अवादीत्, (हे) स्वामिन् ! धुतसुधावस्तु तव उदितं सत्यं अस्तु ? ॥२८१॥

अर्थः-पछी ते हरिणी हर्षथी मनोहर वाणी बोली के, हे स्वामी ! अमृतनो पण तिरस्कार करनारुं आपनुं वचन सत्य थाओ ?

**इत्थमन्योन्यमालापसुखस्वादनमेदुरौ । देवतार्चादिसत्कृत्यं चक्रतुस्तौ प्रमोदतः ॥ २८२ ॥**

अन्वयः—इत्थं अन्योन्यं आलाप सुख स्वादन मेदुरौ तौ प्रमोदतः देवतार्चादि सत्कृत्यं चक्रतुः. ॥ २८२ ॥

अर्थः—एवीरीते परस्पर वचन सुखना स्वादथी पुष्ट थयेला एवा ते बन्ने दंपती हर्षथी देवपूजाआदिक उत्तम कार्य करवा लाग्या ॥ २८२ ॥

**गर्भानुभावतः कान्तिकीर्तिसौख्यसमृद्धिभिः । तद्गृहेऽथ मुदा सार्धं ववृधे स्पर्धयाधिकम् ॥ २८३ ॥**

अन्वयः—अथ गर्भअनुभावतः तद्गृहे कांति कीर्ति सौख्य समृद्धिभिः मुदा सार्धं स्पर्धया अधिकं ववृधे. ॥ २८३ ॥

अर्थः—पछी गर्भना प्रभावथी तेना घरमां कांति, कीर्ति, सुख अने समृद्धि हर्षनी साथे स्पर्धाथी अधिक अधिक वधवा लाग्यां.

**तृतीये मासि संपूर्णे हरिण्याः पुण्यगर्भभूः । रत्नाकरस्य पानेऽभूद्दोहदो हृदि दाहदः ॥ २८४ ॥**

अन्वयः—तृतीये मासि संपूर्णे हरिण्याः रत्नाकरस्य पाने पुण्यगर्भभूः हृदि दाहदः दोहदः अभूत् ॥ २८४ ॥

अर्थः—त्रीजो मास संपूर्ण थतां ते हरिणीने समुद्रनुं पान करवानो ते पुण्यशाली गर्भथी उत्पन्न थयेलो, अने हृदयमां चिंता करनारो दोहलो उत्पन्न थयो. ॥ २८४ ॥

अस्मिन्नपूर्यमाणेऽस्याः शोषस्तोषहरोऽजनि । अविच्छेदस्य खेदस्य सत्रं छत्रधरोऽप्यभूत् ॥ २८५ ॥

अन्वयः—अस्मिन् अपूर्यमाणे अस्याः तोषहरः शोषः अजनि, छत्रधरः अपि अविच्छेदस्य खेदस्य सत्रं अभूत्. ॥ २८५ ॥

अर्थः—ते दोहलो नही पूरावाथी तेणीने आनंदनो नाश करनारो शोष थयो, ( अर्थात् ते दुबळी पडवा लागी. ) अने तेथी ते छत्रधर किन्नर पण अत्यंत खेदना पात्ररूप थयो. ॥ २८५ ॥

ते मन्त्रतन्त्रशास्त्रज्ञाः पृष्टास्तेन सहस्रशः । न दधार धियं कश्चिदीदृग्दोहदपूरणे ॥ २८६ ॥

अन्वयः—तेन सहस्रशः ते मंत्रतंत्र शास्त्रज्ञाः पृष्टाः, ईदृग्दोहदपूरणे कश्चित् धियं न दधार. ॥२८६ ॥

अर्थः—तेणे हजारोगमे ते प्रसिद्ध एवा मंत्रतंत्रना शास्त्रोने जाणनाराओने पूछयुं, परंतु आवा प्रकारनो दोहलो संपूर्ण करवामां कोइ पण ( पोतानी ) बुद्धि चलावी शक्यो नही. ॥ २८६ ॥

कदापि क्ष्मापतेरग्रे कुतूहलकलापकम् । दर्शयन्नमुनादर्शि दिष्ट्या कोऽपीन्द्रजालकृत् ॥ २८७ ॥

अन्वयः—दिष्ट्या कदापि क्ष्मापतेः अग्रे कुतूहलकलापकं दर्शयन् कः अपि इंद्रजालकृत् अमुना अदर्शि. ॥ २८७ ॥

अर्थः-सारुं थयुं के, (एवामां) एक दिवसे ते सुबाहुराजानी पासे आश्चर्योनो समूह देखाडतो कोइक इंद्रजालीयाने तेणे दीठो. २८७

पृष्टस्तेनायमित्याह पूरयिष्यामि दोहदम् । किं च ते भविता सूनुः कोऽपि विश्वविलक्षणः ॥ २८८ ॥

अन्वयः—तेन पृष्टः अयं इति आह, दोहदं पूरयिष्यामि, किं च ते कः अपि विश्वविलक्षणः सूनुः भविता. ॥ २८८ ॥

अर्थः-तेणे पूछवाथी ते इंद्रजालिके कह्युं के, हुं ते दोहलो पूरो करीश, परंतु तने कोइक आ जगतथी विलक्षण पुत्र थवानो छे.।२८८।

गृहस्याग्रे निवेश्याथ तत्र च्छत्रधरप्रियाम् । अदीदृशदसावैन्द्रजालिको जलधिं सुधीः ॥ २८९ ॥

अन्वयः—अथ सुधीः असौ ऐंद्रजालिकः तत्र गृहस्य अग्रे छत्रधरप्रियां निवेश्य जलधिं अदीदृशत्. ॥ २८९ ॥

अर्थः-पछी उत्तम बुद्धिवाळा एवा आ इंद्रजालिके त्यां घरना आंगणामां ते छत्रधरनी स्त्रीने बेसाडीने महासागर देखाड्यो.।२८९।

उच्छलच्छोणरत्नांशुमालामग्नार्कमण्डलं । समुद्यद्बिन्दुसंदोहोपशान्तश्रान्तखेचरम् ॥ २९० ॥

माधुर्यधुर्यदुग्धोर्मिरसप्रीतसुधाशनम् । ऐन्द्रजालिकनिर्देशात्पातुं सा तं समुद्यता ॥ २९१ ॥ युग्मम् ॥

अन्वयः—उच्छलत् शोणरत्न अंशुमाला मग्न अर्क मंडलं, समुद्यत् बिंदुसंदोह उपशांत श्रांतखेचरं ॥ २९० ॥ माधुर्य धुर्य दुग्धउर्मि रस प्रीत सुधा अशनं तं ऐंद्रजालिकनिर्देशात् सा पातुं समुद्यता. ॥ २९१ ॥युग्मं॥

अर्थः—उछळता लाल रत्नोना किरणोनी श्रेणिमां बूडेलुं छे सूर्यमंडल जेमां, तथा उंचे उडता जलकणोना समूहथी शांत थयेल छे थाकेला खेचरो जेनाथी, ॥ २९० ॥ अने अतिमीठा दूधसरखा मोजांओना रसथी खुशी थयेल छे देवोजेनाथी एवा ते समुद्रने इन्द्रजालिकना कहेवाथी ते पीवा लागी. ॥ २९१ ॥ युग्मं ॥

ऐन्द्रजालिकविज्ञानप्रसादेन रसादसौ । एकेनैव तयापायि श्वासेन पयसां पतिः ॥२९२॥

अन्वयः—ऐंद्रजालिक विज्ञान प्रसादेन तया एकेन एव श्वासेन असौ पयसां पतिः रसात् अपायि. ॥ २९२ ॥

अर्थः—ते इंद्रजालिकनी कलाना प्रसादथी तेणीए एकज घुंटडामां आ महासागर रसथी ( आनंदथी ) पीधो. ॥ २९२ ॥

सा पूर्णदोहदा तूर्णमन्तःसंतोषशालिनी । मुहुरानन्दसंदर्भाद्वपुः सपुलकं दधौ ॥ २९३ ॥

अन्वयः—पूर्णदोहदा तूर्णं अंतःसंतोषशालिनी सा मुहुः आनंदसंदर्भात् सपुलकं वपुः दधौ. ॥ २९३ ॥

अर्थः—दोहलो संपूर्ण थवाथी तुरतज हृदयमां अत्यन्त खुशी थयेली ते हरिणी वारंवार आनंदना उभराथी रोमांचित शरीरने धारण करवा लागी. ॥ २९३ ॥

अथैन्द्रजालिको हर्षहारिणा छत्रधारिणा । कृतकृत्यः कृतः कृत्यविदा सर्वस्वदायिना ॥ २९४ ॥

अन्वयः—अथ हर्षहारिणा कृत्यविदा छत्रधारिणा ऐंद्रजालिकः सर्वस्वदायिना कृतकृत्यः कृतः. ॥ २९४ ॥

अर्थः-पछी अति हर्षित थयेला, तथा करेला उपकारने जाणनारा एवा ते छत्रधरे ते इंद्रजालिकने सघलुं धनआपी कृतार्थ कर्यो.।२९४।

अंगसंगतनिःशेषामुद्रसामुद्रलक्षणम् । सुतं सूते स्म कालेन साथ पाथोधिपायिनी ॥ २९५ ॥

अन्वयः—अथ पाथोधिपायिनी सा कालेन अंग संगत निःशेष अमुद्र सामुद्र लक्षणं सुतं सूतेस्म. ॥ २९५ ॥

अर्थ—पछी समुद्रपान करनारी ते हरिणीए योग्य समये प्रगटरीते शरीरमां देखातां छे सामुद्रिक लक्षणो जेनां एवा एक पुत्रने जन्म आप्यो

**पितृभ्यां निर्मितानेकमहाभ्यामहनि प्रिये । श्रीदत्त इति चक्रेऽस्य नाम स्वप्नानुमानतः ॥ २९६ ॥**

अन्वयः—निर्मित अनेक महाभ्यां पितृभ्यां प्रिये अहनि स्वप्नानुमानतः अस्य "श्रीदत्तः" इति नाम चक्रे. ॥ २९६ ॥

अर्थः—करेल छे अनेक महोत्सवो जेणे एवा माबापोए शुभदिवसे स्वप्नने अनुसारे तेनु "श्रीदत्त" एवु नाम पाड्यु. ॥२९६॥

**विकासिरक्तराजीवराजीसमकरक्रमः । अतन्द्रचन्द्रमच्छायाचौरगौरमुखच्छविः ॥ २९७ ॥**

**असावनन्यसामान्यसर्वावयववैभवः । बभौ मातृपितृ स्वान्तानन्दनो नन्दनोऽधिकम् ॥ २९८ ॥युग्मम्॥**

अन्वयः—विकासि रक्त राजीव राजी सम कर क्रमः, अतंद्र चंद्रमश्छाया चौर गौर मुख छविः ॥ २९७ ॥ अनन्य सामान्यसर्वअवयववैभवः मातृपितृस्वांतानंदनः असौ नंदनः अधिकं बभौ. ॥ २९८ ॥ युग्मं ॥

अर्थः—विकस्वर थयेलां लाल कमलोनी श्रेणिसरखा छे हाथपग जेना, तथा निर्मल चंद्रनी कांतिने चोरनारी उज्ज्वल छे मुखनी

कांति जेनी, ॥ २९८ ॥ अने अनुपम एवा सर्व प्रकारना अवयवोना वैभववाळो, तथा मातपिताना हृदयमां आनंद उपजावनारो आ पुत्र अधिक अधिक शोभवा लाग्यो. ॥ २९८ ॥ युग्मं ॥

**स क्रमादक्रमारूढगूढागूढगुणोच्चयः । अवाप कामं वामभ्रूनयनैकप्रियं वयः ॥ २९९ ॥**

अन्वयः—अक्रमारूढ गूढ अगूढ गुण उच्चयः सः क्रमात् कामं वामभ्रूनयन एक प्रियं वयः अवाप. ॥ २९९ ॥

अर्थः—एकीहारे उत्पन्न थयेल छे गुप्त तथा प्रगट गुणोनो समूह जेने एवो ते श्रीदत्त अनुक्रमे सुखेसमाधे स्त्रीओनी आंखोने प्रेम उपजावनारुं यौवन वय पाम्यो. ॥ २९९ ॥

**ईदृक्षलक्षणः क्षोणीपतिः स्यादिति लौकिकी । तत्कथा पृथिवीनाथश्रुतिगोचरतां गता ॥ ३०० ॥**

अन्वयः—ईदृक्षलक्षणः क्षोणीपतिः स्यात्, इति लौकिकी तत्कथा पृथिवीनाथ श्रुतिगोचरतां गता. ॥ ३०० ॥

अर्थः—आवां लक्षणोवाळो तो राजा थाय, एम लोकोथी बोलाती एवी आ श्रीदत्तसंबंधी कथा राजाना सांभळवामां आवी.॥३००

छन्नमेव निशामध्ये वध्यः स इति भूपतिः । भटानाह भयात्कस्य न पापे रमते मतिः ॥ ३०१ ॥

अन्वयः—छन्नं एव निशामध्ये सः वध्यः, इति भुपतिः भटान् आह, भयात् कस्य मतिः पापे न रमते? ॥ ३०१ ॥

अर्थः—गुप्तरीते रात्रिए आने ( तमारे ) मारी नाखवो, एम राजाए (पोताना) सुभटोने कही दीधुं. केमके भयथी कोनी बुद्धि पाप करवामां रमती नथी ? ॥ ३०१ ॥

ज्ञात्वेति नृपवृत्तान्तं सुकृतैरेकतो भटात् । श्रीदत्तश्छन्न एकाकी निरगान्नगरान्निशि ॥ ३०२ ॥

अन्वयः—सुकृतैः एकतः भटात् इति नृपवृत्तांतं ज्ञात्वा श्रीदत्तः छन्नः एकाकी निशि नगरात् निरगात्. ॥ ३०२ ॥

अर्थः—पुण्ययोगे कोइएक सुभटपासेथी आवी रीतनो राजानो वृत्तांत जाणीने श्रीदत्त गुप्तरीते एकलो रात्रिए नगरमांथी (बहार) निकळी गयो. ॥ ३०२ ॥

अहर्निशं निराहारविहारः सप्तभिर्दिनैः । क्षुधाक्षामोदरः श्रान्तः कान्तारं किंचिदाप सः ॥ ३०३ ॥

अन्वयः—अहर्निशं निराहारविहारः, क्षुधाक्षामोदरः श्रांतः सः सप्तभिः दिनैः किंचित् कांतारं आप. ॥ ३०३ ॥

अर्थः—रातदहाडो भोजनविना चालतो, तथा क्षुधाथी खाली उदरवाळो ते थाकेलो श्रीदत्त सात दिवसे कोइक वनमां आव्यो.

**अज्ञातद्रुमनामापि संकोचनतरोः फलान् । आस्वाद्य क्वापि सुष्वाप च्छायायां स पटीवृतः ॥ ३०४ ॥**

अन्वयः—अज्ञात द्रुमनामा अपि संकोचनतरोः फलान् आस्वाद्य सः पटीवृतः क्व अपि छायायां सुष्वाप. ॥ ३०४ ॥

अर्थः–वृक्षनु नाम जाण्याविनाज संकोचननामना वृक्षनां फळो खाइने ते श्रीदत्त शरीरपर वस्त्र ओढीने क्यांक छायामां सुइ रह्यो.

**तद्वृक्षफलमाहात्म्यात्सद्यः संकुचितांगकः । द्विपेनानेन स भवान्भुवनाधिपतिः कृतः ॥ ३०५ ॥**

अन्वयः—तद्वृक्षफलमाहात्म्यात् सद्यः संकुचितांगकः सः भवान् अनेन द्विपेन भुवनाधिपतिः कृतः. ॥ ३०५ ॥

अर्थः—ते वृक्षना फळना स्वभावथी तुरतज संकोचाइ गयेलां शरीरवाळा एवा आ तने आ हाथीए राजा बनाव्यो. ॥ ३०५ ॥

**यद्गोत्रगर्वतः साधोः पुरोऽल्पमपि चिन्तितम् । तदुत्पन्नोऽसि पुण्याढ्य किंचिन्नीचकुले किल ॥ ३०६ ॥**

अन्वयः-यत् गोत्रगर्वतः साधोः पुरः अल्पं अपि चिंतितं, तत् (हे) पुण्याढ्य ! किल किंचित् नीचकुले उत्पन्नः असि. ।।२०६।।

अर्थः--जे गोत्रना मदथी मुनिनी पासे तें जरा पण चिंतव्युं, तेथी हे पुण्याढ्य ! खरेखर कंइंक नीच कुलमां तुं उत्पन्न थयो छुं.

**शूकसंकोचिनाकर्षि शल्यं यन्मुनिलोचनात् । सममेवांगसंकोचो राज्यं चाप्यत तत्त्वया ।।३०७।।**

अन्वयः---शूकसंकोचिना त्वया मुनिलोचनात् यत् शल्यं आकार्षि, तत् समं एव अंगसंकोचः राज्यं च आप्यत. ।। ३०७ ।।

अर्थः---वळी शूगथी संकोच पामतांथकां तें ते मुनिराजनी आंखमांथी जे कांटो खेंची कहाड्यो, तेथी एकीवेळाएज तने शरीरनो संकोच तथा राज्य प्राप्त थयां. ।। ३०७ ।।

**तत्कर्मामेयफलता भवता भाविता च यत् । तदमेयमहत्त्वं ते राज्यं राजन्नराजत ।। ३०८ ।।**

अन्वयः-(हे) राजन् ! भवता यत् तत्कर्म अमेय फलता भाविता, तत् अमेयमहत्त्वं ते राज्यं अराजत. ।। ३०८ ।।

अर्थः-वळी हे राजन् ! तमोए ते कार्यनुं जे अमितफलपणुं चितव्युं, तेथी अमित महत्तावालुं तमारुं राज्य शोभवा लाग्युं. ।३०८।

कदापि क्वापि कस्यापि तवेवाद्भुतकर्मणः । पुण्यादेवेत्थमैश्वर्यं नाभवन्न भविष्यति ॥ ३०९ ॥

अन्वयः-अद्भुत कर्मणः तव इव पुण्यात् एव इत्थं ऐश्वर्य कदा अपि, क्व अपि, कस्य अपि न अभवत्, न भविष्यति. ।३०९।

अर्थः—आश्चर्यकारक कर्मवाळा एवा तमारी पेठे फक्त पुण्यथीज आवी समृद्धि कोइ पण समये, क्यांये कोइने प्राप्त थइ नथी, अने थशे पण नही. ॥ ३०९ ॥

तदितः स्पष्टदृष्टान्तान्नित्यं कर्मणि निर्मले । स्थातव्यं भवभेदात्तपौरुषैः पुरुषोत्तमैः ॥ ३१० ॥

अन्वयः--तत् इतः स्पष्टदृष्टांतात् भवभेद आत्तपौरुषैः पुरुषोत्तमैः नित्यं निर्मले कर्मणि स्थातव्यं. ॥ ३१० ॥

अर्थः—माटे आ प्रत्यक्ष उदाहरणथी संसारने तोडवामाटे बळवान थयेला उत्तम पुरुषोए हमेशां निर्मल कार्यमां तत्पर रहेवुं. ।३१०।

अथ पृथ्वीपतिः प्राह प्रभो संयच्छ संयमम् । संसारवारिधेः सेतुं केतुं धर्ममहीपतेः ॥ ३११ ॥

अन्वयः--अथ पृथ्वीपतिः प्राह, (हे) प्रभो ! संसार वारिधेः सेतुं, धर्म महीपतेः केतुं, संयमं संयच्छ ! ॥ ३११ ॥

अर्थः--पछी ते राजाए कह्युं के, हे प्रभु ! आ संसारसमुद्रने ( उल्लंघवामाटे ) पूलसरखुं, तथा धर्मरूपी राजानी जयपताकासरखुं चारित्र मने आपो ? ॥ ३११ ॥

अथाचष्ट गुरुः स्पष्टं प्रतिले खादिकर्मसु । अक्षमोऽसि क्षमाभर्तर्व्रतमस्तु कुतस्तव ॥ ३१२ ॥

अन्वयः--अथ गुरुः स्पष्टं आचष्ट, ( हे ) क्षमाभर्तः ! प्रतिलेखादिकर्मसु अक्षमः असि, तव कुतः व्रतं अस्तु. ? ॥३१२ ॥

अर्थः--त्यारे गुरुमहाराजे ( तेने ) प्रगटरीते कह्युं के, हे राजन् ! पडिलेहणआदिक कार्योमाटे तमो असमर्थ छो माटे तमोने चारित्र केम होइ शके ? ॥ ३२१ ॥

किं ते व्रतेन कष्टेन विशिष्टसुकृताश्रय । अस्मिन्नेव भवे भावी भवतो ह्यपुनर्भवः ॥ ३१३ ॥

अन्वयः--( हे ) विशिष्टसुकृताश्रय ! कष्टेन व्रतेन ते किं ? हि भवतः अस्मिन् एव भवे अपुनर्भवः भावी. ॥ ३१३ ॥

अर्थः–वळी हे उत्तम पुण्यशाली राजन्! कष्टकारी चारित्रनुं तमारे शुं प्रयोजन छे.? केमके तमोने आ भवमांज मोक्ष मळनार छे.

इत्युक्तोऽप्यस्मयः स्मेरविस्मयः सस्मितं नृपः । गुरूनुवाच किं मे स्याद् गृहिणोऽप्यपुनर्भवः ॥ ३१४ ॥

अन्वयः—इति उक्तः अपि अस्मयः स्मेरविस्मयः नृपः सस्मितं गुरून् उवाच, किं मे गृहिणः अपि अपुनर्भवः स्यात् ? ।३१४।

अर्थः--एम कह्या छतां पण गर्वरहित, तथा आश्चर्य पामेला एवा ते राजाए जरा हसीने गुरुमहाराजने कह्युं के, शुं मने गृहस्थीने पण मोक्ष संभवी शके? ॥ ३१४ ॥

अजल्पत्तपनः साधुः शृणु पुण्याढ्यभूपते । ते पञ्चदशभिर्भेदैः सिद्धाः स्युरिह तद्यथा ॥ ३१५ ॥

अन्वयः--तपनः साधुः अजल्पत्, ( हे ) पुण्याढ्य भूपते ! इह ते पंचदशभिः भेदैः सिद्धाः स्युः, तत् यथा-॥ ३१५ ॥

अर्थः-त्यारे ते तपन साधु बोल्या के, हे पुण्याढ्यभूप ! अहीं ते पंदर प्रकारना सिद्धो होय छे, अने ते नीचे मुजब जाणवा. ।३१५।

सिद्धस्तीर्थकरोऽतीर्थकरः प्रत्येकबुद्धकः । स्वलिंगः परलिंगश्च नरलिंगो नपुंसकः ॥ ३१६ ॥

तीर्थसिद्धोऽतीर्थसिद्धः स्त्रीलिंगो बुद्धबोधितः । एकसिद्धोऽनेकसिद्धः स्वयम्बुद्धो गृहो तथा ॥ ३१७ ॥

अन्वयः—तीर्थकरः, अतीर्थकरः, प्रत्येकबुद्धः, स्वलिंगः, परलिंगः, नरलिंगः, च नपुंसकः सिद्धः॥ ३१६ ॥ तीर्थसिद्धः, अतीर्थसिद्धः, स्त्रीलिंगः, बुधबोधितः, एकसिद्धः, अनेकसिद्धः, स्वयंबुद्धः, तथा गृही. ॥ ३१७ ॥ युग्मं ॥

अर्थः-तीर्थंकर, अतीर्थंकर, प्रत्येकबुद्ध, स्वलिंगे सिद्ध, परलिंगे सिद्ध, पुरुषलिंगे सिद्ध, नपुंमकलिंगे सिद्ध ॥ ३१६ ॥ तीर्थसिद्ध, अतीर्थसिद्ध, स्त्रीलिंगे सिद्ध, बुधबोधितसिद्ध, एकसिद्ध, अनेकसिद्ध, स्वयंबुद्ध, अने गृहीलिंगे सिद्ध. ॥ ३१७ ॥ युग्मं ॥

**एकस्मिन्समये जीवाः सार्धद्वीपद्वयेऽपि तु । एकमारभ्य सिध्यन्ति यावदष्टोत्तरं शतम् ॥ ३१८ ॥**

अन्वयः—सार्धद्वीपद्वये अपि तु एकस्मिन् समये एकं आरभ्य यावत् अष्टोत्तरं शतं जीवाः सिध्धयंति. ॥ ३१८ ॥

अर्थः—अढी द्वीपनी अंदरज एक समयमां एकथी मांडीने छेक एकसो आठसुधी जीवो सिद्ध थाय छे. ॥ ३१८ ॥

**सिद्धत्वे केवलज्ञानं कारणं कीर्तितं जिनैः । तत्तु कर्मक्षयादेव ध्यानात्कर्मक्षयो भवेत् ॥ ३१९ ॥**

अन्वयः—सिद्धत्वे केवलज्ञानं कारणं जिनैः कीर्तितं, तत् तु कर्मक्षयात् एव, कर्मक्षयः ध्यानात् भवेत् . ॥ ३१९ ॥

अर्थः--सिद्धपणामां केवलज्ञानने जिनेश्वरोए कारणभूत कहेलुं छे. अने ते केवलज्ञान पण कर्मोना क्षयथीज थाय छे, अने ते कर्मोनो क्षय ध्यानथी थाय छे. ॥ ३१९ ॥

**अन्तर्मुहूर्तमेकाग्रचिन्ता ध्यानमिदं पुनः । आर्त्तं रौद्रं च धर्म्यं च शुक्लं चेति चतुर्विधम् ॥ ३२० ॥**

अन्वयः—अंतर्मुहूर्तं एकग्रचिंता ध्यानं, इदं पुनः आर्त्तं, च रौद्रं, च धर्म्यं, च शुक्लं इति चतुर्विधं. ॥ ३२० ॥

अर्थः–अंतर्मुहूर्तसुधी एकाग्रपणे जे चिंतन करवुं, ते ध्यान कहेवाय, वळी ते आर्त्त, रौद्र, धर्म्य अने शुक्ल एम चार प्रकारनुं छे.।३२०।

**ऋतमित्युच्यते दुःखं तस्मादेतद्भवेदिति । आर्तं विदुरिदं ध्यानं तदप्युक्तं चतुर्विधम् ॥ ३२१ ॥**

अन्वयः—ऋतं इति दुःखं उच्यते, तस्मात् एतद् भवेत्, इति इदं आर्त्तं ध्यानं विदुः, तत् अपि चतुर्विधं उक्तं. ॥ ३२१ ॥

अर्थः—ऋत एटले दुःख कहेवाय छे, अने तेथी आ थाय छे, माटे तेने आर्त्तध्यान कहेलुं छे, वळी ते आर्त्तध्यान पण चार प्रकारनुं कह्युं छे. ॥ ३२१ ॥

**इन्द्रियाप्रियवस्तूनां प्राप्तौ या दुःखतो भवेत् । अतीवविरहातीवोच्छेदचिन्तेदमादिमम् ॥ ३२२ ॥**

अन्वयः—इंद्रिय अप्रियवस्तूनां प्राप्तौ दुःखतः या अतीव विरह अतीव उच्छेद चिंता भवेत् इदं आदिमं. ॥ ३२२ ॥

अर्थः—इंद्रियोने न गमे एवा पदार्थो मळते छते, दुःखथी एम चितववुं के, हवे आ अनिष्ठ पदार्थो माराथी तुरत दूर थाय, अने ते पदार्थोनो अत्यंत विनाश थाय तो ठीक, एवी जे चिंता तेने पहेलुं " आर्त्तध्यान " जाणवुं. ॥ ३२२ ॥

**द्वितीयं रुजि सत्यां तत्प्रतीकारैकचेतसः । तद्विप्रयोगतदसंप्रयोगातीवचिन्तनम् ॥ ३२३ ॥**

अन्वयः—रुजि सत्यां तत्प्रतीकारकचेतसः तद्विप्रयोग तत् असंप्रयोग अतीवचिंतनं द्वितीयं. ॥ ३२३ ॥

अर्थः-रोग थये छते तेने मटाडवाना उपायोमांज एकाग्रमनवाळा मनुष्यनुं ते रोगना अत्यंत वियोगमाटे तथा असंप्रयोग एटले फरीने पाछो न थवा माटे जे अत्यंत चिंतवन, तेने बीजुं आर्त्तध्यान जाणवुं. ॥ ३२३ ॥

**तृतीयं त्विष्टविषयप्राप्तौ संहृष्टचेतसः । चिन्ता तदवियोगे च तत्संगे च महास्पृहा ॥ ३२४ ॥**

अन्वयः—इष्ट विषय प्राप्तौ संहृष्ट चेतसः तदवियोगे चिंता, च तत्संगे च महास्पृहा, तु तृतीयं ॥ ३२४ ॥

अर्थः—वांछित पदार्थोनी प्राप्तिथी आनंदित थयेला मनवाळो एम चिंतवे के, हवे मने आ इष्ट पदार्थोनो वियोग न थाय तो ठीक, तेमज ते पदार्थोना मेलाप माटे अत्यंत इच्छा धरावे, तेने त्रीजुं आर्त्तध्यान जाणवुं. ॥ ३२४ ॥

**तुर्यं च चक्रिशक्रादिगुणर्द्धिप्रार्थनामयम् । निदानमधमं ज्ञानकणिकामप्यबिभ्रतः ॥ ३२५ ॥**

अन्वयः—ज्ञानकणिकां अपि अबिभ्रतः चक्रि शक्रादि गुण ऋद्धि प्रार्थनामयं अधमं निदानं तुर्यं. ॥ ३२५ ॥

अर्थः—लेशमात्र पण ज्ञानविनाना मनुष्यनुं चक्रवर्ति तथा इंद्रआदिकना गुणोनी तथा तेमनी समृद्धिनी इच्छावाळुं जे अधम नियाणुं तेने चोथुं आर्त्तध्यान जाणवुं. ॥ ३२५ ॥

**हिंसादिक्रूरतायुक्तं रौद्रमाहुस्तदुद्भवम् । ध्यानमप्युच्यते रौद्रं चतुर्धा तदपीरितम् ॥ ३२६ ॥**

अन्वयः—हिंसा आदि क्रूरता युक्तं रौद्रं आहुः, तद् उद्भवं ध्यानं अपि रौद्रं उच्यते, तत् अपि चतुर्धा ईरितं. ॥ ३२६ ॥

अर्थः—जीवहिंसा आदिकना क्रूरपणावाळुं रौद्र कहेवाय, अने तेथी उत्पन्न थयेलुं ध्यान पण रौद्रध्यान कहेवाय, अने तेपण चार प्रकारनुं कह्युं छे. ॥ ३२६ ॥

**वधबन्धननिर्दाहांकनमारणकर्मणाम् । जीवेषु प्रणिधानं यन्निर्दयस्य तदादिमम् ॥ ३२७ ॥**

अन्वयः—निर्दयस्य जीवेषु वध बंधन निर्दाह अंकन मारण कर्मणां यत् प्रणिधानं तत् आदिमं. ॥ ३२७ ॥

अर्थः—निर्दय माणसनुं जीवो प्रते वध, बंधन, दाह, अंकन, तथा ताडनमाटे जे एकाग्र चिंतवन, तेने पेहेलुं ( हिंसानु बंधी ) "रौद्रध्यान" जाणवुं. ॥ ३२७ ॥

**द्वितीयं त्वतिसंधानसनिर्बंधस्य मायिनः । असद्भूतभूतघातिकूटवाक्प्रणिधामयम् ॥ ३२८ ॥**

अन्वयः—अतिसंधान सनिर्बंधस्य मायिनः असद्भूत भूत घाति कूटवाक् प्रणिधामयं तु द्वितीयं. ॥ ३२८ ॥

अर्थः-जूठाणुं गोठववा माटेनाज आग्रहवाळा एवा कपटी माणसनुं नही बनेला तथा जेथी जीवहिंसा थाय एवां खोटां वचनोनी

प्रपंचजाळ रचवानुं जे चिंतवन, तेने बीजुं (मृषानुबंधी) रौद्रध्यान जाणवुं. ॥ ३२८ ॥

तृतीयं त्वतिदुष्टस्य भूरिलोभक्रुधाहृदः । भूतघातपरद्रव्यापहारप्रणिधामयम् ॥ ३२९ ॥

अन्वयः—अतिदुष्टस्य भूरिलोभक्रुधाहृदः भूतघात परद्रव्य अपहार प्रणिधामयं तु तृतीयं. ॥ ३२९ ॥

अर्थः—अत्यंत क्रूर तथा अति लोभ अने क्रोधयुक्त मनवाळा मनुष्यनुं जीवहिंसा करीने पण परधनने हरवाना विचारवाळुं जे चिंतवन तेने त्रीजुं ( चौरानुबंधि ) रौद्रध्यान जाणवुं. ॥ ३२९ ॥

शब्दादिविषयापूर्तिहेतुषु द्रविणेषु यत् । लब्धिसंग्रहसंरक्षाप्रणिधा तत्तुरीयकम् ॥ ३३० ॥

अन्वयः—शब्द आदि विषय आपूर्ति हेतुषु द्रविणेषु यत् लब्धि संग्रह संरक्षा प्रणिधा तत् तुरीयकं ॥ ३३० ॥

अर्थः—शब्दआदिक इन्द्रियोना विषयोने पूरा पाडवाना कारणरुप एवा धनना संबधमां, तेने मेळववा माटे, तेनो संग्रह करवा माटे, तथा तेना रक्षण माटे जे चिंतववुं, तेने चोथुं (परिग्रह रक्षणानुबंधी रौद्रध्यान जाणवुं. ॥ ३३० ॥

उत्पद्यमानमप्येतद् द्वयं वार्यं शुभाशयैः । उपेक्षितं प्रमादात्तु महादुःखाय जायते ॥ ३३१ ॥

अन्वयः—शुभाशयैः एतद् द्वयं उत्पद्यमानं अपि वार्यं, प्रमादात् उपेक्षितं तु महादुःखाय जायते. ॥ ३३१ ॥

अर्थः—उत्तम विचारवाळा मनुष्योए ते आर्त्त अने रौद्रनामना बन्ने ध्यानोने उत्पन्न थतांज अटकाववां, कदाच प्रमादथी जो तेनी उपेक्षा करी, तो ते अति कष्ट आपनारां थाय छे. ॥ ३३१ ॥

धर्माद्यदनपेतं तद्धर्म्यं तत्तु चतुर्विधं । आद्यं तत्र जिनाज्ञायाः पालनं तत्त्वनिश्चयात् ॥ ३३२ ॥

अन्वयः—धर्मात् यत् अनपेतं तत् धर्म्यं, तत् तु चतुर्विधं, तत्र तत्त्वनिश्चयात् जिनाज्ञायाः पालनं आद्यं. ॥ ३३२ ॥

अर्थः—धर्मथी जे रहित न होय तेने धर्म्यध्यान ( जाणवुं. ) ते पण चार प्रकारनुं छे, तेमां तत्वोनो निश्चय करवा पूर्वक जिनेश्वरप्रभुनी आज्ञानुं जे पालवुं, तेने पहेलुं धर्म्यध्यान जाणवुं. ॥ ३३२ ॥

कषायविषयापायत्राणचिन्ता द्वितीयकं । तृतीयं चिन्त्यते कर्मविपाकश्च शुभाशुभः ॥ ३३३ ॥

अन्वयः—कषाय विषय अपाय त्राण चिंता द्वितीयकं, च शुभअशुभः कर्मविपाकः चिंत्यते तृतीयं. ।। ३३३ ।।

अर्थः—कषायो अने विषयोरूपी शत्रुओथी ( आत्माना ) रक्षण माटेनुं जे चिंतवन, तेने बीजुं धर्म्यध्यान जाणवुं, तथा कर्मोना सारा नरसा विपाकने चिंतववारूप त्रीजुं धर्म्यध्यान जाणवुं. ।। ३३३ ।।

**उत्पत्तिविगमध्रौव्यस्वरूपस्य नराकृतेः । अनाद्यन्तस्य लोकस्य चिन्तनं तच्चतुर्थकम् ॥ ३३४ ॥**

अन्वयः—उत्पत्ति विगम ध्रौव्य स्वरूपस्य नराकृतेः अनाद्यंतस्य लोकस्य चिंतनं, तत् चतुर्थकं ।। ३३४ ।।

अर्थः—उत्पत्ति, विनाश अने निश्चलताना स्वरूपवाळा, पुरुषसरखी आकृतिवाळा, तथा अनादि अनंत एवा लोकनुं जे चिंतवन, तेने चोथुं धर्म्यध्यान कहेलुं छे. ।। ३३४ ।।

**अन्यथा वा चतुर्धोक्तं धर्म्यध्यानमिदं बुधैः । पिण्डस्थं च पदस्थं च रूपस्थं रूपवर्जितं ॥ ३३५ ॥**

अन्वयः—वा अन्यथा बुधैः इदं धर्म्यध्यानं चतुर्धा उक्तं, पिंडस्थं, पदस्थं, रूपस्थं च रूपवर्जितं. ।। ३३५ ।।

अर्थः—अथवा बीजी रीते पण विद्वानोए आ धर्म्यध्यान चार प्रकारनु कह्युं छे, पिंडस्थ, पदस्थ, रूपस्थ, अने रूपातीत. ।३३५।

**देहस्थं ध्वस्तकर्माणं चन्द्राभं ज्ञानिनं सुधीः । यत्रात्मानं परैश्वर्यं पश्येत्पिण्डस्थमत्र तत् ॥ ३३६ ॥**

अन्वयः—यत्र सुधीः आत्मानं देहस्थं, ध्वस्तकर्माणं, चंद्राभं, ज्ञानिनं परैश्वर्यं पश्येत्, तत् अत्र पिंडस्थं ॥ ३३६ ॥

अर्थः—ज्यां उत्तम बुद्धिवाळो माणस आत्माने शरीरमां रहेलो, नष्ट थयेल कर्मोवाळो, चंद्रसरखो ( निर्मल ) ज्ञानयुक्त, अने परम समृद्धिवाळो जुए छे, तेने अहीं पिंडस्थ ध्यान ( कहे छे ) ३३६ ॥

**मन्त्राक्षराणि शारीरपद्मपत्रेषु चिन्तयेत् । गुर्वादेशेन यद्योगी पदस्थं तदिहोच्यते ॥ ३३७ ॥**

अन्वयः—योगी गुर्वादेशेन शारीरपद्मपत्रेषु यत् मंत्र अक्षराणि चिंतयेत्, तत् इह पदस्थं उच्यते. ॥ ३३७ ॥

अर्थः—योगी गुरुनी आज्ञाथी शरीरसंबंधि कमलपत्रोपर जे मंत्रसंबंधि अक्षरोने चिंतवे, ते अहीं पदस्थ ध्यान कहेवाय छे. ॥

**सप्रातिहार्यं समवसृतिस्थं ज्ञानिनं जिनम् । तद्बिम्बं वा स्मरेद्योगी यत्तद्रूपस्थमिष्यते ॥ ३३८ ॥**

अन्वयः—सप्रातिहार्यं, समवसृतिस्थं, ज्ञानिनं जिनं, वा तद्बिंबं योगी यत् स्मरेत्, तत् रूपस्थं इष्यते. ॥ ३३८ ॥

अर्थः—प्रतिहारसहित, समवसरणमां बेठेला अने ज्ञानी एवा जिनेश्वरने अथवा तेमनी प्रतिमाने योगी जे चिंतवे, ते रूपस्थ ध्यान कहेवाय छे. ॥ ३३८ ॥

**यदमूर्तं महानन्दमयं सिद्धं निरञ्जनम् । ध्यायेद्योगी परात्मानं रूपातीतं दिशन्ति तत् ॥ ३३९ ॥**

अन्वयः-अमूर्तं, महानंदमयं, सिद्धं, निरंजनं परात्मानं योगी यत् ध्यायेत्, तत् रूपातीतं दिशंति. ॥ ३३९ ॥

अर्थः—निराकार, महा आनंदमय, सिद्ध, अने निरंजन एवा परमात्माने योगी जे ध्यान धरे, तेने रूपातीत ध्यान कहे छे. ॥

**एवं संक्षेपतः प्रोक्तं धर्मध्यानं धराधिप । इह लोकेऽपि माहात्म्यमस्यानन्तं सतां भवेत् ॥ ३४० ॥**

अन्वयः-(हे) धराधिप ! एवं संक्षेपतः धर्मध्यानं प्रोक्तं, सतां इह लोके अपि अस्य माहात्म्यं अनंतं भवेत् . ॥ ३४० ॥

अर्थः—हे राजन् ! एवी रीते संक्षेपथी धर्मध्याननुं स्वरूप कह्युं, उत्तम माणसोने आ लोकमां पण (लब्धिआदिकरूपे) तेनो

अनंतो प्रभाव जोवामां आवे छे. ॥ ३४० ॥

दुःकर्मनिर्मितामुच्चैः शुचं क्लमयतीत्यदः । शुक्लमादिश्यते ध्यानं तदपि स्याच्चतुर्विधम् ॥ ३४१ ॥

अन्वयः—दुःकर्मनिर्मितां शुचं उच्चैः क्लमयति, इति अदः शुक्लं ध्यानं आदिश्यते, तत् अपि चतुर्विधं स्यात्. ॥ ३४१ ॥

अर्थः—दुष्कार्यथी थयेला शोकनो जे अत्यंत विनाश करे, तेने आ "शुक्लध्यान" कहेवामां आवे छे, अने तेपण चार प्रकारनुं छे.

पृथक्त्वेऽपि पदार्थानामनुमानविचारतः । श्रुते पदे पदार्थस्याऽदृष्टस्यापि स्वरूपधीः ॥ ३४२ ॥

दृष्टे पदार्थे विज्ञानं पदस्याप्यश्रुतस्य यत् । स्यात्पृथक्त्ववितर्केण सविचारं तदादिमं ॥ ३४३ ॥ युग्मं॥

अन्वयः—अनुमान विचारतः पदार्थानां पृथक्त्वे अपि पदे श्रुते अदृष्टस्य अपि पदार्थस्य स्वरूपधीः ॥ ३४२ ॥ पदार्थे दृष्टे अश्रुतस्य पदस्य अपि यत् विज्ञानं, तत् आदिमं पृथक्त्व वितर्केण सविचारं स्यात्. ॥ ३४३ ॥ युग्मं ॥

अर्थः—अनुमानथी विचारतां पद अने अर्थ भिन्न होवा छतां पण, पदने सांभळतांज नही जोयेला एवा पण ते पदना अर्थनुं

जे ज्ञान थवुं, ॥ ३४२ ॥ तेमज पदना अर्थने देखतांज नही सांभळेला एवा पण पदनुं जे ज्ञान थवुं, तेने पहेलुं " पृथक्त्ववितर्क सविचार " नामनुं शुक्लध्यान कहे छे. ॥ ३४३ ॥ युग्मं ॥

दद्च्छब्दार्थयोरैक्यपरिज्ञानं वितर्कतः । अपृथक्त्वविचारेण मनानैश्चल्यकारणं ॥ ३४४ ॥

पूर्वश्रुतानुसारोत्थं केवलज्ञानहेतुकं । तद्द्वैतीयीकमेकत्ववितर्कमविचारकं ॥ ३४५ ॥ युग्मं ॥

अन्वयः—वितर्कतः शब्दअर्थयोः ऐक्यपरिज्ञानं ददत्, अपृथक्त्वविचारेण मनोनैश्चल्य कारणं ॥ ३४४ ॥ पूर्वश्रुतानुसारोत्थं केवलज्ञानहेतुकं, तत् द्वैतीयीकं एकत्व वितर्क अविचारकं ॥ ३४५ ॥ युग्मं ॥

अर्थः—वितर्कथी शब्द तथा अर्थ बन्ने एकज छे, एवुं ज्ञान आपनारुं, एटले ते बन्नेना अभिन्नपणाना विचारथी मनने निश्चल करवाने कारणभूत ॥ ३४४ ॥ पूर्वोना ज्ञानने अनुसारे ( अर्थात् पूर्वधारीने ) उत्पन्न थयेलुं, अने केवलज्ञानना हेतुरूप, एवुं जे शुक्लध्यान, तेने बीजुं " एकत्ववितर्क अविचार " नामनुं कहेलुं छे. ॥ ३४५ ॥ युग्मं ॥

निरुद्धे वाङ्मनोयोगयुगे केवलिनः प्रभोः । यद्भवत्यङ्गयोगेऽर्धनिरुद्धे मुक्तिकालतः ॥ ३४६ ॥

श्वासोच्छ्वासक्रिया सूक्ष्मा यत्र यन्न निवर्तते । तृतीयं कथ्यते सूक्ष्मक्रियं तदनिवर्तकं ॥३४७॥ युग्मं॥

अन्वयः—केवलिनः प्रभोः मुक्तिकालतः वाङ्मनः योग युगे निरुद्धे, अंगयोगे अर्धनिरुद्धे यत् भवति, ॥ ३४६ ॥ यत्र श्वासोच्छ्वासक्रिया सूक्ष्मा, यत् न निवर्तते, तत् तृतीयं अनिवर्तकं सूक्ष्मक्रियं कथ्यते. ॥ ३४७ ॥

अर्थः—केवली भगवानने मोक्ष समये वचन अने मनना, एम ते बन्नेना योगने रोध्याबाद, अने अर्धो काययोग रोध्ये छते जे थाय छे, ॥ ३४६ ॥ तथा जेमां श्वासोश्वासनी क्रिया सूक्ष्म चालती होय, तथा जे पाछुं निवृत्त थतुं नथी, एटले चालयुं जतुं नथी तेने त्रीजुं " अनिवर्तक सूक्ष्मक्रिय " शुक्लध्यान कहे छे. ॥ ३४७ ॥ युग्मं ॥

अङ्गत्यागेऽपि यत्रात्मा शैलेशीकरणस्थितः । ईशः शैल इवात्मीयमङ्गरूपं न मुंचति ॥ ३४८ ॥

मुक्त्युत्पातक्षणे मुक्तश्वासोच्छ्वासादिकक्रियम् । अनिवर्ति च यत्तस्यात्तुर्यं व्युपरतक्रियम् ।३४९। युग्मं।

अन्वयः—अंगत्यागे अपि यत्र आत्मा शैलेशीकरणस्थितः, शैल इव ईशः आत्मीयं अंगरूपं न मुंचति ॥ ३४८ ॥ मुक्तश्वासोच्छवासादिकक्रियं, च यत् अनिवर्ति स्यात्, तत् तुर्यं व्युपरतक्रियं ॥ ३४९ ॥ युग्मं ॥

अर्थः—शरीरनो त्याग कर्या छतां पण ज्यां आत्मा शैलेशीकरणमां रहेलो छे, एटले के पर्वतनी पेठे अचल (समर्थ) थइ पोताना अंगस्वरूपने छोडतो नथी, ॥ ३४८ ॥ तथा जेमां श्वासोश्वासआदिकनी क्रिया छोडाइ गइ छे, अने जे पाछुं चालयुं जतुं नथी, तेने चोथुं "व्युपरतक्रिय" नामनुं शुक्लध्यान कहे छे. ॥ ३४९ ॥ युग्मं ॥

आत्मप्रकाशकैवल्यरूपं कर्मक्षयोदितम् । केवलज्ञानकाले स्याध्ध्यानं शुक्लं तु योगिनः ॥ ३५० ॥

अन्वयः—आत्मप्रकाशकैवल्यरूपं, कर्मक्षयउदितं शुक्लं ध्यानं तु योगिनः केवलज्ञानकाले स्यात्. ॥ ३५० ॥

अर्थः—केवल आत्मज्योतिमय, अने कर्मोना क्षयथी उत्पन्न थयेलुं शुक्ल ध्यान तो योगीने केवलज्ञान समये थाय छे. ॥ ३५० ॥

एतध्ध्यानं स्वतो जातं सद्‌गुरोर्वोपदेशतः । वज्रऋषभनाराचदेहस्यैव स्थिरं भवेत् ॥ ३५१ ॥

अन्वयः—स्वतः, वा सद्गुरोः उपदेशतः जातं एतत् ध्यानं वज्रऋषभनाराचदेहस्य एव स्थिरं भवेत्. ॥ ३५१ ॥

अर्थः—पोतानी मेळे, अथवा सद्गुरुना उपदेशथी थयेलुं एवुं आ ध्यान वज्रऋषभनाराच संघयणवाळा मनुष्यनेज स्थिर थाय छे

इदं स्थिरत्वमापन्नं कृत्वा कर्मक्षयं क्षणात् । जनयेत्केवलज्ञानं योगीन्द्रस्य शिवप्रदम् ॥ ३५२ ॥

अन्वयः—स्थिरत्वं आपन्नं शिवप्रदं इदं क्षणात् कर्मक्षयं कृत्वा योगींद्रस्य केवलज्ञानं जनयेत्. ॥ ३५२ ॥

अर्थः—स्थिरपणाने पामेलुं, अने मोक्ष देनारुं आ शुक्लध्यान क्षणवारमां कर्मोनो क्षय करीने महान् योगीने केवलज्ञान उत्पन्न करे छे.

तत्पुण्याढ्य गृहस्थोऽपि ध्यानस्यामुष्य योगतः । केवलज्ञानमासाद्य सद्यः सिद्धो भविष्यसि ॥३५३॥

अन्वयः—तत् ( हे ) पुण्याढ्य ! गृहस्थः अपि अमुष्य ध्यानस्य योगतः केवलज्ञानं आसाद्य सद्यः सिद्धः भविष्यसि. ॥३५३॥

अर्थः—माटे हे पुण्याढ्य ! ( तुं ) गृहस्थ छतां पण आ ध्यानना योगथी केवलज्ञान पामीने तुरत सिद्ध थइश. ॥ ३५३ ॥

तत्रेदं श्रृण्वभिज्ञानमभिज्ञजनमण्डनम् । संकोचदूषणं तेऽङ्गादुत्तरिष्यति सर्वथा ॥ ३५४ ॥

अन्वयः—तत्र अभिज्ञजनमंडनं इदं अभिज्ञानं शृणु ? ते अंगात् संकोचदूषणं सर्वथा उत्तरिष्यति. ।। ३५४ ।।

अर्थः—वळी ते सबंधमां डाह्या माणसोने शोभावनारुं (तने) जे एंधाण मळशे, ते सांभळ ? तारां शरीरपरथी (हाथ पगोना) संकोचनुं दूषण बिलकुल दूर थशे. ।। ३५४ ।।

**तर्हि देहि गृहस्थानामेव धर्मं मम प्रभो । इत्युक्तो भूभुजा सूरिः श्रद्धापूरितचेतसा ॥ ३५५ ॥**

**तस्मिंस्तदैव सम्यक्त्वं द्वादशव्रतभूषितम् । विधिनारोपयामास प्रकाशितमहोत्सवे ॥ ३५६ ॥ युग्मम् ॥**

अन्वयः—तर्हि ( हे ) प्रभो ! मम गृहस्थानां एव धर्मं देहि ? इति श्रद्धापुरितचेतसा भूभुजा उक्तः सूरिः ।। ३५५ ।। तदा एव प्रकाशितमहोत्सवे तस्मिन् द्वादशव्रतभूषितं सम्यक्त्वं विधिना आरोपयामास. ।। ३५६ ।। युग्मं ।।

अर्थः—त्यारे हे स्वामी ! मने गृहस्थोनोज धर्म आपो ? एवी रीते श्रद्धायुक्त मनवाळा (ते) राजाए कहेवाथी (ते) मुनिराजे ।।३५५।। तेज वखते करेल छे महोत्सव जेणे एवा ते राजाने बार व्रतोथी अलंकृत थयेलुं सम्यक्त्व विधिपूर्वक समर्पण कर्युं. ३५६

व्रतानां सेवने शिक्षां दक्षायास्मै प्रदाय सः । सद्गुरुर्ज्ञापयामास विशेषादिति तं नृपम् ॥ ३५७ ॥

अन्वयः--सः सद्गुरुः अस्मै दक्षाय व्रतानां सेवने शिक्षां प्रदाय, तं नृपं विशेषात् इति ज्ञापयामास. ॥ ३५७ ॥

अर्थः--( पछी ) ते उत्तम गुरुमहाराजे ते चतुर राजाने ( बारे ) व्रतोना पालन माटे शिखामण आपीने विशेष प्रकारे एम जणाव्युं के, ॥ ३५७ ॥

अयं सम्यक्त्वतत्त्वज्ञोऽवधिज्ञाननिधिर्गजः । अबन्धनीयो धर्मात्मा धर्मबान्धवतां गतः ॥ ३५८ ॥

अन्वयः--सम्यक्त्वतत्त्वज्ञः, अवधिज्ञाननिधिः, धर्मात्मा, धर्मबांधवतां गतः अयं गजः अबंधनीयः. ॥ ३५८ ॥

अर्थः--सम्यक्त्वना तत्वने जाणनारो, अवधिज्ञाननो भंडार, धर्मात्मा, तथा (तारा) धर्मबंधुपणाने प्राप्त थयेलो आ हाथी तारे बांधवो नही. ॥ ३५८ ॥

सिन्धुरोऽयमबद्धोऽपि न किंचित्पीडयिष्यति । यद् द्वितीये भवे स्वर्गी सप्तमे सिद्धिसौख्यभाक् ॥३५९॥

अन्वयः—अबद्धः अपि अयं सिंधुरः किंचित् न पीडयिष्यति, यत् द्वितीये भवे स्वर्गी, सप्तमे सिद्धिसौख्यभाक् ॥ ३५९ ॥

अर्थः—बंधनरहित छतां पण आ हाथी कंइ पीडा उपजावशे नही, केमके ते (अहींथी) बीजे भवे देव, तथा सातमे भवे मोक्षसुख पामशे.

अतः सुकृतकार्येषु निःशेषनिजदोषहृत् । न शोच्यः पशुरूपोऽपि भूप चिद्रूपचेतनः ॥ ३६० ॥

अन्वयः—अतः ( हे ) भूप ! सुकृतकार्येषु निःशेषनिजदोषहृत् पशुरूपः अपि चिद्रूपचेतनः ( अयं ) न शोच्यः. ॥ ३६० ॥

अर्थः—माटे हे राजन् ! पुण्यना कार्योमां पोताना सर्व दोषोने दूर करनारा, अने पशुरूप होवा छतां पण ज्ञानी एवा आ हाथी-माटे तमारे ( जरा पण नुकशान संबंधी ) फिकरचिंता करवी नही. ॥ ३६० ॥

तथेति प्रतिपद्याथ कर्मोन्माथकथामिमाम् । गुरुं नत्वा नृपो धर्मवासः स्वावासमासदत् ॥ ३६१ ॥

अन्वयः—अथ धर्मवासः नृपः कर्मोन्माथकथां इमां तथा इति प्रतिपद्य गुरुं नत्वा स्वआवासं आसदत्. ॥ ३६१ ॥

अर्थः—पछी धर्मनी वासनावाळो ( ते ) राजा कर्मोनो नाश करनारी आ कथाने सत्यरूपे स्वीकारीने, गुरुमहाराजने वंदन करी

पोताना मेहेलमां आव्यो. ॥ ३६१ ॥

राजा कुञ्जरराजस्य गुर्वाज्ञाराजितस्ततः । बन्धारोहणयुद्धादिबाधावारमवारयत् ॥ ३६२ ॥

अन्वयः—गुर्वाज्ञाराजितः राजा ततः कुंजरराजस्य बंध आरोहण युद्धआदि बाधावारं अवारयत्. ॥ ३६२ ॥

अर्थः—गुरुमहाराजनी आज्ञाथी शोभता एवा ते राजाए त्यारथी ते गजराज माटे बंधन, स्वारी, तथा लडाइ आदिकनी पीडानो समूह निवारण कर्यो, ( अर्थात् तेने ते सर्व क्रियाओथी मुक्त कर्यो ) ॥ ३६२ ॥

नृपतिर्द्विपनाथस्य स्वस्येवास्य व्यधापयत् । नित्यं भोगभृतस्य त्रीन्वारानारात्रिकक्रियाः ॥ ३६३ ॥

अन्वयः—स्वस्य इव नित्यं भोगभृतस्य अस्यद्विपनाथस्य नृपतिः त्रीन् वारान् आरात्रिकक्रियाः व्यधापयत्. ॥ ३६३ ॥

अर्थः—पोतानीपेठे हमेशां खवरावी पीवरावीने ते हस्तिराजनी राजा त्रण वखत आरती उतारवानी क्रिया कराववा लाग्यो.।३६३।

चलन्पदात्पदान्मन्दं स जन्तुकृपया द्विपः । तन्मन्दगतयोऽद्यापि तत्क्रमेणैव वारणाः ॥ ३६४ ॥

अन्वयः—सः द्विपः जंतुकृपया पदात् पदात् मंदं चलन्, तत् अद्य अपि तत्क्रमेण एव वारणाः मंदगतयः ॥ ३६४ ॥

अर्थः—ते हाथी पण जीवदया माटे धीमा धीमा पगलांथी चालतो हतो, अने तेथी आजे पण तेने अनुसारीनेज हाथीओ धीमी गतिवाळा ( देखाय छे. ) ॥ ३६४ ॥

मर्यादायन्विताहारविहारो विदधेऽन्वहम् । शमजातमनःशैत्यः स चैत्यपरिपाटिकाम् ॥ ३६५ ॥

अन्वयः—मर्यादा यंत्रित आहार विहारः, शम जात मनः शैत्यः सः अन्वहं चैत्यपरिपाटिकां विदधे. ॥ ३६५ ॥

अर्थः—मर्यादावडे नियमित करेल छे भोजन अने हरवुं फरवुं जेणे, तथा शांतिथी जेना हृदयमां शीतलता थयेली छे, एवो ते हाथी हमेशां जिनमंदिरोनी यात्रा करतो हतो. ॥ ३६५ ॥

द्विपः स पर्वसूद्दगर्वधर्मकर्मा विनिर्ममे । साधुश्राद्धौघमध्यस्थो जिनयात्रोत्सवादिकम् ॥ ३६६ ॥

अन्वयः—उद्दगर्वधर्मकर्मा सः द्विपः साधुश्राद्धओघमध्यस्थः पर्वसु जिनयात्रा उत्सवआदिकं विनिर्ममे. ॥ ३६६ ॥

अर्थः—होंसेहोंसे धर्मकार्य करनारो ते हाथी साधुओ तथा श्रावकोना समूहमां रहीने पर्वोने दिवसे जिनेश्वर प्रभुनी यात्रा तथा उत्सवआदिक करवा लाग्यो. ॥ ३६६ ॥

इत्येष करिणामिन्द्रः करुणामुद्रिताशयः । समयान्गमयामास बहून्राज्ञा बहूकृतः ॥ ३६७ ॥

अन्वयः—करुणामुद्रिताशयः, राज्ञा बहूकृतः एषः करिणां इंद्रः इति बहून् समयान् गमयामास. ॥ ३६७ ॥

अर्थः—दयायुक्त छे (मननो) अभिप्राय जेनो, तथा राजाथी बहु सन्मान पामेलो आ हस्तिराज घणो समय व्यतीत करवा लाग्यो.

अन्येद्युर्गजवैद्यस्तं गजमस्तंगतोद्यमम् । वीक्ष्य ज्वरभराक्रांतं राज्ञे व्यज्ञपयद्द्रुतं ॥३६८॥

अन्वयः—अन्येद्युः गजवैद्यः अस्तंगत उद्यमं तं ज्वर भराक्रांतं वीक्ष्य द्रुतं राज्ञे व्यज्ञपयत्. ॥ ३६८ ॥

अर्थः—(पछी) एक दिवसे गजवैद्ये उद्यमरहित थयेला ते हाथीने ताव चडवाथी पीडातो जोइ तुरत राजाने ते हकीकत जाहेर करी.

गजन् राजति यो युष्मज्जीवितस्यापि जीवितम् । कुम्भी रिपुयशःशुम्भी सोऽभवज्ज्वरजर्जरः ॥ ३६९ ॥

अन्वयः—(हे) राजन् ! युष्मत् जीवितस्य अपि जीवितं, रिपुयशःकुंभी यः कुंभी राजति, सः ज्वरजर्जरः अभवत्. ।।३६९।।

अर्थः—हे राजन् ! आपना जीवितना पण जीवित सरखो, (अर्थात् जीवथी पण वहालो) तथा शत्रुओना यशनो नाश करनारो, जे हाथी शोभे छे, ते तावथी पीडित थयेलो छे. ।। ३६९ ।।

**ततः पितुरिव भ्रातुरिव मातुरिव ज्वरम् । आकर्ण्य व्याकुलोऽभ्यर्णे गजस्य स ययौ नृपः ॥ ३७० ॥**

अन्वयः—ततः पितुः इव, भ्रातुः इव, मातुः इव गजस्य ज्वरं आकर्ण्य व्याकुलः सः नृपः अभ्यर्णे ययौ. ।। ३७० ।।

अर्थः—पछी पिताने जेम, भाइने जेम, तथा माताने जेम, तेम ते हाथीने ताव आवेलो सांभळीने गभरायेलो ते राजा (तेनी) पासे गयो.

**अथाह पृथिवीजानिर्यः कुर्यान्नीरुजं गजम् । दद्यामद्यात्मनस्तस्मै राज्यार्धं राज्यमेव वा ॥ ३७१ ॥**

अन्वयः—अथ पृथिवीजानिः आह, यः गजं नीरुजं कुर्यात्, तस्मै अद्य आत्मनः राज्य अर्धं वा राज्यं एव दद्यां. ।। ३७१ ।।

अर्थः—पछी राजाए कह्युं के, जे कोइ (आ) हाथीने रोगरहित करे, तेने आजे मारुं अर्धुं राज्य अथवा आखुं राज्यज आपी देउं.

किं राज्यैस्त्वत्प्रसादान्नः किमल्पमिति जल्पिनः । गजराजरुजश्छेदे वैद्याश्चक्रुरुपक्रमम् ॥ ३७२ ॥

अन्वयः—राज्यैः किं ? त्वत्प्रसादात् नः किं अल्पं.? इति जल्पिनः वैद्याः गजराजरुजः छेदे उपक्रमं चक्रुः. ॥ ३७२ ॥

अर्थः—राज्यनुं शुं प्रयोजन छे? आपनी कृपाथी अमोने शुं ओछुं छे? एम बोलता वैद्यो ते हस्तिराजनो रोग मटाडवामाटे उपायो करवा लाग्या. ॥ ३७२ ॥

स रिपून्परिपूर्णायुर्जेतुं कर्माभिधान्पुनः । सान्नं रोगपरीतोऽयं करी तोयं विमुक्तवान् ॥ ३७३ ॥

अन्वयः—परिपूर्णायुः रोगपरीतः सः अयं करी पुनः कर्माभिधान् रिपून् जेतुं स अन्नं तोयं विमुक्तवान् ॥३७३॥

अर्थः—संपूर्ण आयुवाळा तथा रोगथी घेरायेला एवा ते आ हाथीए तो कर्मो नामना शत्रुओने जीतवामाटे अन्नसहित जलनो त्याग कर्यो. ॥ ३७३ ॥

अस्यां रुजि न जीवामि जगृहेऽनशनं मया । इति च क्ष्मापतेराख्यत्क्षितिन्यस्ताक्षरः करी ॥ ३७४ ॥

अन्वयः—च अस्यां रुजि न जीवामि, मया अनशनं जगृहे, इति क्षितिन्यस्ताक्षरः करी क्ष्मापतेः आख्यत्. ॥ ३७४ ॥

अर्थः—वळी, आ रोगमांथी हुं उगरी शकुं तेम नथी, माटे में अनशन लीधुं छे, एम जमीनपर अक्षर लखीने ते हाथीए राजाने (पोतानी हकिकत) जणावी. ॥ ३७४ ॥

**मध्ये पुरस्य न श्रेयो मरणं करिणामिति । जगाम सामजन्मायं शनैरुपवनावनीम् ॥ ३७५ ॥**

अन्वयः—पुरस्य मध्ये करिणां मरणं श्रेयः न. इति अयं सामजन्मा शनैः उपवन अवनीं जगाम. ॥ ३७५ ॥

अर्थः—नगरनी अंदर हाथीनु मृत्यु कल्याणकारी नही, एम विचारी ते हाथी धीमेधीमे वनभूमिमां गयो. ॥ ३७५ ॥

**अधः क्षिप्त्वेव कर्माणि प्रपेष्टुं प्रतिमल्लवत् । उपाविक्षदसौ वक्षःस्पृष्टदृक्पूतभूतलः ॥ ३७६ ॥**

अन्वयः—प्रतिमल्लवत् कर्माणि अधः क्षिप्त्वा प्रपेष्टुं इव, वक्षः स्पृष्ट दृक् पूत भूतलः असौ उपाविक्षत्. ॥ ३७६ ॥

अर्थः—सामे लडनारा मल्लनी पेठे कर्मोने नीचे नाखीने जाणे तेओने चूरवा माटे होय नही ! तेम दृष्टिथी जोयेली (निर्जीव)

भूमिपर पोतानी छाती राखीने ते हाथी ( त्यां ) बेठो. ॥ ३७६ ॥

**स्वर्गलक्ष्मीकटाक्षाभस्तस्योपरि करिप्रभोः । पुष्पालम्बप्रभाशुभ्रो नृपेणाकारि मण्डपः ॥ ३७७ ॥**

अन्वयः–नृपेण तस्य करिप्रभोः उपरि स्वर्ग लक्ष्मी कटाक्षाभः पुष्पालंब प्रभा शुभ्रः मंडपः अकारि. ॥ ३७७ ॥

अर्थः—( पछी ) राजाए ते हस्तिराजनी उपर स्वर्गनी लक्ष्मीना कटाक्षो सरखो, तथा ( अंदर ) लटकावेला पुष्पोना ( गुच्छाओनी ) कांतिथी श्वेत थयेलो मंडप कराव्यो. ॥३७७ ॥

**तस्याशुभविपक्षस्य पार्श्वपक्षेषु पार्थिवः । दापयामास सुरभिद्रव्यद्रवघटाछटाः ॥ ३७८ ॥**

अन्वयः––अशुभविपक्षस्य तस्य पार्श्वपक्षेषु पार्थिवः सुरभि द्रव्य द्रव घटा छटाः दापयामास. ॥ ३७८ ॥

अर्थः––अशुभ एटले मृत्युने ( सूचवनारो छे ताव रूपी ) शत्रु जेनो, एवा ते हाथीनी आसपास जमीनपर, ( अथवा अशुभ एटले सूर्यना तापआदिकने अटकावनारी ते मंडपनी चारे बाजुए बांधेली कनातपर ) ते राजाए सुगंधी पदार्थोना जलसमूहनो

छटकाव देवराव्यो. ॥ ३७८ ॥

**श्राविका भावसाराश्च बन्दिनो गाथकास्तथा । इतश्चेतश्च तस्योच्चैर्जगुर्धर्मोल्बणान्गुणान् ॥ ३७९ ॥**

अन्वयः-- तस्य इतः च इतः च भावसाराः श्राविकाः, बंदिनः, तथा गाथकाः उच्चैः धर्म उल्बणान् गुणान् जगुः. ॥३७९॥

अर्थः-वळी ते हाथीनी आसपास भाविक श्राविकाओ, भाटलोको, तथा कथाकारो उंचा स्वरथी धार्मिक स्तवनो बोलावा लाग्या. ३७९.

**भूरयः सूरयस्त्वस्य पुरस्तथ्यगिरः कथाः । कथयन्ति स्म पूर्वर्षिकीर्तिपीयूषवर्षिणीः ॥ ३८० ॥**

अन्वयः--तु भूरयः सूरयः अस्य पुरः पूर्व ऋषि कीर्ति पीयूष वर्षिणीः तथ्यगिरः कथाः कथयंतिस्म. ॥ ३८० ॥

अर्थः--वळी घणा आचार्यो ते हाथीनी आगळ पूर्वे थइ गयेला ऋषिओनी कीर्तिरूपी अमृतने वरसावनारी सत्य वचनोवाळी कथाओ कहेवा लाग्या ॥ ३८० ॥

**इत्थं शमसुखाम्भोधिमग्नो बोधिसुधां पिबन् । शक्रादपि द्विपोत्तंसः स्वं स धन्यममन्यत ॥ ३८१ ॥**

अन्वयः—इत्थं शम सुखांभोधि मग्नः सः द्विपोत्तंस बोधि सुधां पिबन् स्वं शक्रात् अपि धन्यं अमन्यत. ।।३८१।।

अर्थः—एवीरीते शांतिसुखना महासागरमां मग्न थयेलो ते हस्तिराज ज्ञानरूपी अमृतने पीतो थको पोताने इंद्रथी पण भाग्यशाली मानवा लाग्यो. ।। ३८१ ।।

**तद् वृंदं करिणः पार्श्वे निशीथे सुप्तमन्यदा । प्रदीप इव भूमीपः स्नेहादेकस्त्वजागरीत् ।। ३८२ ।।**

अन्वयः—एकदा करिणः पार्श्वे तत् वृंदं निशीथे सुप्तं, एकः भूमीपः तु स्नेहात् प्रदीपः इव अजागरीत्. ।। ३८२ ।।

अर्थः–एक दिवसे ते हाथीनी आसपास रहेलो (लोकोनो) ते समूह मध्यरात्रीए निद्रावश थयो, अने फक्त एक राजाज स्नेहथी ( तैलथी ) दीपकनी पेठे जागतो हतो. ।। ३८२ ।।

**रोगाभोगव्यथावीर्यश्लथधैर्यस्तदा गजः । परिमीलितदृग्देहभङ्गं दीनस्वरोऽकरोत् ।। ३८३ ।।**

अन्वयः—तदा रोग आभोग व्यथा अवीर्यश्लथ धैर्यः गजः परिमीलित दृग् दीन स्वरः देहभंगं अकरोत्. ।।३८३।।

अर्थः—ते वखते रोगना घेराइ जवाथी थयेली व्याधिवडे, अने निर्बलताथी धैर्य तजीने ते हाथी आंखो वींचीने दीनस्वरे गात्र भंग करवा लाग्यो. ॥ ३८३ ॥

**अथाह पृथिवीन्दुस्तं बन्धो रोगबलाकुलः । मा धैर्यतः पत स्तम्भ इव धर्मोऽवलम्ब्यताम् ॥ ३८४ ॥**

अन्वयः—अथ पृथिवींदुः तं आह, ( हे ) बंधो ! रोग बलाकुलः धैर्यतः मापत ? स्तंभः इव धर्मः अवलंब्यतां.॥ ३८४ ॥

अर्थः-त्यारे राजाए तेने कह्युं के, हे बंधु ! रोगनी प्रबलताथी व्याकुल थइ तुं धीरज छोड नही, स्तंभनीपेठे धर्मनुं अवलंबन कर.। ३८४

**अङ्गात्क्लेशावलीरङ्गादुदस्य न्यस्यतां मनः । नमस्कारपरावर्ते तदर्तेरुद्भवः कुतः॥ ३८५ ॥**

अन्वयः—अंगात् क्लेशावलीः उदस्य रंगात् नमस्कार परावर्ते मनः न्यस्यतां, तत् अर्तेः उद्भवः कुतः? ॥३८५ ॥

अर्थः—( वळी तुं ) शरीरमांथी दुःखनी श्रेणिने दूर करीने आनंदथी नवकार गणवामां मन परोव ? अने तेथी तने व्याधिनी उत्पतिज क्यां रही ? ( अर्थात् तने व्याधि नही थाय. ) ॥ ३८५ ॥

इत्यवस्थाप्य नृपतिर्द्विपस्यार्तिचलं मनः । प्रापञ्चयत्कृती पंचपरमेष्ठिनमस्कृतीः ॥ ३८६ ॥

अन्वयः—इति द्विपस्य आर्तिचलं मनः अवस्थाप्य कृती नृपतिः पंचपरमेष्ठिनमस्कृतीः प्रापंचयत्. ॥ ३८६ ॥

अर्थः-एवी रीते ते हाथीना व्याधिथी व्याकुल थयेलां मनने स्थिर करावी, ते कृतज्ञ राजा पंचपरमेष्टिना नमस्कार बोलवा लाग्यो.

दृशौ बाष्पस्पृशौ बिभ्रद्वपुः सपुलकं पुनः । हृष्यन्करी नमस्कारान्भावनासस्तृणोऽश्रृणोत् ॥ ३८७ ॥

अन्वयः— बाष्पस्पृशौ दृशौ, पुनः वपुः सपुलकं बिभ्रद् भावनासस्तृणः करी हृष्यन् नमस्कारान् अश्रृणोत्. ॥ ३८७ ॥

अर्थः--आंसुओवाळी आंखोने, तथा रोमांचित थयेलो शरीरने धारण करतो थको, शुभभावना भावतो ते हाथी खुशी थइने नवकारमंत्रो सांभळवा लाग्यो. ॥ ३८७ ॥

सुखेन प्राप्तया दीर्घनिद्रया स्वप्नभागिव । इभप्रभुरसौ धर्मदिव्यः सौधर्मदिव्यगात् ॥ ३८८ ॥

अन्वयः--धर्मदिव्यः असौ इभ प्रभुः स्वप्नभाक् इव सुखेन प्राप्तया दीर्घनिद्रया सौधर्म दिवि अगात्. ॥ ३८८ ॥

अर्थः--धर्मथी तेजस्वी थयेलो आ हाथी जाणे स्वप्नावस्था भोगवतो होय नही ? तेम सुखे समाधे प्राप्त थयेली लांबी निद्रावडे ( मृत्यु पामीने ) सौधर्मदेवलोकमां गयो. ॥ ३८८ ॥

चन्दनागुरुकर्पूरकस्तूरीणां भरैरिभम् । अह्नि वह्निहुतं चक्रे शोकाश्रुप्लुतदृग्नृपः ॥ ३८९ ॥

अन्वयः—शोक अश्रु प्लुत दृग् नृपः अह्नि चंदन अगुरु कर्पूर कस्तूरीणां भरैः इभं वह्नि हुतं चक्रे. ॥ ३८९ ॥

अर्थः ( पछी ) शोकना अश्रुओथी भीनी थयेली आंखोवाळा राजाए दिवस उग्ये चंदन, अगुरु, कपूर तथा कस्तूरीना समूहोथी ते हाथीना शबनो अग्निसंस्कार कराव्यो. ॥ ३८९ ॥

तस्य कालोचितां धर्मबद्धां बन्धोरिव क्रियाम् । विधाय दुःखदीनात्मा ययौ धाम धराधिपः ॥ ३९० ॥

अन्वयः—बंधोः इव तस्य कालोचितां धर्मबद्धां क्रियां विधाय दुःख दीन आत्मा धराधिपः धाम ययौ. ॥ ३९० ॥

अर्थः-(पछी)भाइनी पेठे ते हाथीनी समयोचित धार्मिक क्रिया करीने दुःखथी खेद पामतो थको ते राजा(पोताना)स्थाने गयो. ३९०

**दुःखदीर्घं दिनमयं गमयित्वा कथंचन । नृचन्द्रश्चन्द्रशालायां निशि शय्यामशिश्रियत् ॥ ३९१ ॥**

अन्वयः--अयं नृचंद्रः दुःखदीर्घं दिनं कथंचन गमयित्वा निशि चंद्रशालायां शय्यां अशिश्रियत्. ॥ ३९१ ॥

अर्थः—पछी ते राजा दुःखथी लांबा थइ पडेला ते दिवसने मुशीबते निर्गमन करीने रात्रिए चंद्रशालामां शय्यापर जइ सूतो.

**श्वासोच्छ्वासोल्लसच्छोकशंकुसंकुल्यमानहृत् । निद्रामलभमानोऽयमित्यन्तः समचिन्तयत् ॥ ३९२ ॥**

अन्वयः—श्वास उच्छ्वास उल्लसत् शोक शंकु संकुल्यमान हृत्, अयं निद्रां अलभमानः अंतः इति समचिंतयत्. ॥ ३९२ ॥

अर्थः-श्वासोश्वासथी उछळता एवा शोकरूपी खीलाथी वींधाइ जतुं छे हृदय जेनुं, एवो आ राजा निद्रा न आववाथी (पोताना) हृदयमां एवो विचार करवा लाग्यो के, ॥ ३९२ ॥

**बहुदेशमहैश्वर्यश्रियापि मम किं तया । मृतेऽस्मिन्सिन्धुरे कृत्तधम्मिल्लेव बभूव या ॥ ३९३ ॥**

अन्वयः—तया बहु देश महा ऐश्वर्य श्रिया अपि मम किं? अस्मिन् सिंधुरे मृते या कृत्तधर्मिल्ला इव बभूव. ॥ ३९३ ॥

अर्थः—ते घणा देशाना महान् वैभववाळी (आ) लक्ष्मीवडे पण हवे मने शो (आनंद) थवानो छे? केमके ते हस्तिराजना मृत्युथी जे लक्ष्मी कपाइ गयेला चोटलावाळी (स्त्रीनी) पेठे (कंटाळो आपनारी) थइ पडी छे. ॥ ३९३ ॥

**तारयेव विना दृष्टिरात्मनेव विना तनुः । कीदृशी भाति मे भूमिस्तेनेभविभुना विना ॥ ३९४ ॥**

अन्वयः—तारया विना दृष्टिः इव, आत्मना विना तनुः इव, तेन इभ विभुना विना मे भूमिः कीदशी भाति? ॥ ३९४ ॥

अर्थः—कीकी विनानी जेम आंख, तथा जीव विनानुं जेम शरीर, तेम ते हस्तिराज विना मारी पृथ्वी ते केवीक शोभी निकळे?

**दृगिन्द्रियेण किं मेऽद्य किमु कर्णेन्द्रियेण वा । येन दृश्यं न तद्रूपं येनाकर्ण्यो न तद्ध्वनिः ॥ ३९५ ॥**

अन्वयः—येन तद्रूपं न दृश्यं, दृगइंद्रियेण अद्य मे किं? वा येन तद्ध्वनिः न आकर्ण्यः, कर्णेंद्रियेण किमु? ३९५ ॥

अर्थः—जे वडे ते हाथीनुं स्वरूप न जोइ शकाय, ते चक्षु इंद्रियनुं हवे मारे शुं प्रयोजन छे? अथवा जे वडे ते हाथीनो नाद न संभळाय, ते कर्णेंद्रियनुं पण मारे शुं प्रयोजन छे? ॥ ३९५ ॥

भ्रमन्ती यत्र तत्रापि खिन्नेयं नयनद्वयी । तद्विलोकसुधापानं विना तप्ता क्व शाम्यतु ॥ ३९६. ॥

अन्वयः—यत्र तत्र भ्रमंती अपि खिन्ना तप्ता इयं नयनद्वयी तद्विलोकसुधापानं विना क्व शाम्यतु? ॥ ३९६ ॥

अर्थः—ज्यां त्यां भमवाथी पण थाकीने तप्त थयेली आ (मारी) बन्ने आंखो ते हाथीना दर्शनरूपी अमृतपान विना हवे क्यांथी शांत थाय! ॥ ३९६ ॥

पुरातनानि मे सन्ति यदि पुण्यानि कानिचित् । तैरध्वनि दृशोरेकवारमेतु स वारणः ॥ ३९७ ॥

अन्वयः—यदि मे कानिचित् पुरातनानि पुण्यानि संति, तैः स वारणः एकवारं दृशोः अध्वनि एतु. ॥ ३९७ ॥

अर्थः—जो ( हजु पण ) मारां कंइक पूर्वे करेलां पुण्यो होय, तो ते पुण्योवडे ते हाथी एकवार ( मारी ) दृष्टिमार्गमां आवे, ( अर्थात् मने तेनुं दर्शन थाय ) ॥ ३९७ ॥

इति क्षितिपतिर्ध्यायन्नेत्राग्रे गजमैक्षत । अल्पकल्पद्रुनैपुण्यं पुण्यं पुण्यवतां यतः ॥ ३९८ ॥

अन्वयः—इति ध्यायन् क्षितिपतिः नेत्राग्रे गजं ऐक्षत, यतः पुण्यवतां पुण्यं अल्प कल्पद्रु नैपुण्यं. ॥ ३९८ ॥

अर्थः—एम विचारतांज ( ते ) राजाए ( ते ) हाथीने पासे ( उभेलो ) दीठो. केमके पुण्यवंतोनुं पुण्य कल्पवृक्षना महिमाने पण हठावनारुं छे. ॥ ३९८ ॥

शोकाश्रूण्यथ हर्षाश्रूकुर्वन्नुर्वीन्दुरुत्थितः । आलिङ्गद्धस्तिनस्तस्य हस्तं हस्तोरसा रसात् ॥ ३९९ ॥

अन्वयः—अथ शोकाश्रूणि हर्षाश्रूणि कुर्वन् उर्वींदुः उत्थितः, तस्य हस्तिनः हस्तं रसात् हस्तोरसा आलिंगत्. ॥३९९॥

अर्थः—पछी ते शोकना आंसुओने हर्षना आंसुरूप करतो, एवो ते राजा उभो थयो, अने ते हाथीनी सुंढने आनंदरसथी हाथमां पकडी (पोतानी) छाती साथे दाबवा लाग्यो.) ॥ ३९९ ॥

दध्यौ च किं मयादर्शि स्वप्ने व्यसुरसौ गजः । मृत एवाथवा जीवन्नेष स्वप्नान्निरीक्षितः ॥ ४०० ॥

अन्वयः—च दध्यौ, किं मया असौ गजः स्वप्ने व्यसुः अदर्शि? अथवा मृत एव एषः स्वप्नात् जीवन् निरीक्षितः. ॥४००॥

अर्थः—वळी ते विचारवा लाग्यो के, शुं में आ हाथीने स्वप्नमां मृत्यु पामेलो जोयो! अथवा आ मरण पामेलाज हाथीने हुं स्वप्नमां जीवतो जोउं छुं! ॥ ४०० ॥

मृतो न जीवतीत्युक्तिर्जिनशासनशास्त्रगा । कथंचिदन्यथापि स्यात्किं वा कालेन केनचित् ॥ ४०१ ॥

अन्वयः—वा मृतः न जीवति, इति जिनशासन शास्त्रगा उक्तिः केनचित् कालेन कथंचित् किं अन्यथा अपि स्यात् ॥ ४०१ ॥

अर्थः—अथवा "मरेलो जीवतो न थाय" एवुं जिनशासनना शास्त्रोनुं वचन कोई काळे कोइ रीते शुं जूठुं पण होय शके! ॥४०१॥

इत्यनल्पविकल्पालिं जजल्पालिङ्गनोन्मदम् । नृपं द्विपवरः स्मेरविस्मयं दिव्यया गिरा ॥ ४०२ ॥

अन्वयः—इति अनल्प विकल्पालिं, आलिंगनोन्मदं, स्मेरविस्मयं नृपं द्विपवरः दिव्यया गिरा जजल्प. ॥ ४०२ ॥

अर्थः—एवी रीते अनेक विकल्पोनी श्रेणिवाळा, तथा ( ते हाथीने ) भेटवामां अत्यंत उत्सुक थयेला, अने घणुं आश्चर्य पामता एवा ( ते ) राजाने ( ते ) हस्तिराजे देववाणीवडे कह्युं के, ॥ ४०२ ॥

**हहा महात्मन्मोहस्त्वां किं ध्वान्तोऽर्कमिवाविशत् । यदन्यथा जिनमतग्रन्थोक्तमपि शङ्कसे ॥ ४०३ ॥**

अन्वयः—हहा ! महात्मन् ! अर्कं ध्वांत इव त्वां मोहः किं अविशत् ? यत् जिन मत ग्रंथउक्तं अपि अन्यथा शंकसे ! ॥४०३॥

अर्थः—अरे ! महात्मा ! सूर्यमां अंधकारनी पेठे तारामां पण शुं मूढपणुं पेसी गयुं ? के जेथी जिनशासनमां कहेलां वचन माटे पण तुं असत्यपणानी शंका करे छे ? ॥ ४०३ ॥

**मृत एवास्मि नाजीवमहं राजीवलोचन । विचार्या चन्द्रशालान्तर्दन्तिनामागतिः कुतः ॥ ४०४ ॥**

अन्वयः—(हे) राजीवलोचन ! अहं मृतः एव अस्मि, न अजीवं, चंद्र शालाअंतः दंतिनां आगतिः कुतः ? विचार्या. ॥४०४॥

अर्थः-हे कमल सरखां नयनवाळा राजन् ! हुं मरी गयोज छुं, जीवतो नथी, वळी तारे विचारवुं जोइतुं हतुं के, आ चंद्रशालानी अंदर हाथीनुं आगमन केम संभवी शके ? ॥ ४०४ ॥

**दृष्टोऽस्मि यन्मृतो यन्मे रूपमेतच्च पश्यसि । अस्वप्नतुल्यं न स्वप्नाविमौ स्वप्नः क्व जाग्रतः ॥ ४०५ ॥**

अन्वयः--यत् मृतः दृष्टः अस्मि, च मे अस्वप्न तुल्यं एतत् रूपं पश्यसि, इमौ स्वप्नौ न, जाग्रतः स्वप्नः क्व ? ॥ ४०५ ॥
अर्थः-वळी जे ( मने ) मरेलो तें जोयो छे, तेमज मारुं स्वप्न जेवुं नही, एवुं आ स्वरूप तुं ( प्रत्यक्ष ) जुए छे. माटे ए बन्ने स्वप्नो नथी, केमके जागता मनुष्यने स्वप्न ते क्यांथी होय. ? ॥ ४०५ ॥

**तदनल्पयशःशिल्प तल्पमेतदलंकुरु । कथयामि यथा भूप स्वरूपमहमात्मनः ॥ ४०६ ॥**

अन्वयः--तत् (हे) अनल्पयशः शिल्प ! एतत् तल्पं (त्वं) अलंकुरु ? यथा (हे) भूप ! अहं आत्मनः स्वरूपं कथयामि.॥४०६॥
अर्थः-माटे हे अतिशय यशनी छापवाळा राजन् ! तुं आ (तारी) शय्याने शोभाव ? (अर्थात् शय्यापर बेस !) के जेथी हे राजन् ! हुं (मारुं) पोतानुं वृत्तांत तने कही संभळावुं. ॥ ४०६ ॥

**अथोदारचमत्कारस्तच्चकार धराधवः । श्रोतुं तच्चरितं कण्डूप्रवणश्रवणद्वयः ॥ ४०७ ॥**

अन्वयः—अथ उदार चमत्कारः धरा धवः तत् चरित्रं श्रोतुं कंडूक प्रवण श्रवण द्वयः तत् चकार. ॥ ४०७ ॥

अर्थः--पछी अति आश्चर्य पामेला ते राजाए तेनुं वृत्तांत सांभळवाने ( पोताना ) बन्ने कानोने खंजवाळी सावधान करी तेम कर्युं, ( अर्थात् ते शय्यापर बेठो. ) ॥ ४०७ ॥

**स्वान्तस्थसुकृताम्भोधिसुधोर्मिनिभवागिभः । अवदन्मदमत्तालिकण्ठतालान्कठोरयन् ॥ ४०८ ॥**

अन्वयः--स्वांतस्थ सुकृत अंभोधि सुधा उर्मि निभ वाक् इभः मदमत्त अलि कंठ तालान् कठोरयन् अवदत् ॥ ४०८ ॥

अर्थः—हृदयमां रहेला पुण्यरूपी अमृतना महासागरना मोजांओ सरखी वाणीवाळो ते हाथी, मदोन्मत्त भमराओना कंठना अवाजनी पण कठोरता जणावतो थको बोलवा लाग्यो के, ॥ ४०८ ॥

**राजन्नाजन्मनिर्व्याजध्यातधर्मपिधायिना । मृत्युक्षणे व्यथौघेन मोहितोऽहमचिन्तयम ॥ ४०९ ॥**

अन्वयः--(हे) राजन्! मृत्युक्षणे आ जन्म निर्व्याज ध्यात धर्म पिधायिना व्यथा ओघेन मोहितः अहं अचिंतयं ॥ ४०९ ॥

अर्थः—हे राजन्! मृत्युसमये छेक जन्मथी मांडीने निष्कपटपणे पाळेला धर्मने (पण) आच्छादित करनारा एवा व्याधिना

समूहथी मूढ थयेलो हुं (एवुं) चिंतववा लाग्यो के, ४०९ ॥

**नित्याहृतनृपद्रव्या न व्याधिं ये हरन्ति मे । तान्वैद्यान्यदि पश्यामि तन्नयामि यमालयम् ॥ ४१० ॥**

अन्वयः—नित्याहृतनृपद्रव्याः ये मे व्याधिं न हरंति, तान वैद्यान् यदि पश्यामि, तत् यमालयं नयामि. ॥ ४१० ॥

अर्थः—हमेशां राजानुं (हरामनुं) द्रव्य खानारा, एवा जे वैद्यो मारी व्याधिने मटाडता नथी, तेओने जो हुं (आ समये) जोउं तो यमने घेर मोकलावुं, (अर्थात् मारी नाखुं.) ॥ ४१० ॥

**इति रौद्रतरध्यानैरधोऽधःपातिनं तदा । मामुद्धार श्रीधर्मस्त्वद्गिरा जातजागरः ॥ ४११ ॥**

अन्वयः--तदा इति रौद्रतरध्यानैः अधः अधः पातिनं मां त्वद्गिरा जातजागरः श्रीधर्मः उद्धार. ॥ ४११ ॥

अर्थः--ते वखते एवी रीते वधारे वधारे रौद्र ध्यानथी नीचे नीचे पडता एवा मने, तारां वचनथी जागृत थयेला श्रीजैनधर्मे ओधर्यो, (अर्थात् नरकमां जतो बचाव्यो.) ॥ ४११ ॥

परमेष्ठिनमस्कारसुधाब्धिलहरीभरैः । क्षिप्तः सौधर्मकल्पेऽहं त्वन्मुखेन्दूदितैस्तदा ॥ ४१२ ॥

अन्वयः--तदा त्वत् मुख इंदु उदितैः परमेष्ठि नमस्कार सुधाब्धि लहरी भरै: अहं सौधर्म कल्पे क्षिप्तः ॥ ४१२ ॥

अर्थः--ते वखते तारा मुखरूपी चंद्रथी उछळता पंचपरमेष्ठिना नमस्काररूपी अमृतना समुद्रनां मोजाओनां समूहोए मने सौधर्मदेवलोकमां हडसेली दीधो. ॥ ४१२ ॥

प्राप्य सौधर्मदेवत्वं ममेदृग्वैभवं कुतः । इत्याशु ध्यायतादर्शि तन्निमित्तं मया भवान् ॥ ४१३ ॥

अन्वयः--सौधर्मदेवत्वं प्राप्य " मम ईदृग् वैभवं कुतः ? इति आशु ध्यायता मया तत् निमित्तं भवान् अदर्शि. ॥ ४१३ ॥

अर्थः--(ए रीते) सौधर्मदेवलोकमां देवपणु पामीने "मने आवी समृद्धि केम मळी ?" एम तुरत विचारतां में तेना कारणरूप तमोने जोया ॥ ४१३ ॥

तन्नागविरहार्तस्य सद्यः प्रीतिकृते तव । मुक्तोरुदिव्यरूपश्रीस्त्वामागां नागरूपभाक् ॥ ४१४ ॥

अन्वयः—तत् नागविरह आर्तस्य तव सद्यः प्रीतिकृते मुक्त उरु दिव्य रूपश्रीः नाग रूप भाक् त्वां आगां. ॥ ४१४ ॥

अर्थः—(पछी) ते हाथीना विरहथी पीडाता एवा जे तमो, तेने तुरत खुशी करवा माटे देवसंबंधि मनोहर रूपनी शोभाने तजी हाथीनुं स्वरूप लेइ हुं तमारी पासे आव्यो छुं. ॥ ४१४ ॥

**प्रभुत्वं स्वप्रसादस्य मयि पश्येति स द्विपः । तद्दिव्यं दर्शयामास स्वं वपू रविपूररुक् ॥ ४१५ ॥**

अन्वयः—मयि स्वप्रसादस्य प्रभुत्वं पश्य? इति सः द्विपः रविपूररुक् स्वं तत् दिव्यं वपुः दर्शयामास. ॥ ४१५ ॥

अर्थः—मारा उपर तमोए करेली मेहेरबानीनो वैभव तो जुओ ? एम कही ते हाथीए सूर्योना समूह सरखी कांतिवाळुं पोतानुं ते दिव्य शरीर (तेने) देखाड्युं. ॥ ४१५ ॥

**जीवतो भोगदस्त्वं मे म्रियमाणस्य धर्मदः । तत्प्रभुश्च गुरुश्चासि शून्यहस्तेन नेक्ष्यसे ॥ ४१६ ॥**

अन्वयः—जीवतः मे त्वं भोगदः, म्रियमाणस्य धर्मदः, तत् प्रभुः च गुरुः च असि, शून्यहस्तेन न ईक्ष्यसे. ॥ ४१६ ॥

अर्थः—मने जीवतां छतां तमोए भोजन आदिक भोगो पूरा पाड्या छे, तथा मृत्युसमये तमोए मने धर्मदान कर्युं छे, तेथी तमो मारा शेठ अने गुरु छो, माटे खाली हाथे तमारां दर्शन कराय नही. ॥ ४१६ ॥

पारिजाततरोः स्वर्गलक्ष्मीलक्षणलक्ष्मणः । गृहाणेदं फलं राजन्रसैराजिह्मितामृतम् ॥ ४१७ ॥

अन्वयः—(हे) राजन्! स्वर्ग लक्ष्मी लक्षण लक्ष्मणः पारिजाततरोः रसैः आजिह्मितामृतं इदं फलं गृहाण ? ॥ ४१७ ॥

अर्थः—(माटे) हे राजन्! स्वर्ग लक्ष्मीने जाणवाना चिन्ह सरखा कल्पवृक्षनुं, रसवडे अमृतनो पण तिरस्कार करनारुं आ फल तमो ग्रहण करो? ॥ ४१९ ॥

सद्य एवेदमास्वाद्यं क्षाल्योऽस्य रसनिर्झरैः । भवद्भाग्यविधोः पङ्को वपुःसंकोचविप्लवः ॥ ४१८ ॥

अन्वयः—सद्यः एव इदं आस्वाद्यं, अस्य रस निर्झरैः भवद्भाग्य विधोः वपुः संकोच विप्लवः पंकः क्षाल्यः. ॥ ४१८ ॥

अर्थः—(वळी) तुरतज आ फल तमारे खावुं, अने आ फलना रसनी धारावडे तमारां भाग्यरूपी चंद्रनो शरीर संकोचननी

खोडरूप मेल धोइ नाखवो. ॥ ४१८ ॥

**इदं निगदता तेन तद्दत्तं द्युसदा फलम् । आदाय नृपतिः प्रीत्या प्रत्याह स हसन्वचः ॥ ४१९ ॥**

अन्वयः—इदं निगदता तेन द्युसदा तत् फलं दत्तं, सः नृपतिः प्रीत्या आदाय हसन् वचः प्रत्याह. ॥ ४१९ ॥

अर्थः-एम कहेता एवा ते देवे ते फल (तेने) आप्युं. (त्यारे) ते राजा प्रीतिथी ते लेइने हसतो थको वचन बोल्यो के, ॥ ४१९ ॥

**आसन्नमुक्तपशुतासुलभं मोहमुद्वहन् । किं विवेकिन्फलस्वादं निशायां दिशसि स्वयम् ॥ ४२० ॥**

अन्वयः—(हे) विवेकिन् ! आसन्न मुक्त पशुता सुलभं मोहं उद्वहन् स्वयं निशायां फलस्वादं किं दिशसि? ॥ ४२० ॥

अर्थः—हे विवेकी ! तुरतमांज छोडेला पशुपणाने लायक एवी मूढताने धारण करतो थको (तुं) पोते रात्रिए फल खावानो उपदेश केम आपे छे? ॥ ४२० ॥

**सुरमुख्य ममेदानीं वपुषः पाटवेन किं । नैन्द्र्यादिलाभलोभेऽपि जन्यं रजनिभोजनम् ॥ ४२१ ॥**

अन्वयः--(हे) सुरमुख्य! इदानीं मम वपुषः पाटवेन किं? ऐंद्र्यादि लाभ लोभे अपि रजनि भोजनं न जन्यं. ॥ ४२१ ॥

अर्थः--हे उत्तम देव! हवे मारे शरीर सारुं करवानुं शुं काम छे? वळी इंद्रपणुं आदिक मेळववाना लोभथी पण रात्रिभोजन न करवुं जोइये. ॥ ४२१ ॥

आदृतं दुःखपूराय विमुक्तं पुण्यपंक्तये । स्यान्निशाभोजनं हन्त हंसकेशवयोरिव ॥ ४२२ ॥

अन्वयः--हंत हंसकेशवयोः इव आदृतं निशाभोजनं दुःखपूराय, विमुक्तं पुण्यपंक्तये. ॥ ४२२ ॥

अर्थः--अरे! हंस अने केशवनी पेठे करेलुं रात्रिभोजन दुःखोनो समूह देनारुं, अने छोडेलुं रात्रिभोजन पुण्योनी श्रेणि आपनारुं थाय छे. ॥ ४२२ ॥

तद्यथा पृथिवीकान्ताकुण्डलं कुण्डिनं पुरम् । अस्ति मुक्तास्रगाकारप्राकारपरिवेषभृत् ॥ ४२३ ॥

अन्वयः-तत् यथा-पृथिवी कांता कुंडलं, मुक्ता स्रगाकार प्राकार परिवेषभृत् कुंडिनं पुरं अस्ति. ॥ ४२३ ॥

अर्थः-ते आवी रीते-पृथ्वीरूपी स्त्रीना कुंडल सरखुं, अने मोतीनी माळा सरखा गढथी घेरायेलुं कुंडिनपुर नामे नगर छे. ४२३.

**तस्मिन्यशोधनो नाम यशोधवलितावनिः । बभूव नवद्रव्योपार्जकचूडामणिर्वणिक् ॥ ४२४ ॥**

अन्वयः--तस्मिन् यशोधवलितावनिः, नव द्रव्योपार्जक चूडामणिः यशोधनः नाम वणिक् बभूव. ॥ ४२४ ॥

अर्थः-ते नगरमां यशवडे श्वेत करेल छे पृथ्वी जेणे, तथा नवुं द्रव्य उपार्जन करनाराओमां मुकुट सरखो यशोधन नामे वणिक् (रहेतो) हतो. ॥ ४२४ ॥

**अभूतां भुवनानन्दचन्दनौ तस्य नन्दनौ । रम्भाकुक्षिसरोम्भोजश्रीहंसौ हंसकेशवौ ॥ ४२५ ॥**

अन्वयः--तस्य भुवनानंद चंदनौ, रंभा कुक्षि सरः अंभोज श्रीहंसौ हंसकेशवौ नंदनौ अभूतां. ॥ ४२५ ॥

अर्थः-ते शेठने जगतने आनंद करवामां चंदन सरखा, तथा रंभानी कुक्षीरूपी तळावमां रहेला कमळने शोभावनारा हंससरखा हंस अने केशव नामना बे पुत्रो हता. ॥ ४२५ ॥

ये दोषाभोजने दोषा धर्मघोषाभिधाद्गुरोः । वनं गताभ्यां ते ताभ्यां देशनासु निशामिताः ॥ ४२६ ॥

अन्वयः—वनं गताभ्यां ताभ्यां धर्मघोषाभिधात् गुरोः देशनासु दोषा भोजने ये दोषाः, ते निशमिताः. ॥ ४२६ ॥

अर्थः—वनमां गयेला एवा ते बन्ने भाइओए धर्मघोष नामना गुरु पासेथी उपदेशमारफते रात्रिभोजन करवामां जे दोषो रहेला छे, ते सांभळ्या. ॥ ४२६ ॥

तौ बोधात्तं गुरुं साक्षीकृत्य कृत्यविवेकनौ । रजनीभोजनत्यागं मुदितौ चक्रतुस्ततः ॥ ४२७ ॥

अन्वयः—ततः बोधात् तं गुरुं साक्षीकृत्य कृत्य विवेकिनौ तौ मुदितौ रजनी भोजन त्यागं चक्रतुः. ॥ ४२७ ॥

अर्थः—त्यारथी बोध पामीने, तेज गुरुने साक्षीरूप करीने कार्यनो विवेक धरनारा एवा तेओ बन्नेए खुशी थइने रात्रिभोजननो त्याग कर्यो. ॥ ४२७ ॥

अथ धाम्नि गतौ मध्यंदिने जनितभोजनौ । भागेऽष्टमेऽह्नस्तौ मातुर्वैकालिकमयाचताम् ॥ ४२८ ॥

अन्वयः—अथ मध्यंदिने जनित भोजनौ तौ धाम्नि गतौ अन्हः अष्टमे भागे मातुः वैकालिकं अयाचतां. ॥ ४२८ ॥

अर्थः—हवे मध्यान्हकाळे करेलुं छे भोजन जेओए, एवा तेओ बन्ने घेर गया, तथा दिवसनो आठमो भाग ज्यारे बाकी रह्यो, त्यारे तेओए (पोतानी) माता पासे वाळु करवामाटे भोजन माग्युं. ॥ ४२८ ॥

**किं भोज्यमधुना वत्सौ यतो दुग्धप्रियौ युवाम् । तत्पुनः स्थितवेलायां निशि स्यात्तत्किमुत्सुकौ ॥४२९॥**

**इति मातुर्वचः श्रुत्वा तौ सत्यमिदमूचतुः । आवाभ्यां नियमान्मातस्तत्यजे रात्रिभोजनम् ॥४३०॥युग्मम्॥**

अन्वयः—(हे) वत्सौ! अधुना किं भोज्यं? यतः युवां दुग्धप्रियौ, तत्पुनः स्थितवेलायां निशि स्यात्, तत् किं उत्सुकौ? ॥४२९॥
इति मातुः वचः श्रुत्वा तौ इदं सत्यं ऊचतुः, (हे) मातः! आवाभ्यां नियमात् रात्रिभोजनं तत्यजे. ॥ ४३० ॥ युग्मं

अर्थः—(हे) पुत्रो! आ वखते तमो शुं जमशो? केमके (वाळु करवामां) तमोने दूध जोइशे, अने ते तो नियमित वखते रात्रिएज मळी शकशे, माटे तमो शामाटे उतावळ करो छो? ॥ ४२९ ॥ एवी रीतनुं मातानुं वचन सांभळीने तेओए आ प्रमाणे सत्य कह्युं

के, (हे) मातजी! अमोए नियम लेइ रात्रिए भोजन करवानो त्याग कर्यो छे. ॥ ४३० ॥ युग्मं

इदं गर्भगृहस्थेन निशम्य वचनं तयोः । यशोधनेन सक्रोधं दध्ये मध्ये हृदस्तदा ॥ ४३१ ॥

अन्वयः—तदा तयोः इदं वचनं निशम्य गर्भगृहस्थेन यशोधनेन सक्रोधं हृदः मध्ये दध्ये. ॥ ४३१ ॥

अर्थः—ते वखते तेओनुं आ वचन सांभळीने ओरडामां रहेला यशोधने क्रोध सहित मनमां विचार्युं के, ॥ ४३१ ॥

ध्रुवं धूर्तेन केनापि सुतौ मे विप्रतारितौ । ततः कुलक्रमायातं त्यजतो रात्रिभोजनम् ॥ ४३२ ॥

अन्वयः—ध्रुवं केन अपि धूर्तेन मे सुतौ विप्रतारितौ, ततः कुल क्रमायातं रात्रिभोजनं त्यजतः. ॥ ४३२ ॥

अर्थः—खरेखर कोइक पण धूताराए मारा पुत्रोने ठग्या छे, अने तेथी कुलपरंपराथी चाल्या आवता रात्रिभोजननो तेओ त्याग करे छे. ॥ ४३२ ॥

तदवश्यं बुभुक्षार्तौ कृत्वा द्वित्रैर्दिनैः सुतौ । त्याजयिष्यामि तं रात्रिभोज्यत्यागकदाग्रहम् ॥ ४३३ ॥

अन्वयः-तत् अवश्यं सुतौ द्वित्रैः दिनैः बुभुक्षार्तौ कृत्वा तं रात्रिभोज्य त्याग कदाग्रहं त्याजयिष्यामि. ॥ ४३३ ॥

अर्थः—माटे खरेखर आ पुत्रोने बे त्रण दिवसोसुधी भुख्या राखीने ते रात्रिभोजनना त्यागना दुराग्रहने छोडावीश. ॥ ४३३ ॥

**एवं चिन्तयता तेन रम्भा स्थालार्थमागता । सुतयोर्भोजनं देयं नेति च्छन्नं न्यवार्यत ॥ ४३४ ॥**

अन्वयः-एवं चिंतयता तेन स्थालार्थं आगता रंभा सुतयोः भोजनं न देयं, इति छन्नं न्यवार्यत. ॥ ४३४ ॥

अर्थः—एम विचारता एवा ते यशोधने स्थाल लेवामाटे ( ओरडामां ) आवेली रंभाने " तारे पुत्रोने भोजन आपवुं नही " एम गुप्तरीते निवारण कर्युं. ॥ ४३४ ॥

**भर्तुराज्ञावशादेषा तावेत्यावददित्यथ । अन्नपाकोऽधुना भावी पक्वान्नाद्यस्ति वस्तु न ॥ ४३५ ॥**

अन्वयः-अथ भर्तुः आज्ञावशात् एषा एत्य तौ इति अवदत् , अधुना अन्नपाकः भावी, पक्वान्नआदिवस्तु न अस्ति. ॥ ४३५ ॥

अर्थः—हवे स्वामिनी आज्ञाने वश थवाथी तेणीए ( बहार ) आवी ते पुत्रोने एम कह्युं के, रसोइ हजु हवे थशे, अने पक्वान्नआदि

कंइ वस्तु हाजर नथी. ॥ ४३५ ॥

**किं च रात्रौ समं पित्रा युवाभ्यां भोज्यमेव यत् । कुलीनास्ते सुता ये स्युः पितृमार्गानुगामिनः ॥४३६॥**

अन्वयः–किंच रात्रौ युवाभ्यां पित्रा समं एव भोज्यं, यत् कुलीनाः ते सुताः स्युः, ये पितृमार्ग अनुगामिनः. ॥ ४३६ ॥

अर्थः–वळी रात्रिए तमारे (तमारा) पितानी साथेज भोजन करवुं, केमके कुलीन ते पुत्रोज कहेवाय, के जेओ पिताने मार्गेचाले.

**स्मित्वा तावूचतुर्मातः सन्मार्गः सेव्यते पितुः । सुपुत्रैरपि किं कूपे पतंस्तातोऽनुगम्यते ॥ ४३७ ॥**

अन्वयः–स्मित्वा तौ ऊचतुः, ( हे ) मातः सुपुत्रैः अपि पितुः सन्मार्गः सेव्यते, कूपे पतन् तातः किं अनुगम्यते ? ॥ ४३७ ॥

अर्थः––( त्यारे ) तेओए जरा हसीने कह्युं के, ( हे ) माताजी सुपुत्रो पण पिताना उत्तम मार्गने अनुसरे, परंतु कुवामां पडता पितानुं पण शुं तेओ अनुगमन करे ? ॥ ४३७ ॥

**तर्हि सम्प्रति लप्स्येथे न युवां भोजनं सुतौ । मात्रेत्युक्तौ ततो मौनं कृत्वा तौ जग्मतुर्बहिः ॥ ४३८ ॥**

अन्वयः-( हे ) सुतौ ! तर्हि संप्रति युवां भोजनं न लप्स्येथे, इति मात्रा उक्तौ तौ मौनं कृत्वा ततः बहिः जग्मतुः. ॥ ४३८ ॥
अर्थः—हे पुत्रो त्यारे तो हमणां तमोने भोजन मळशे नही, एम माताए कहेवाथी तेओ मौन रही त्यांथी बहार चाल्या गया.।४३८।

श्रेष्ठिनः सुतयोर्वाक्यं मिथ्यादृष्टेर्जगत्प्रियम् । विशेषाद्दोषकृज्जज्ञे ज्वरार्तस्य हविर्यथा ॥ ४३९ ॥

अन्वयः-यथा ज्वरार्तस्य हविः, सुतयोः जगत्प्रियं वाक्यं मिथ्यादृष्टेः श्रेष्ठिनः विशेषात् दोष कृत् जज्ञे. ॥ ४३९ ॥
अर्थः—जेम ताववाळाने खवरावेलु घी, तेम ते पुत्रोनुं जगतने गमतुं एवुं पण ते वाक्य मिथ्यादृष्टि एवा ते यशोधन शेठने विशेष प्रकारे दोष उत्पन्न करनारुं थयुं. ॥ ४३९ ॥

भवत्या भोजनं देयं रजन्यामेव पुत्रयोः । इत्थमत्यर्थशपथैः श्रेष्ठी रम्भामवारयत् ॥ ४४० ॥

अन्वयः-भवत्या पुत्रयोः रजन्यां एव भोजनं देयं, इत्थं अत्यर्थशपथैः श्रेष्ठी रंभां अवारयत्. ॥ ४४० ॥
अर्थः—तारे ( आ ) पुत्रोने फक्त रात्रिएज भोजन आपवुं, एम आकरा सोगनो आपीने ते यशोधन शेठे रंभाने निवारण कर्युं. ।४४०।

जनन्याथ रजन्यां तावागतावर्थितावपि । न भोजनं महासत्त्वचक्रिणौ चक्रतुस्तदा ॥ ४४१ ॥

अन्वयः-अथ रजन्यां आगतौ जनन्या अर्थितौ अपि महासत्त्वचक्रिणौ तौ तदा भोजनं न चक्रतुः. ॥ ४४१ ॥

अर्थः-पछी रात्रिए आवेला एवा तेओने माताए समजाव्या छतां पण धैर्यवंतोमां शिरोमणि एवा तेओए ते वखते भोजन कर्युं नही. ४४१

द्वितीयेऽह्नि शठश्रेष्ठः श्रेष्ठी तौ विशदाशयौ । क्रयविक्रयलीलासु न्ययुंक्त महतीष्वसौ ॥ ४४२ ॥

अन्वयः-द्वितीये अह्नि असौ शठश्रेष्ठः श्रेष्ठी विशदाशयौ तौ महतीषु क्रयविक्रयलीलासु न्ययुंक्त. ॥ ४४२ ॥

अर्थः—बीजे दिवसे आ अत्यंत लुच्चा एवा यशोधन शेठे निर्मल विचारवाळा एवा ते बन्ने पुत्रोने महोटा लेवडदेवडना व्यापारमां जोडी दीधा. ॥ ४४२ ॥

तथा लाभरसाभोगभङ्गीभिस्तौ विलेसतुः । तदेव कुर्वतोः कर्म यथागान्निधनं दिनम् ॥ ४४३ ॥

अन्वयः-लाभरसाभोगभंगीभिः तौ तथा विलेसतुः, यथा तत् एव कर्म कुर्वतोः दिनं निधनं अगात्. ॥ ४४३ ॥

अर्थः—( ते व्यापारमां ) वटाव थवाना रसना स्वादनी युक्तिओवडे तेओ बन्ने एटला तो मशगुल थया, के जेथी ते कार्य करतांज तेओनो आखो दिवस व्यतीत थयो. ॥ ४४३ ॥

तौ धाम यामिनीयामसमये समुपागतौ। अभुक्त्वैवापतुः स्वापं तदभिग्रहसाग्रहौ ॥ ४४४ ॥

अन्वयः—यामिनी याम समये धाम समुपागतौ तदभिग्रह साग्रहौ तौ अभुक्त्वा एव स्वापं आपतुः. ॥ ४४४ ॥

अर्थः—रात्रिने पहेले पहोरे घेर आव्याबाद पोताना नियममां निश्चल एवा तेओ बन्ने भोजन कर्या विनाज उंघी गया. ।४४४।

इति व्यवहृतिं पित्रा कार्यमाणौ रसेन तौ। अजातभोजनावेव प्रसुप्तौ पञ्च शर्वरीः ॥ ४४५ ॥

अन्वयः—इति पित्रा व्यवहृतिं कार्यमाणौ तौ रसेन अजातभोजनौ एव पंच शर्वरीः प्रसुप्तौ. ॥ ४४५ ॥

अर्थः-एवी रीते पिताए व्यापारमां जोडेला एवा तेओ बन्ने (तेना) रसथी भोजन कर्याविनाज पांच रात्रिसुधी सुइ रह्या. ४४५

षष्ठेऽहनि निशारम्भे संभेजतुरिमौ गृहम्। आचष्ट च वचः श्लक्ष्णं विनयेन यशोधनः ॥ ४४६ ॥

अन्वयः-षष्ठे अहनि निशा आरंभे इमौ गृहं संमेजतुः, च यशोधनः विनयेन श्लक्ष्णं वचः आचष्ट. ॥ ४४६ ॥

अर्थः-छठे दिवसे रात्रिना प्रारंभ वखते ते बन्ने भाइओ (ज्यारे) घेर आव्या, (त्यारे) यशोधन शेठ (तेओने) विनयथी स्नेहना डोळवाळुं वचन कहेवा लाग्यो के, ॥ ४४६ ॥

वत्सौ यत्सौख्यदं मे स्यादिष्टं स्पष्टं तदेव वाम् । इति प्रत्ययतः किंचिद्वच्मि तच्च विरच्यताम् ॥४४७॥

अन्वयः-(हे) वत्सौ! मे यत् सौख्यदं स्यात्, तत् एव वां इष्टं स्पष्टं, इति प्रत्ययतः किंचित् वच्मि, तत् च विरच्यतां. ॥४४७॥

अर्थः—हे पुत्रो ! मने जे सुखकारी थाय, तेज तमोने प्रिय छे, एम स्पष्ट जणाय छे, एवी (मने) खातरी थवाथी (हुं) तमोने कंइक कहुं छुं, ते मुजब करो ? ॥ ४४७ ॥

निशाहारपरीहारं न वेद्मि युवयोर्ध्रुवम् । तदीदृशि भृशक्लेशे युवां कार्ये नियोजितौ ॥ ४४८ ॥

अन्वयः-ध्रुवं युवयोः निशा आहार परिहारं न वेद्मि, तत् ईदृशि भृशक्लेशे कार्ये युवां नियोजितौ. ॥ ४४८ ॥

अर्थः—खरेखर तमारां रात्रिभोजन त्यागना नियमने हुं जाणतो नथी, अने तेथीज आवां अतिकष्ट आपनारां फायमां ( में ) तमो बन्नेने जोड्या. ॥ ४४८ ॥

**यदभुक्तवतोर्भुक्ते युवयोर्न जनन्यपि । अद्यास्यास्तदभूत्षष्ट उपवासः प्रयासकृत् ॥ ४४९ ॥**

अन्वयः—युवयोः अभुक्तवतोः जननी अपि यत् न भुंक्ते, तत् अद्य अस्याः प्रयासकृत् षष्ठः उपवासः अभूत. ॥ ४४९ ॥

अर्थः-(वळी) तमो बन्नेना नही जमवाथी (तमारी) माता पण जे जमती नथी, तेथी आजे तेणीने पण कष्टदायी छट्ठो उपवासथयोछे.

**तद्वां षण्मासजन्मासौ स्वसा कुसुमकोमला । स्तन्यान्यलभमानाद्य कियन्म्लाना विलोक्यतां ॥४५०॥**

अन्वयः—तत् षण्मासजन्मा कुसुमकोमला वां असौ स्वसा स्तन्यानि अलभमाना विलोक्यतां ? अद्य कियन्म्लाना ! ॥ ४५० ॥

अर्थः-अने तेथी (फक्त) छ मासनीज उमरनी, अने पुष्पसरखी कोमल तमारी आ बेहेन धावण नही मळवाथी जुओ के, आजे केटली दुबली पडी गइ छे ! ॥ ४५० ॥

म्लानिमस्याः शिशोर्वीक्ष्य कारणं मम पृच्छतः । आख्यद्भवदनाहारपूर्वं सर्वमयं जनः ॥ ४५१ ॥

अन्वयः—अस्याः शिशोः म्लानिं वीक्ष्य कारणं पृच्छतः मम भवत् अनाहारपूर्वं सर्वं अयं जनः आख्यत्. ॥ ४५१ ॥

अर्थः—(वळी) आ बाळकीनुं दुबळापणुं जोइने (तेनुं) कारण पूछतां मने तमारा नही जमवा आदिक सर्व वृत्तांत तेणीए कह्यो.

तद् भुज्यतां यथा भुंक्ते भवन्मातापि संप्रति । कृपासारौ शिशोरस्या मा भूत्पित्तादिभूर्व्यथा ॥ ४५२ ॥

अन्वयः-तत भुज्यतां, यथा भवन्माता अपि संप्रति भुंक्ते. कृपासारौ (युवां), अस्याः शिशोः पित्तादिभूः व्यथामाभूत्.।४५२।

अर्थः-माटे तमो बन्ने हवे जमीलीयो, के जेथी हवे तमारी माता पण भोजन करे, (वळी तमो तो) महा दयाळु छो, वळी आ (बिचारी) बाळकीने पण पित्तआदिकना उछाळाथी कष्ट थवुं न जोइये. ॥ ४५२ ॥

पूर्वं निशाया यामार्धं प्रदोषः कीर्त्यते बुधैः । प्रत्यूषं पश्चिमं तेन सा त्रियामेति विश्रुता ॥ ४५३ ॥

अन्वयः-निशायाः पूर्वं यामार्धं बुधैः प्रदोषः कीर्त्यते, पश्चिमं प्रत्यूषं, तेन सा त्रियामा इति विश्रुता. ॥ ४५३ ॥

अर्थः—रात्रिना आगला अर्धा पहोरने पंडितो " प्रदोष " कहे छे, अने पाछला ( अर्धा पहोरने ) " प्रत्यूष " कहे छे, अने तेथी ते रात्रि " त्रियामा " ( त्रण पहोरनी ) प्रसिद्ध छे. ॥ ४५३ ॥

इदानीं भोजनं तद्वां न निशाभोजनं भवेत् । यामिनीघटिकायुग्ममपि नाद्यापि याति यत् ॥ ४५४ ॥

अन्वयः-तत् इदानीं वां भोजनं निशाभोजनं न भवेत्, यत् अद्य अपि यामिनीघटिकायुग्मं अपि न याति. ॥ ४५४ ॥

अर्थः—माटे आ वखते तमारुं भोजन ( कंइं ) रात्रिभोजन संभवीशके नही, केमके हजु बे घडी रात्रि पण गइ नथी. ॥४५४ ॥

इति तातगिरा भिन्नः क्षुधा च विधुरीकृतः । हंसः क्लेशहतावेशः केशवाननमैक्षत ॥ ४५५ ॥

अन्वयः-इति तातः गिरा भिन्नः, च क्षुधा विधुरीकृतः, क्लेश हतावेशः हंसः केशव आननं ऐक्षत. ॥ ४५५ ॥

अर्थः—एवी रीतनां पितानां वचनथी नरम पडेलो, तथा क्षुधाए व्याकुल करेलो अने कष्टथी नाहिम्मत थयेलो हंस केशवना मुख तरफ जोवा लाग्यो. ॥ ४५५ ॥

इति ज्यायांसमुद्धाव्य भ्रातरं कृत्यकातरम् । व्याचष्ट केशवः कष्टजनकं जनकं प्रति ॥ ४५६ ॥

अन्वयः-इति ज्यायांसं भ्रातरं कृत्य कातरं उद्धाव्य केशवः कष्टजनकं जनकंप्रति व्याचष्ट. ॥ ४५६ ॥

अर्थः—एवीरीते ( पोताना ) म्होटा भाइ हंसने क्षुधाथी कायर थयेलो जाणीने केशव ( पोताने ) कष्ट आपनारा पिताने कहेवा लाग्यो के, ॥ ४५६ ॥

यस्ते सुखकरो भावः करोमि तमहं पितः । न ते सुखायते तत्किं यन्मे पातकघातकम् ॥ ४५७ ॥

अन्वयः-( हे ) पितः ! यः भावः ते सुखकरः, तं अहं करोमि, मे यत् पातकघातकं तत् ते किं न सुखायते ? ॥ ४५७ ॥

अर्थः—हे पिताजी ! जे कार्य आपने सुखकारी छे, ते हुं करुं छुं. तथा मारुं ( रात्रिभोजनना त्यागरूप ) जे कार्य पापोनो विनाश करनारुं छे, ते आपने केम रुचतुं नथी ? ॥ ४५७ ॥

यज्जनन्यादिवात्सल्यं तच्छल्यं धर्मकर्मणः । स्वकर्मफलभुक्सर्वः कः कस्यार्थे करोत्वघम् ॥ ४५८ ॥

अन्वयः–यत् जननी आदि वात्सल्यं तत् धर्म कर्मणः शल्यं, सर्वः स्वकर्मभुक, कस्य अर्थे कः अघं करोतु.? ॥ ४५८ ॥

अर्थः—( वळी ) माता आदिक प्रते जे वत्सलपणुं बताववुं, ते धर्मकार्यमां ( विघ्नकारक ) शल्य सरखुं छे. सर्व जीवो पोताना कर्मो भोगवी रह्या छे, माटे कोइने माटे कोण पाप करे ? ॥ ४५८ ॥

**मुहूर्तोऽह्नो मुखेऽन्ते च निशासन्नो निशासमः । तत्त्रापि न भोक्तव्यं निशैवास्त्यधुना पुनः ॥ ४५९ ॥**

अन्वयः—अह्नः मुखे च अंते मुहूर्तः निशासन्नः निशासमः, तत् तत्र अपि न भोक्तव्यं, अधुना पुनः निशा एव अस्ति. ॥४५९॥

अर्थः-दिवसना प्रारंभमां, अने दिवसना अंत पहेलांनो बेघडी जेटलो समय रात्रिने नजदीक होवाथी रात्रि समानज छे, माटे ते वखते पण भोजन कराय नही, अने आ वखते तो रात्रिज छे. ॥ ४५९ ॥

**तद्वारं वारमेवं न वाच्योऽहं भवता पितः । कार्येऽस्मिन्विहिते शान्तिं क लभे भवतापितः ॥ ४६० ॥**

अन्वयः—तत् (हे) पितः! भवता वारंवारं अहं एवं न वाच्यः, भवतापितः अस्मिन् कार्ये विहीते शांतिं क लभे? ॥ ४६० ॥

अर्थः—माटे हे पिताजी! आपे वारंवार मने आ माटे कहेवुं नही. केमके संसारथी तपेलो एवो हुं आ रात्रिभोजननुं कार्य करीने क्यां शांति मेळवी शकुं? ॥ ४६० ॥

**अथैनमेनसां धाता तत्पिता कुपितोऽवदत्। लङ्घसे यदि मद्वाचं मुञ्च लोचनवर्त्म तत् ॥ ४६१ ॥**

अन्वयः—अथ एनसां धाता तत्पिता कुपितः एनं अवदत्, यदि मद्वाचं लंघसे, तत् लोचनवर्त्म मुंच? ॥४६१ ॥

अर्थः—पछी पापिष्ट एवा तेना पिताए क्रोध पामीने तेने कह्यु के, ज्यारे मारां वचननो तुं अनादर करे छे, त्यारे मारी आंखोथी तुं वेगळो जा? ॥ ४६१ ॥

**ततोऽथ विषभृद्वृन्दकन्दरादिव मन्दिरात्। स निःससार संसारकारणं ममतां त्यजन् ॥ ४६२ ॥**

अन्वयः—अथ संसार कारणं ममतां त्यजन् सः विषभृत्वृंदकन्दरात् इव ततः मंदिरात् निःससार. ॥ ४६२ ॥

अर्थः—पछी संसारना कारणरूप ममताने तजतो एवो ते केशव सर्पोना समूहथी भरेली गुफामांथी जेम, तेम ते घरमांथी

निकळी गयो ॥ ४६२ ॥

हंसं तमनुगच्छन्तं कृच्छ्राध्धृत्वा यशोधनः । प्रलोभ्य बहुभिर्वाग्भिर्भोजनाय न्यवीविशत् ॥ ४६३ ॥

अन्वयः—तं अनुगच्छंतं हंसं कृच्छ्रात् धृत्वा बहुभिः वाग्भिः प्रलोभ्य यशोधनः भोजनाय न्यवीविशत् ॥ ४६३ ॥

अर्थः—तेनी पाछळ जता हंसने बळात्कारे पकडी राखीने, तथा घणां घणां वचनोथी ललचावीने यशोधने भोजन करवामाटे बेसाड्यो. ॥ ४६३ ॥

पुरग्रामनगारामविलङ्घनघनक्रमः । स ययौ सप्तमेऽप्यह्नि तथैवावेशवान्पथि ॥ ४६४ ॥

अन्वयः—पुर ग्राम नग आराम विलंघन घनक्रमः सः सप्तमे अपि अह्नि तथा एव आवेशवान् पथि ययौ. ॥ ४६४ ॥

अर्थः--नगर, गाम, पर्वत, तथा बगीचाओने उल्लंघवामां उतावळी चालवाळो एवो ते केशव सातमे दिवसे पण तेवीज रीते पोताना नियममां निश्चल थयो थको मार्गे चालवा लाग्यो. ॥ ४६४ ॥

अटन्नऽव्यां कुत्रापि निशीथसमयेऽथ सः। घनयात्राजनं यक्षायतनं किंचिदैक्षत ॥ ४६५ ॥

अन्वयः—अथ अटव्यां अटन् सः निशीथसमये कुत्र अपि घनयात्राजनं किंचित् यक्ष आयतनं ऐक्षत. ॥ ४६५ ॥

अर्थः—पछी अरण्यमां भमतां थकां तेणे मध्यरात्रिए क्यांक ज्यां यात्रा माटे घणा लोको एकठा थया छे, एवुं कोइक यक्षनुं मंदिर जोयुं. ॥ ४६५ ॥

तत्र यात्राजना यक्षगृहे सज्जितभोजनाः। हृष्यन्तः समभाषन्त तमागच्छन्तमुत्सुकाः ॥ ४६६ ॥

अन्वयः—तत्र यक्षगृहे सज्जित भोजनाः यात्राजनाः तं आगच्छंतं (वीक्ष्य) हृष्यंतः उत्सुकाः समभाषंत ॥ ४६६ ॥

अर्थः—ते यक्षना मंदिरमां तैयार करेल छे भोजन जेओए एवा ते यात्रालुओ ते केशवने आवतो (जोइने) हर्षित तथा उत्सुक थया थका कहेवा लाग्या के, ॥ ४६६ ॥

एह्येहि भोज्यमादेहि देहि पुण्यानि पान्थ नः। पश्यामः काममतिथिं वयमारब्धपारणाः ॥ ४६७ ॥

अन्वयः—(हे) पांथ! एहि? एहि? भोज्यं आदेहि? नः पुण्यानि देहि? आरब्धपारणाः वयं कं अतिथिं पश्यामः ॥ ४६७ ॥

अर्थः—हे पथिक! तुं आव आव? अने भोजन ग्रहण कर? तथा अमोने पुण्य आप? पारणामाटे तैयारी करता एवा अमो (कोइ) अतिथिनी बहु राह जोइए छीये. ॥ ४६७ ॥

**कीदृग्व्रत व्रतं यस्य निशि पारणमित्यथ । केशवो विकसत्पुण्यसन्तानस्तानभाषत ॥ ४६८ ॥**

अन्वयः—अथ विकसत्पुण्यसंतानः केशवः तान् इति अभाषत, बत यस्य निशि पारणं, कीदृग व्रतं? ॥ ४६८ ॥

अर्थः—त्यारे विकस्वर थयेल छे पुण्यपरंपरा जेनी एवा ते केशवे तेओने एम कह्युं के, अरे! जेनुं रात्रिए पारणुं थाय, एवुं ते (आ तमारुं) कयुं व्रत छे? ॥ ४६८ ॥

**तेऽवदन्माणवाख्योऽयं यक्षो दक्षो जगन्मुदे । स्यादस्याद्य महायात्रा पुण्यपात्रायितस्थितिः ॥ ४६९ ॥**

अन्वयः—ते अवदन् जगन्मुदे दक्षः अयं माणवाख्यः यक्षः, अस्य अद्य पुण्यपात्रायितस्थितिः महा यात्रा स्यात. ॥ ४६९ ॥

अर्थः—(त्यारे) तेओए कह्युं के, जगत्ने खुशी करवामां चतुर, एवो आ माणव नामनो यक्ष छे, अने तेनी आजे पुण्योना पात्ररूप थयेला आचारवाळी महोटी यात्रा छे. ॥ ४६९ ॥

**कृत्वोपवासं दिवसे निशीथेऽतिथिमादरात् । भोजयित्वा विधातव्यं पारणं पुण्यकारणम् ॥ ४७० ॥**

अन्वयः—दिवसे उपवासं कृत्वा निशीथे आदरात् अतिथिं भोजयित्वा पुण्यकारणं पारणं विधातव्यं. ॥ ४७० ॥

अर्थः—दिवसे उपवास करीने मध्यरात्रिए आदरपूर्वक अतिथिने जमाडी पुण्यना कारणरूप पारणुं करवुं. ॥ ४७० ॥

**तदीदृक्षोपवासानां पारणायोद्यमस्पृशाम् । त्वं भवातिथिरस्माकमाकस्मिकसमागमः ॥ ४७१ ॥**

अन्वयः—तत् ईदृक्षोपवासानां पारणाय उद्यमस्पृशां अस्माकं आकस्मिक समागमः त्वं अतिथिः भव? ॥ ४७१ ॥

अर्थः—माटे आवी रीतना उपवासवाळा अने पारणामाटे तैयार थयेला एवा जे अमो, तेओनो अकस्मात आवी पहोंचेलो तुं अतिथि था? ॥ ४७१ ॥

स जगौ नेह भुंजेऽहमंहःकारिणि पारणे। रजन्यां भोजनं न स्याद्युक्तमुक्तमिदं यतः ॥ ४७२ ॥

अन्वयः—सः जगौ अंहः कारिणि इह पारणे अहं न भुंजे, यतः रजन्यां भोजनं न स्यात्, इदं युक्तं उक्तं. ॥ ४७२ ॥

अर्थः—(त्यारे) तेणे कह्यु के, पापाचरणवाळा आ पारणामां हुं जमवानो नथी, केमके रात्रिए भोजन कराय नही, एवा ते (शास्त्रोमां) सत्य कहेली छे. ॥ ४७२ ॥

उपवासेऽत्र जायेत गुणो गुञ्जासमो न वा। ध्रुवं दोषस्तु दोषायां भोजने भूधराधिकः ॥ ४७३ ॥

अन्वयः—अत्र उपवासे गुंजासमः गुणः जायेत वा न, दोषायां भोजने दोषः तु ध्रुवं भूधर अधिकः. ॥ ४७३ ॥

अर्थः-आ उपवासथी चणोठी जेटलो गुण तो थाय अथवा न पण थाय, परंतु रात्रिभोजनथी दोषतो खरेखर पर्वतथी पण अधिकछे.

उपवासोऽप्यसौ न स्याद्यत्रैवं निशि भुज्यते। धर्मशास्त्रेष्वहोरात्राभोजने स हि कीर्त्यते ॥ ४७४ ॥

अन्वयः-यत्र एवं निशि भुज्यते, असौ उपवासः अपि न स्यात्, हि धर्मशास्त्रेषु अहोरात्रअभोजने सः कीर्त्यते. ॥ ४७४ ॥

अर्थः—ज्यां आवीरीते रात्रिए भोजन कराय, ते उपवास पण न होइ शके, केमके धर्मशास्त्रोमां दिवसे अने रात्रिए भोजन न करवाथीज उपवास कहेलो छे. ॥ ४७४ ॥

**धर्मशास्त्रविरुद्धं ये तपः कुर्वन्ति दुर्धियः । ते यान्ति दुर्गतिं धूर्ताः कूटद्रव्यकृतो यथा ॥ ४७५ ॥**

अन्वयः—ये धर्मशास्त्रविरुद्धं तपः कुर्वंति, ते दुर्धियः, यथा कूटद्रव्य कृतः धूर्ताः दुर्गतिं यांति. ॥ ४७५ ॥

अर्थः—जेओ धर्मशास्त्रथी विपरीत तप करे छे. ते दुर्बुद्धिओ खोटा सिक्का पाडनारा धूर्तोनी पेठे दुर्गतिमां जाय छे. ॥ ४७५ ॥

**तेऽप्यशंसन्नसावेव देवस्यास्य व्रते विधिः । युक्तैरपि न शास्त्रोक्तैर्विरच्यास्य विचारणा ॥ ४७६ ॥**

अन्वयः—ते अपि अशंसन्, अस्य देवस्य व्रते असौ एव विधिः, युक्तैः अपि शास्त्र उक्तैः अस्य विचारणा न विरच्या. ।४७६।

अर्थः—ते यात्रालुओए पण कह्युं के, आ देवना व्रतमां एज विधि छे. माटे सत्य एवां पण शास्त्रोनां वचनो वडे आ संबंधि विचार करवानो होयज नही. ॥ ४७६ ॥

अवश्यमतिथिं कंचिद्भोजयित्वाद्य भुज्यते । इति तद्दर्शनेऽस्माकं रजनिर्विपुलाऽजनि ॥ ४७७ ॥

अन्वयः—अद्य अवश्यं कंचित् अतिथिं भोजयित्वा भुज्यते, इति तत् दर्शने अस्माकं विपुला रजनिः अजनि. ॥ ४७७ ॥

अर्थः-आजे अवश्य कोइक अतिथिने जमाडीने (अमारे) जमवानुं छे, माटे तेनी राह जोवामां अमोने घणी रात्रि व्यतीत थइ छे.

तत्तूर्णं पारणेऽस्माकमस्मिन्भव पुरःसरः । इत्युक्त्वोत्थाय ते सर्वे तस्य पाणिपदेऽलगन् ॥ ४७८ ॥

अन्वयः—तत् अस्माकं अस्मिन् पारणे (त्वं) पुरःसरः भव? इति उक्त्वा ते सर्वे उत्थाय तस्य पाणिपदे अलगन्. ॥४७८॥

अर्थः—माटे अमारां आ पारणामां तुं अग्रेसर था? एम कही ते सघळा यात्राळुओ उठीने तेने हाथे पगे लग्या. ॥ ४७८ ॥

पुण्येशः केशवश्चैनमप्यवाजीगणद्गणम् । एकस्तदैव यक्षाङ्गाद्भीष्माङ्गो निर्ययौ नरः ॥ ४७९ ॥

अन्वयः—पुण्येशः केशवः च एनं गणं अपि अवाजीगणत्, तदा एव एकः भीष्मांगः नरः यक्ष अंगात् निर्ययौ. ॥ ४७९ ॥

अर्थः—(परंतु) ते पुण्यशाली केशवे तो ते समुदायनी पण अवगणना करी, तेज वखते एक भयंकर शरीरवाळो पुरुष ते यक्षना

शरीरमांथी (बहार निकळ्यो.) ॥ ४७९ ॥

**रे दूषयसि मे धर्मं मद्भक्तानवमन्यसे । भुंक्ष्व शीघ्रं न चेन्मुण्डं शतखण्डं करोमि ते ॥ ४८० ॥**

अन्वयः-रे ! मे धर्मं दूषयसि मद्भक्तान् अवमन्यसे, शीघ्रं भुंक्ष्व ? न चेत् ते मुंडं शतखंडं करोमि. ॥ ४८० ॥

अर्थः—अरे ! (तुं) मारा धर्मने दूषित करे छे! तथा (आ) मारा भक्तोनी अवगणना करे छे ! तुरत भोजन कर ? नहितर तारा मस्तकना सेंकडो गमे टुकडा करी नाखुं छुं. ॥ ४८० ॥

**इत्याक्षिप्य गिरा तीक्ष्णरूक्षया मंक्षु केशवम् । सोऽयमुद्गमयामास मुद्गरं विकरालदृक् ॥ ४८१ ॥**

अन्वयः—इति तीक्ष्णरूक्षया गिरा मंक्षु केशवं आक्षिप्य विकरालदृक् सः अयं मुद्गरं उद्गमयामास ॥ ४८१ ॥

अर्थः-एवी रीते आकरां अने निर्दय वचनथी तुरत (ते) केशवने धमकावीने भयंकर आंखोवाळो ते पुरुष मुद्गर उगामवा लाग्यो.

**हसन्हंसानुजोऽथाह किं क्षोभयसि यक्ष माम् । भवान्तरोद्भवद्भूरिभाग्यर्द्धेर्मृत्युभीः क्व मे ॥ ४८२ ॥**

अन्वयः—अथ हंसानुजः हसन् आह, (हे) यक्ष! मां किं क्षोभयसि? भवांतर उद्भवत् भाग्य ऋद्धेः मे मृत्युभीः क्व? ॥४८२॥

अर्थः—त्यारे हंसनो न्हानो भाइ ते केशव हसतो थको बोलवा लाग्यो के, भवांतरमां उत्पन्न थती छे, सौभाग्यनी समृद्धि जेने, एवा मने ते मरणनो भय क्यांथी होय? ॥ ४८२ ॥

**आचचक्षेऽन्तरिक्षेऽथ यक्षः स्वान्किंकरानिति । एतद्धर्मगुरुर्धृत्वानीय वध्योऽस्य पश्यतः ॥ ४८३ ॥**

अन्वयः—अथ यक्षः अंतरिक्षे स्वान् किंकरान् इति आचचक्षे, एतत् धर्मगुरुः धृत्वा आनीय अस्य पश्यतः वध्यः. ॥४८३॥

अर्थः—पछी ते यक्षे आकाशमां रहेला पोताना नोकरोने एम कह्युं के, आ केशवना धर्मगुरुने अहीं पकडी लावी, तेना देखतांज (तमारे) तेने मारी नाखवो. ॥ ४८३ ॥

**अथाकाशे कशापाशभृद्भिस्तत्किंकरैर्धृतम् । आर्तघोषमृषिं धर्मघोषमैक्षत केशवः ॥ ४८४ ॥**

अन्वयः—अथ आकाशे कशापाशभृद्भिः तत्किंकरैः धृतं आर्त घोषं धर्म घोषं ऋषिं केशवः ऐक्षत. ॥ ४८४ ॥

अर्थः—पछी आकाशमां चाबुक तथा पाशवाळा एवा ते यक्षना नोकरोए पकडेला, अने दुःखथी पोकार करता एवा ते धर्मघोष मुनिराजने केशवे जोया. ॥४८४॥

**स्वं शिष्यं भोजयेदानीं त्वां वा हन्मि शठं हठात्। इत्युक्तस्तेन यक्षेण मुनीशः केशवं जगौ॥४८५॥**

अन्वयः—स्वं शिष्यं इदानीं भोजय ? वा त्वां शठं हन्मि, इति तेन यक्षेण उक्तः मुनीशः केशवं जगौ. ॥ ४८५ ॥

अर्थः–तारा शिष्यने आ वखते जमाड? नहितर तने लुच्चाने मारुं छुं, एवी रीते ते यक्षे कहेवाथी ते मुनिराज केशवने कहेवालाग्या के,

**अप्यकृत्यं सृजेद्देवगुरुसङ्घकृते कृती। मामी मामीदृशा घ्नन्तु त्वद्गुरुं कुरु भोजनम्॥ ४८६ ॥**

अन्वयः—कृती देव गुरु संघकृते अकृत्यं अपि सृजेत्, ईदृशाः अमी त्वद्गुरुं मां मा घ्नंतु, भोजनं कुरु ? ॥ ४८६ ॥

अर्थः—डाह्यो माणस देव, गुरु तथा संघने अर्थे अकार्य पण करे, (वळी) आवा आ यक्षना नोकरो तारा गुरु एवा मने न मारे तो ठीक, माटे तुं भोजन कर ? ॥ ४८६ ॥

धर्माख्यानेऽपि यो वक्ति विधिमन्यापदेशतः । सत्त्वी मृत्युभिया दत्तां स पापेऽनुमतिं कुतः ॥ ४८७ ॥
तन्नूनं मद्गुरुर्नायमियं मायास्य मायिनः । इति ध्यात्वाथ मौनेन यशोधनसुतः स्थितः ॥ ४८८ ॥ युग्मम् ॥

अन्वयः—यः धर्मआख्याने अपि अन्यअपदेशतः विधिं वक्ति, सः सत्त्वी मृत्युभिया पापे अनुमतिं कुतः दत्तां ? ॥ ४८७ ॥ तत् नूनं अयं मद्गुरुः न, इयं अस्य मायिनः माया, इति ध्यात्वा अथ यशोधनसुतः मौनेन स्थितः. ॥ ४८८ ॥ युग्मं ॥

अर्थः—जे मुनि धर्मकथामां पण बीजाना मिषथी विधिमार्गनी प्ररूपणा करे छे, एवा ते बहादूर मुनिराज मृत्युना डरथी पाप कार्यमां अनुमति केम आपी शके ? ॥ ४८७ ॥ माटे खरेखर आ मारा गुरु नथी, आ (सघळी) आ कपटी यक्षनी मायाजाळ छे, एम विचारी यशोधन शेठनो पुत्र ते केशव मौन रह्यो. ॥ ४८८ ॥ युग्मं ॥

मुनौ मुद्गरमुद्यम्य त्वद्गुरुं हन्मि भुंक्ष्व वा । इति कोपकरालाक्षो जगौ यक्षोऽथ केशवम् ॥ ४८९ ॥

अन्वयः—अथ कोपकरालाक्षः यक्षः मुनौ मुद्गरं उद्यम्य त्वद्गुरुं हन्मि, वा भुंक्ष्व ? इति केशवं जगौ. ॥ ४८९ ॥

अर्थः—पछी क्रोधथी भयंकर आंखवाळो ( ते ) यक्ष ( ते ) मुनिप्रते मुद्गर उगामीने, तारा ( आ ) गुरुने मारुं छुं, नहितर तुं भोजन कर ? एम केशवने कहेवा लाग्यो. ॥ ४८९ ॥

सोऽपि व्याचष्ट रे मायिन्ममायं न गुरुः स हि । तादृक्षचारुचारित्रपात्रं न त्वादृशां वशः ॥४९०॥

अन्वयः—सः अपि व्याचष्ट, रे मायिन् ! अयं मम गुरुः न, हि तादृक्ष चारु चारित्र पात्रं सः त्वादृशां वशः न. ॥ ४९० ॥

अर्थः-(त्यारे) ते केशवे पण कह्युं के, अरे! कपटी ! आ मारा गुरु नथी, केमके तेवा उत्कृष्ट चारित्रवाळा ते तारा जेवाने वश न थाय.

त्वद्गुरुस्त्वद्गुरुः सोऽस्मि कृपाब्धे भुङ्क्ष्व रक्ष माम् । इत्यारटन्नथ मुनिस्तन्मुद्गरहतोऽपतत् ॥४९१॥

अन्वयः-अथ सः त्वद्गुरुः त्वद्गुरुः अस्मि हे कृपाब्धे! भुङ्क्ष्व? मां रक्ष? इति आरटन् मुनिः तन्मुद्गरहतः अपतत्. ॥४९१॥

अर्थः--पछी ते (हुं) तारो गुरु, तारो गुरु छुं. एम बूमो मारता ते मुनि ते मुद्गरथी घायेल थइ (नीचे) पड्या. ॥ ४९१ ॥

तं व्यसुं वीक्षमाणस्य केशवस्याग्रतस्ततः । एत्यादत्त गिरं यक्षो मुद्गरभ्रमिभीषणः ॥ ४९२ ॥

अन्वयः-ततः व्यसुं तं वीक्षमाणस्य केशवस्य अग्रतः एत्य मुद्गरभ्रमिभीषणः यक्षः गिरं आदत्त ॥ ४९२ ।

अर्थः-पछी प्राणरहित थयेला ते गुरुने जोता एवा (ते) केशवनी आगळ आवीने मुद्गरना भ्रमणथी भयंकर थयेलो (ते) यक्ष बोलवा लाग्यो के, ॥ ४९२ ॥

**सम्प्रत्यश्नासि चेत्तत्ते जीवयामि गुरुं जवात् । वितरामितरामृद्धिं प्राज्यं राज्यं च किंचन ॥ ४९३ ॥**

अन्वयः-चेत् संप्रति अश्नासि, तत् ते गुरुं जवात् जीवयामि, च ऋद्धिं किंचन प्राज्यं राज्यं वितरामितरां ॥ ४९३ ॥

अर्थः-जो आ वखते तुं भोजन करे, तो तारा (आ) गुरुने तुरत (हुं) जीवता करुं, तथा (तने) समृद्धि अने केटलुंक सुंदर राज्य पण आपुं. ॥ ४९३ ॥

**एतन्मुद्गरनिर्घातनिर्विघ्नगगनक्रमः । पथि कीनाशहर्म्यस्य पथिकीक्रियसेऽन्यथा ॥ ४९४ ॥**

अन्वयः—अन्यथा एतत् मुद्गर निर्घात निर्विघ्न गगन क्रमः कीनाश हर्म्यस्य पथि पथिकी क्रियसे. ॥ ४९४ ॥

अर्थः—नहितर आ मुद्‍गरना प्रहारथी सुगम थनारुं छे आकाशगमन जेनुं (एवा तने) यमना घरने मार्गे रवानो करीश ॥४९४॥

ततः पुण्यसुधासिन्धुहंसो हंसानुजो हसन् । दशनांशुमिषप्रेक्ष्यमाणसत्त्वगुणो जगौ ॥ ४९५ ॥

अन्वयः—ततः पुण्य सुधा सिंधु हंसः दशनांशु मिष प्रेक्ष्यमाण सत्त्वगुणः हंसानुजः हसन् जगौ. ॥ ४९५ ॥

अर्थः—पछी पुण्यरूपी अमृतनी नदीमां हंससरखो, तथा दांतोना किरणोना मिषथी देखातो छे सत्त्वगुण जेनो एवो हंसनो न्हानो भाइ केशव हसतो थको कहेवा लाग्यो के, ॥ ४९५ ॥

नैवायं मद्गुरुः किंच त्वया जीवन्ति चेन्मृताः । तदमीषां स्वभक्तानां सर्वाञ्जीवय पूर्वजान् ॥ ४९६ ॥

अन्वयः—अयं मद्गुरुः न एव, किं च त्वया चेत् मृताः जीवंति, तत् अमीषां स्वभक्तानां सर्वान् पूर्वजान् जीवय? ॥४९६॥

अर्थः—आ मारा गुरुज नथी, वळी तुं जो मृत्यु पामेलाओने जीवाडी शकतो हो, तो आ तारा भक्तोना (मृत्यु पामेला)सघळा पूर्वजोने जीवता कर? ॥ ४९६ ॥

**किं राज्यदानशक्तेन नामी राज्यभृतः कृताः । किं भापयसि मां मृत्योः का भीर्नियतभाविनः ॥ ४९७ ॥**

अन्वयः—राज्यदान शक्तेन (त्वया)अमी राज्यभृतः किं न कृताः ? मां किं भापयसि ? नियतभाविनः मृत्योः का भीः॥४९७

अर्थः—( वळी ) राज्य आपवानी शक्तिवाळा एवा तें आ ( तारा भक्तोने ) राज्यना मालीक केम न कर्या ? मने शामाटे डरावे छे ? निश्चयें थनारा मृत्युथी शुं डरवानुं छे ? ॥ ४९७ ॥

**एवं नियमवाग्दक्षं यक्षोऽयं क्षान्तिमानिव । प्रहृष्टो हृष्टरोमालिः समालिंग्य जगाद तम् ॥४९८॥**

अन्वयः—एवं नियमवाग्दक्षं तं क्षांतिमान् इव प्रहृष्टः हृष्टरोमालिः अयं यक्षः समालिंग्य जगाद. ॥ ४९८ ॥

अर्थः—एवी रीते (पोताना) नियम तथा वचनमां चतुर एवा ते केशवने क्षमावानननी पेठे खुशी थयेला, तथा रोमांचित थयेला ते यक्षे भेटीने कह्युं के, ॥ ४९८ ॥

**साधु मित्र धियां पात्र न स्यादेष गुरुस्तव । मृता मया न जीवन्ति नैव राज्यं च दीयते ॥ ४९९ ॥**

अन्वयः-- (हे) मित्र ! (हे) धियां पात्र ! साधु, एषः तव गुरुः न स्यात्, च मृताः न जीवंति, मया राज्यं न एव दीयते.
अर्थः--हे मित्र ! हे बुद्धिना भंडार ! ( तारुं कहेवुं ) सत्य छे, आ तारा गुरु न संभवी शके, वळी मरेला जीवता थता नथी, तेम माराथी कोइने पण राज्य आपी शकायज नही. ॥ ४९९ ॥

इत्थमुक्तेऽथ यक्षेन्द्रे सहासं सहसोत्थितः । मुनिरूपं परित्यज्य खं ययौ यक्षकिंकरः ॥ ॥ ५०० ॥

अन्वयः-अथ यक्षेंद्रे इत्थं उक्ते यक्षकिंकरः सहासं सहसा उत्थितः मुनिरूपं परित्यज्य खं ययौ. ॥ ५०० ॥
अर्थः--हवे ते यक्षेंद्र एवी रीते कह्याबाद यक्षनो ते नोकर हास्यसहित एकदम उभो थयो, तथा मुनिनुं स्वरूप तजीने आकाशमां उडी गयो ॥ ५०० ॥

विस्मयस्मेरवक्त्राक्षमनया चित्रमायया । उवाचाचलचित्तेशं केशवं यक्षपुङ्गवः ॥ ५०१ ॥

अन्वयः-अनया चित्र मायया विस्मय स्मेर वक्राक्षं अचलचित्तेशं केशवं यक्षपुंगवः उवाच. । ५०१ ॥

अर्थः–आ विचित्र प्रकारनी मायाथी आश्चर्य सहित विकस्वर मुख तथा आंखोवाळा, अने निश्चळ मनवाळाओमां अग्रेसर एवा ते केशवने ते यक्षराज कहेवा लाग्यो के, ॥ ५०१ ॥

**खिन्नः सप्तोपवासैस्त्वं क्लिन्नश्चाध्वविहारतः । विश्रम्येह निशामह्नि सहैभिः कुरु पारणम् ॥ ५०२ ॥**

अन्वयः—त्वं सप्तोपवासैः खिन्न', च अध्वविहारतः क्लिन्नः, इह निशां विश्रम्य अह्नि एभिः सह पारणं कुरु? ॥ ५०२ ॥

अर्थः—तुं सात उपवासोथी क्षीण थयो छुं, तथा मुसाफरीथी पण थाकी गयो छुं, माटे अहीं रात्रि रहीने दिवस उग्ये आ यात्राळुओनी साथे पारणुं करजे. ॥ ५०२ ॥

**इत्युक्त्वादर्शयत्तस्मै स तल्पं शक्तिकल्पितम् । केशवोऽस्मिन्विशश्राम श्रेयसीव यशश्चयः ॥ ५०३ ॥**

अन्वयः—इति उक्त्वा सः तस्मै शक्तिकल्पितं तल्पं अदर्शयत्, श्रेयसि यशश्चयः इव केशवः अस्मिन् विशश्राम. ॥ ५०३ ॥

अर्थः—एम कहीने ते यक्षे ते केशवने पोतानी शक्तिथी बनावेली शय्या देखाडी. ( त्यारे ) कल्याणमां जेम यशनो समूह

(विश्राम पामे) तेम ते केशवे ते शय्यापर विश्राम लीधो. ॥ ५०३ ॥

यक्षयात्राजनैर्यक्षादिष्टैः संवाहितक्रमः । केशवोऽकलयन्निद्रामुन्निद्रसुकृतक्रमः ॥ ५०४ ॥

अन्वयः—यक्षादिष्टैः यक्ष यात्रा जनैः संवाहित क्रमः उन्निद्र सुकृत क्रमः केशवः निद्रां अकलयत्. ॥ ५०४ ॥

अर्थः—यक्षे आज्ञा करेला ते यात्राळुओवडे दबाता पगोवाळो, (अर्थात् ते यात्राळुओ तेना पगनी चंपी करवा लाग्या) तथा उदय पामेली छे पुण्यपरंपरा जेनी, एवो ते केशव (त्यां) निद्रा करवा लाग्यो. ॥ ५०४ ॥

विभावरी विभातेयं निद्रा विद्राव्यतामिति । तं प्रत्यक्षो जगौ यक्षो निद्रातन्द्रालुलोचनम् ॥ ५०५ ॥

अन्वयः-इयं विभावरी विभाता, निद्रा विद्राव्यतां, इति निद्रा तंद्रालु लोचनं तं प्रत्यक्षः यक्षः जगौ. ॥ ५०५ ॥

अर्थः-आ रात्रि खलास थइ छे, माटे (तुं) निद्रा उडाड? एवी रीते (हजु) निद्राथी घेराती आंखवाळा ते केशवने ते यक्षे प्रत्यक्षथइनेकह्युं.

अथ निद्रादरिद्राक्षो विश्वं वीक्ष्य दिनोज्ज्वलम् । नभोऽर्कभूषितं चेति चिन्तयामास केशवः ॥ ५०६ ॥

अन्वयः--अथ निद्रा दरिद्राक्षः केशवः विश्वं दिनोज्ज्वलं, च नभः अर्कं भूषितं वीक्ष्य इति चिंतयामास. ॥ ५०६ ॥

अर्थः-त्यारे निद्राथी घेराती आंखवाळा (ते) केशवे जगतने दिवसथी उज्ज्वल थयेलुं, तथा आकाशने सूर्यवडे शोभितुं थयेलुं जोइने एम विचार्युं के, ॥ ५०६ ॥

ब्राह्म एव मुहूर्तेऽहमन्वहं कृत्यनिष्ठधीः । स्वयं यामि त्रियामान्तयामसुप्तोऽप्यनिद्रताम् ॥ ५०७ ॥

अन्वयः-कृत्यनिष्ठधीः अहं त्रियामा अंतयाम सुप्तः अपि अन्वहं ब्राह्मे एव मुहूर्ते स्वयं अनिद्रतां यामि. ॥ ५०७ ॥

अर्थः-नित्यकर्ममां निश्चल बुद्धिवाळो हुं रात्रिने छेल्ले पहोरे सूवा छतां पण हमेशां बेघडी रात्रि बाकी होय त्यारे पोतानी मेळेज निद्रारहित थाउं छुं. ॥ ५०७ ॥

अह्नि यामार्धमात्रेऽपि त्रियामार्धशयोऽप्यहम् । स्वयं नाद्य विनिद्रत्वमासदं किमिदं किल ॥ ५०८ ॥

अन्वयः-त्रियामा अर्धशयः अपि, यामार्धमात्रे अपि अह्नि अद्य अहं स्वयं विनिद्रत्वं न आसदं, किल इदं किं? ॥ ५०८ ॥

अर्थः—अर्धी रात्रिए छतां छतां पण, तेमज अर्धो पहोर दिवस चड्या छतां पण आजे हुं मारी पोतानी मेळे जाग्यो नही, माटे खरेखर आ ते शुं (कहेवाय?) ॥ ५०८ ॥

**दिवसेऽप्यद्य किं निद्राविवशे मे दृशौ भृशम् । किं नान्तः पद्मवीकाशसुरभिः श्वासमारुतः ॥ ५०९ ॥**

अन्वयः—अद्य दिवसे अपि मे दृशौ भृशं निद्राविवशे किं? अंतः श्वासमारुतः पद्मवीकाश सुरभिः कि न? ॥ ५०९ ॥

अर्थः—(वळी) आजे दिवसे पण मारी आंखो निद्राथी वधारे केम घेराय छे? तथा अंदरना श्वासनो वायु विकस्वर थयेला कमल सरखो सुगंधी केम नथी? ॥ ५०९ ॥

**इति शङ्काजुषं यक्षस्तमूचे मुञ्च जिह्मताम् । प्रातःकृत्यानि कृत्वाशु भूहार कुरु पारणम् ॥ ५१० ॥**

अन्वयः—इति शंकाजुषं तं यक्षः ऊचे, (हे) भूहार! जिह्मतां मुंच ? आशु प्रातः कृत्यानि कृत्वा पारणं कुरु? ॥ ५१० ॥

अर्थः—एवीरीते शंकाशील थयेला ते केशवने यक्षे कह्युं के, (हे) पृथ्वीने शोभावनारा केशव ! (हवे) आळस तजी दे? तथा

तुरत प्रभातनुं नित्यकर्म करीने पारणुं कर? ॥ ५१० ॥

**सोऽप्युवाच न वञ्च्योऽहं यक्ष दक्षतया तव । विशालैव निशाद्यापि त्वन्मायोत्थमहर्महः ॥ ५११ ॥**

अन्वयः-सः अपि उवाच, (हे) यक्ष! तव दक्षतया ! अहं वंच्यः न, अद्य अपि निशा विशाला एव, अहर्महः त्वन्मायोत्थं॥५११॥

अर्थः—(त्यारे) ते केशवे पण कह्युं के, (हे) यक्ष ! तारी कपटजाळथी हुं ठगाउं तेम नथी, हजु पण रात्रि घणीज छे, (आ) दिवसनुं तेज तो तारी (आ बनावटी) मायाथी थयेलुं छे. ॥ ५११ ॥

**इत्यस्य जल्पतो मूर्ध्नि पुष्पवृष्टिर्दिवोऽपतत् । स त्वं धीमञ्जय जयेत्यभून्नभसि भारती ॥ ५१२ ॥**

अन्वयः-इति जल्पतः अस्य मूर्ध्नि दिवः पुष्पवृष्टिः अपतत् (हे) धीमन् ! सः त्वं जय ? जय ? इति नभसि भारती अभूत्.

अर्थः—एम बोलता एवा आ केशवना मस्तकपर आकाशमांथी पुष्पोनी वृष्टि थइ, तथा (हे) बुद्धिवान् केशव ! ते तुं जय पाम ? जय पाम ? एम आकाशवाणी थइ. ॥ ५१२ ॥

पुरः सुरमसौ कंचिच्चञ्चदर्चिषमैक्षत । न यक्षं न च यक्षौको न च यक्षार्चकान्वने ॥ ५१३ ॥

अन्वयः-असौ पुरः चंचत् अर्चिषं कंचित् सुरं ऐक्षत, च वने न यक्षं, च न यक्षओकः, यक्षअर्चकान्. ॥ ५१३ ॥

अर्थः-(वळी) तेणे (पोतानी) आगळ चळकता तेजवाळा कोइक देवने दीठो, परंतु वनमां न यक्षने, के न यक्षना मंदिरने, के यक्षना पूजारी एवा ते यात्राळुओने पण न जोया. ॥ ५१३ ॥

स्मितांशुकुसुमश्रेणिशृङ्गारसुरभीकृतम् । मुखश्रीलक्षितप्रीतिरित्यादत्त वचः स च ॥ ५१४ ॥

अन्वयः-च मुख श्री लक्षित प्रीतिः सः स्मित अंशु कुसुम श्रेणि शृंगार सुरभीकृतं इति वचः आदत्त. ॥ ५१४ ॥

अर्थः-वळी मुखनी शोभाथी देखाडेली छे प्रीति जेणे एवो ते देव हास्यना किरणोरूपी पुष्पोनी माळाथी अलंकृत तथा सुगंधि थयेलुं वचन बोल्यो के, ॥ ५१४ ॥

एकः पुण्यवतां रत्नं निःसपत्नगुणो भवान् । भवादृशां प्रसूत्यैव रत्नगर्भा बभूव भूः ॥ ५१५ ॥

अन्वयः-पुण्यवतां रत्नं, निःसपत्नगुणः भवान् एकः, भवादृशां प्रसूत्या एव भूः रत्नगर्भा बभूव. ॥ ५१५ ॥

अर्थः-पुण्यवानोमां रत्नसमान, तथा अनुपम गुणोवाळो तुं एकज छो, तथा तारा जेवाओनी हयातिथी (आ) पृथ्वी "रत्नगर्भा" (रत्नोने उत्पन्न करनारी) थयेली छे. ॥ ५१५ ॥

शृणु सत्त्वभराश्रान्तस्वान्त वृत्तान्तमांतरम् । मध्येसभमिति प्रोच्चैश्चक्रे शक्रस्तव स्तवम् ॥ ५१६ ॥

अन्वयः—(हे) सत्त्व भर अश्रांत स्वांत! आंतरं वृत्तांतं शृणु? मध्येसभं शक्रः प्रोच्चैः तव स्तवं चक्रे. ॥ ५१६ ॥

अर्थः—पराक्रमना समूहथी नथी थाकेलुं हृदय जेनुं एवा हे केशव! तुं (मारा) हृदयनो वृत्तांत सांभळ? सभानी अंदर इंद्रे घणीघणी रीते तारी प्रशंसा करी. ॥ ५१६ ॥

अहो वरेण्यतारुण्यः पुण्यवान्सुखलालितः । यशोधनस्य वणिजस्तनुजो मनुजोत्तमः ॥ ५१७ ॥

रजनीभोजनत्यागात्केशवः क्लेशकोटिभिः । अचलाचलचैतन्यश्चाल्यते नामरैरपि ॥ ५१८ ॥ युग्मम्॥

अन्वयः—अहो! वरेण्य तारुण्यः, पुण्यवान्, सुख लालितः, मनुजोत्तमः, अचल ।अचल चैतन्यः यशोधनस्य वणिजः तनुजः केशवः अमरैः क्लेशकोटिभिः अपि रजनी भोजन त्यागात् न चाल्यते, ॥ ५१७ ॥ ५१८ ॥ युग्मं ॥

अर्थः—अहो! मनोहर युवावस्थावाळो, पुण्यशाली, सुखमां उछरेलो, मनुष्योमां श्रेष्ठ, अने पृथ्वीनी पेठे निश्चल मनवाळो यशोधन शेठनो पुत्र केशव देवोथी क्रोडोगमे दुःखो अपाया छतां पण (तेना) रात्रिभोजन त्याग नामना व्रतथी चलायमान थइ शके तेम नथी. ॥ ५१७ ॥ ५१८ ॥ युग्मं ॥

तदाकर्ण्य तदा कर्णतप्तत्रपुसमं वचः। स्वभावादाभवादेव देवत्वेऽपि सुखोचिते ॥ ५१९ ॥

दुःखितोऽन्यप्रशंसाभिर्देवः सर्वाभिसारवान्। महर्द्धिर्वह्निनामाहमिहागां त्वां परीक्षितुम् ॥५२०॥युग्मम्॥

अन्वयः—तदा कर्ण तप्त त्रपुसमं वचः आकर्ण्य सुखोचिते देवत्वे अपि आभवात् एव स्वभावात्॥ ५१९ ॥ अन्य प्रशंसाभिः दुःखितः महर्द्धिः वह्निनामा अहं देवः सर्वाभिसारवान् त्वां परीक्षितुं इह आगां ॥ ५२० ॥ युग्मं ॥

अर्थः—ते वखते कानमां (रेडेला) तपावेला सीसासरखुं (इंद्रनुं)ते वचन सांभळीने, सुखने लायक एवा देवपणाना पण छेक जन्मथी स्वभावेज ॥ ५१९ ॥ बीजानी प्रशंसाथी दुःख पामतो (ईर्षालु थयेलो) महोटी समृद्धिवाळो हुं वह्नि नामनो देव (मारा) सघळा सेवको सहित तारी परीक्षा करवाने अहीं आव्यो छुं. ॥ ५२० ॥ युग्मं ॥

त्रैलोक्यचालनोत्तालशक्तिनापि न ते मया । रोमाप्यचालि नियमाद्वीरः कोऽस्तु भवानिव ॥ ५२१ ॥

अन्वयः—त्रैलोक्य चालन उत्ताल शक्तिना अपि मया ते रोम अपि नियमात् न अचालि, भवान् इव कः वीरः अस्तु ॥५२१॥

अर्थः—त्रणे लोकने उथलावी पाडवानी महान शक्तिवाळो एवो पण हुं तारां रुंवाडांने पण नियमथी चलावी शक्यो नहीं, माटे खरेखर तारा समान (बीजो) कोण वीरपुरुष होइ शके? ॥ ५२१ ॥

वह्निना परितप्तोऽपि मूलोत्तरगुणाग्रणीः । सुवर्ण इव सद्वर्णभूमिर्भ्रातर्भवानभूत् ॥ ५२२ ॥

अन्वयः—(हे) भ्रातः! भवान् सुवर्णः इव वह्निना परितप्तः अपि मूलोत्तरगुणाग्रणीः सद्वर्णभूमिः अभूत्. ॥ ५२२ ॥

अर्थः-(वळी) हे भाइ! तुं तो सुवर्णनी पेठे अग्निवडे (मारावडे) बहु तपाव्या छतां पण स्वाभाविक उत्तम गुणोवडे अग्रेसर थयोथको (लीधेल नियममां निश्चल रह्योथको) उत्तम रंगना स्थान सरखो (उत्तम जातिना स्थानरूपज) रह्यो. ॥ ५२२ ॥

**यक्षादिक्षोभसंरम्भो यः कश्चिद्विदधे मया । तं मयि प्रणयं तन्वन् त्वं सहस्व सहस्व भोः ॥ ५२३ ॥**

अन्वयः-यः कश्चित् यक्षादिक्षोभसंरंभः मया विदधे, तं मयि प्रणयं तन्वन् भोः त्वं सहस्व? सहस्व? ॥ ५२३ ॥

अर्थः-जे कंइ यक्षनी विकुर्वणा आदिकथी (तने)डरावावाने में धांधल करी, ते माटे मारापर कृपा करी, तारे क्षमाकरवी.

**किं च याचस्व किंचिन्मां क वा याञ्चा भवादृशाम् । त्वदङ्गस्पृक्पयःसिक्तो रोगी नीरुग्भविष्यति ।५२४।**

अन्वयः--किं च मां किंचित् याचस्व? वा भवादृशां यांचा क? त्वदंगस्पृक् पयः सिक्तः रोगी नीरुग् भविष्यति ॥५२४॥

अर्थः--वळी (तुं) मारीमासे कंइक माग? अथवा तारा जेवाने याचना क्यांथी संभवे? तारां शरीरना स्पर्शवाळा जलथी स्नान करेलो रोगी माणस रोगरहित थशे. ॥ ५२४ ॥

यच्च किंचित्कदाचित्त्वमातुरश्चिन्तयिष्यसि । भविष्यत्याशु तत्पुण्यशुभानां किमु दुर्लभम् ॥ ५२५ ॥

अन्वयः—च आतुरः त्वं कदाचित् यत् किंचित् चिंतयिष्यसि, तत् आशु भविष्यति, पुण्यशुभानां किमु दुर्लभं? ॥ ५२५ ॥

अर्थः—वळी अणीने समये तुं कोइक वखते जे कंइ चिंतवीश, ते (कार्य) तुरत थशे, केमके पुण्यशालिओने शुं दुर्लभ छे? ॥५२५॥

कस्यापि नगरस्यान्ते त्वां मुञ्चाम्यधुना पुनः । क्लेशावेशाय तुच्छापि त्वादृशामंह्रिचारिका ॥ ५२६ ॥

अन्वयः—अधुना पुनः त्वां कस्य अपि नगरस्य अंते मुंचामि, त्वादृशां तुच्छा अपि अंह्रि चारिका क्लेशावेशाय. ॥ ५२६ ॥

अर्थः—हवे तो तने कोइक नगरनी नजदीक मूकुं, केमके तारा जेवाना चरणोनी स्वल्प सेवा पण (अथवा तारा जेवाना स्वल्प पगलां पण) दुःखनो नाश करनारा छे. ॥ ५२६ ॥

इत्युक्त्वा द्युतिदीप्ताशस्तिरोधत्त सुरोत्तमः । प्रान्ते पुरस्य कस्यापि स्वमपश्यच्च केशवः ॥ ५२७ ॥

अन्वयः—इति उक्त्वा द्युति दीप्त आशः सुरोत्तमः तिरोधत्त, च केशवः स्वं कस्य अपि पुरस्य प्रांते अपश्यत्. ॥ ५२७ ॥

अर्थः—एम कहीने (पोतानी) कांतिथी तेजस्वी करेल छे दि.ाओ जेणे, एवो उत्तम देव अदृश्य थइ गयो. अने ते केशव पोताने कोइक नगरनी पासे (उभेलो) जोवा लाग्यो · ५२७ ॥ चतुर्भिः कलापकं ॥

प्राचीनाचलचूलाग्रचुम्बिन्यम्बुजबान्धवे । कृतप्रातःक्रियोऽथायं प्राचलत्पुरमीक्षितुम् ॥ ५२८ ॥

अन्वयः—अथ अंबुज बांधवे प्राचीन अचल चूला अग्र चुंबिनि कृत प्रातः क्रियः अयं पुरं ईक्षितुं प्राचलत् ॥ २८ ॥

अर्थः—पछी सूर्य ज्यारे पूर्वाचलना शिखरना अग्र भागपर आव्यो, (अर्थात् सूर्योदय थयो) त्यारे प्रभातनी नित्यक्रिया करीने ते केशव ते नगर जोवामाटे (आगळ) चालवा लाग्यो. ॥ ५२८ ॥

धर्माख्यानगिराहूतः स जीमूतरवश्रिया । आरामे वामतः सूरिं सूरनामानमानमत् ॥ ५२९ ॥

अन्वयः—वामतः आरामे जीमूतरवश्रिया धर्माख्यानगिरा आहूतः सः सूरनामानं सूरिं आनमत्. ॥ २९ ॥

अर्थः—(एवामां) डाबी बाजुए (आवेला) बगीचामां मेघनी गर्जनासरखी शोभती धर्मसंबंधी व्याख्याननी वाणीथी बोलावायेला

एवा ते केशवे (त्यां जइ) सूर नामना आचार्यने वांद्या. ॥ ५२९ ॥

देशनारसपीयूषरसनप्रसृतश्रुतिः । स व्यक्तवासनस्तत्र युक्तमासनमासदत् ॥ ५३० ॥

अन्वयः—देशना रस पीयूष रसन प्रसृत श्रुतिः, व्यक्त वासनः सः तत्र युक्तं आसनं आसदत्. ॥ ५३० ॥

अर्थः—(ते आचार्य महाराजना) उपदेशना रसरूपी अमृतना स्वादथी विकस्वर थया छे कर्णो जेना, तथा प्रगटरीते (धर्मनी) वासनावाळो ते केशव त्यां योग्य जगाए बेठो. ॥ ५३० ॥

पुरस्य तस्य साकेतनाम्नः स्वामी धनञ्जयः । देशनान्ते मुनीशं तं मुदा नत्वा व्यजिज्ञपत् ॥ ५३१ ॥

अन्वयः—साकेत नाम्नः तस्य पुरस्य स्वामी धनंजयः देशनांते तं मुनिं मुदा नत्वा व्यजिज्ञपत्. ॥ ५३१ ॥

अर्थः-(पछी) साकेतपुरनामना ते नगरनो स्वामी धनंजय देशनाने अंते ते मुनिराजने हर्षथी वांदीने कहेवा लाग्यो के, ।५३१।

प्रभो जरापराभूतो व्रतग्रहचिरस्पृहः । अपुत्रः कुत्र राज्यं स्वं न्यस्यामीत्यस्मि दुःखितः ॥ ५३२ ॥

अन्वयः—(हे) प्रभो! जरापराभूतः, व्रत ग्रह चिर स्पृहः, अपुत्रः स्वं राज्यं कुत्र न्यस्यामि? इति दुःखितः अस्मि. ॥ ५३२ ॥

अर्थः—हे प्रभु! जरावस्थाए पहोंचेलो, तथा घणा काळथी चारित्र लेवानी इच्छावाळो (हुं) पुत्ररहित होवाथी मारुं (आ) राज्य कोने सोंपुं? ए विचारथी हुं चिंतातुर थयेलो छुं. ॥ ५३२ ॥

मत्पुण्येनेव मूर्तेन पुंसा दिव्येन केनचित् । स्वप्ने ममेति शान्तेन निशान्तेऽद्य न्यवेद्यत ॥ ५३३ ॥

अन्वयः—अद्य निशांते स्वप्ने मूर्तेन मत्पुण्येन इव केनचित् शांतेन दिव्येन पुंसा मम इति न्यवेद्यत. ॥ ५३३ ॥

अर्थः—आजे परोढीये स्वप्नमां जाणे देहधारी मारां पुण्येज होय नही? तेम कोइक शांत प्रकृतिवाळा दिव्य पुरुषे मने स्वप्नमां एम जणाव्युं के, ॥ ५३३ ॥

प्रातर्देशान्तरादेति यस्ते गुरुपुरः स्थिते । योग्ये तस्मिन्भुवं न्यस्य भव पूर्णमनोरथः ॥ ५३४ ॥

अन्वयः—यः प्रातः देशांतरात एति, ते गुरुपुरः स्थिते तस्मिन् योग्ये भुवं न्यस्य पूर्णमनोरथः भव? ॥ ५३४ ॥

अर्थः—जे प्रभातमां देशांतरथी आवे, तथा जे तारा गुरुपासे आवीने बेशे, एवा ते योग्य पुरुषने पृथ्वी ( राज्य ) सोंपीने तुं संपूर्ण मनोरथवाळो था ! (अर्थात् तारो चारित्र लेवानो मनोरथ पूर्ण कर !)।। ५३४ ।।

अथास्तनिद्रो निर्माय प्रातःकृत्यमिहागमम् । अपश्यं चैनमायातमाकारख्यातसत्कुलम् ॥ ५३५ ॥

अन्वयः—अथ अस्तनिद्रः प्रातः कृत्यं निर्माय इह आगमं, च आकार ख्यात सत्कुलं एनं आयातं अपश्यं. ।। ५३५ ।।

अर्थः—पछी निद्रा उड्याबाद प्रातःकाळनुं नित्यकर्म करीने (हुं) अहीं आव्यो, (त्यां तो) जेनो आकारज उत्तम कुल जणावेछे, एवा आ पुरुषने (केशवने अहीं) आवेलो में जोयो. ।। ५३५ ।।

अथादिशद्गुरुर्ज्ञानी केशवस्य शुभात्मनः । वृत्तं निशाशनत्यागनिश्चयामोदसुन्दरम् ॥ ५३६ ॥

अन्वयः—अथ ज्ञानी गुरुः शुभ आत्मनः केशवस्य निशा अशन त्याग निश्चय आमोद सुंदरं वृत्त आदिशत्. ।। ५३६ ।।

अर्थः—पछी ज्ञानी एवा ते गुरुमहाराजे निर्मल आत्मावाळा एवा ते केशवनुं रात्रिभोजनत्यागनानिश्चयरूपी सुगंधिथी मनोहर

थयेलुं वृत्तांत (ते राजाने) कही संभळाव्युं. ।। ५३६ ।।

**मम केनोपदिष्टोऽयमिति पृष्टेऽथ भूभुजा । वह्निनामुष्य सत्कर्महृष्टेनेति गुरुर्जगौ ॥ ५३७ ॥**

अन्वयः—अथ मम अयं केन उपदिष्टः ? इति भूभुजा पृष्टे अमुष्य सत्कर्महृष्टेन वह्निना इति गुरुः जगौ. ।। ५३७ ।।

अर्थः–हवे मने आ केशवने कोणे चींध्यो ? एम राजाए पूछवाथी, आना सुकृतथी खुशी थयेला वह्नि नामना देवे (चींध्यो छे) एम गुरुमहाराजे (राजाने) कह्युं. ।। ५३७ ।।

**इति श्रुत्वा गुरुं नत्वा सत्त्वाधिकगुरुः पुरम् । केशवेन समं प्रीतः प्रविवेश विशां विभुः ॥ ५३८ ॥**

अन्वयः—इति श्रुत्वा गुरुं नत्वा सत्त्वाधिकगुरुः विशां विभुः प्रीतः केशवेन समं पुरं प्रविवेश. ।। ५३८ ।।

अर्थः–एम सांभळीने गुरुमहाराजने वांदी पराक्रमथी अधिक भारी थयेलो ते राजा आनंदथी (ते) केशवने साथे लेइ नगरमां आव्यो.

**स्वराज्ये केशवं भूमानभ्यषिञ्चन्महोत्सवैः । स्वयं सूरगुरोः पार्श्वे तदैव व्रतन ग्रहीत् ॥ ५३९ ॥**

अन्वयः—तदा एव भूमान् स्वराज्ये महोत्सवैः केशवं अभ्यषिंचत्. स्वयं सूरगुरोः पार्श्वे व्रतं अग्रहीत्. ॥ ५३९ ॥

अर्थः—(पछी) तेज वखते राजाए पोताना राज्यपर महोत्सवपूर्वक ते केशवनो राज्याभिषेक कर्यो, अने पोते (ते) सूराचार्यपासे दीक्षा लीधी. ॥ ५३९ ॥

ययौ श्रीकेशवो राजा नन्तुं देवान्विवेकवान् । सामात्यस्तत्र चैत्येषु पताकाभासुरे पुरे ॥ ५४० ॥

अन्वयः—विवेकवान् श्रीकेशवः राजा स अमात्यः पताकाभासुरे तत्र पुरे चैत्येषु देवान् नंतुं ययौ. ॥ ५४० ॥

अर्थः—पछी विवेकी एवो ते श्रीकेशवराजा मंत्री सहित पताकाओ वडे शोभिता एवा ते नगरमां रहेल देवमंदिरोमां देवोने वांदवा माटे गयो. ॥ ५४०

विहितातुल्यमङ्गल्यः स्वसौधे शुद्धधीर्व्यधात् । दुःस्थितानां स दानेन तारणः पारणस्थितिम् ॥ ५४१ ॥

अन्वयः—विहित अतुल्य मंगल्यः, शुद्धधीः, दानेन दुःस्थितानां तारणः सः स्वसौधे पारण स्थितिं व्यधात्. ॥ ५४१ ॥

अर्थः-करेलां छे अनुपम मंगलकार्यो जेणे, तथा निर्मल बुद्धिवाळा, अने दानवडे दीन जनोने तारनारा, एवा ते केशव राजाए पोताना मेहेलमां (आवीने) पारणुं कर्युं. ॥ ५४१ ॥

प्रतापाक्रान्तसीमालभूपालः पालयन्प्रजाम् । स राज्यं न्यायनैपुण्यहृष्यन्मन्त्रिजनोऽतनोत् ॥ ५४२ ॥

अन्वयः—प्रताप आक्रांत सीमाल भूपालः, न्याय नैपुण्य हृष्यत् मंत्रिजनः सः प्रजां पालयन् राज्यं अतनोत्. ॥ ५४२ ॥

अर्थः—पराक्रमथी जीतेला छे सीमाडाना राजाओने जेणे, तथा न्यायनी चतुराइथी खुशी थता छे मंत्रिलोको जेनाथी, एवो ते केशवराजा प्रजानुं पाळन करतो थको राज्य करवा लाग्यो. ॥ ५४२ ॥

कदाचित्पितुरुत्कण्ठामाप भूपो गवाक्षगः । ददर्श च पथि श्रान्तं भुवि यान्तं यशोधनम् ॥ ५४३ ॥

अन्वय.—कदाचित् गवाक्षगः भूपः पितुः उत्कंठां आप, च पथि श्रांतं भुवि यांतं यशोधनं ददर्श. ॥ ५४३ ॥

अर्थः—(पछी) एक दिवसे झरुखामां बेठेलो ते केशवराजा (पोताना) पिताने (मळवानी) उत्कंठा करवा लाग्यो. (एवामां)

मुसाफरीथी थाकी गयेला, तथा जमीनपर चालता एवा यशोधनने (तेणे) जोयो. ॥ ५४३ ॥

**अनुधावत्परिजनप्रकरः सत्वरस्ततः । सौधादुत्तीर्य नृपतिः पितुः पदयुगेऽपतत् ॥ ५४४ ॥**

अन्वयः—अनुधावत्परिजन प्रकरः नृपतिः सत्वरः ततः सौधात् उत्तीर्य पितुः पदयुगे अपतत्. ॥ ५४४ ॥

अर्थः—( पछी ) पाछळ दोडतो छे परिवारनो समूह जेनो, एवो ते राजा उतावळथी ते मेहेलमांथी उतरीने ( पोताना ) पिताना चरणोमां पड्यो. ॥ ५४४ ॥

**तादृग्विभूतिपर्यङ्कोऽप्यद्य रङ्कोपमाश्रयः । कुतः पितरितोऽसीति प्राह च प्रीतिदुःखितः ॥ ५४५ ॥**

अन्वयः—च प्रीतिदुःखितः प्राह, हे पितः ! तादृक्विभूतिपर्यंकः अपि अद्य रंक उपमा आश्रयः इतः कुतः असि ? ॥ ५४५ ॥

अर्थः—पछी प्रेमथी पीडित थयेलो ते केशव राजा एम कहेवा लाग्यो के, हे पिताजी ! तेवा प्रकारनी समृद्धिना तमो पलंग सरखा होवा छतां पण आजे रंक सरखा थइने अहीं क्यांथी आव्या ? ॥ ५४५ ॥

नन्दनस्य नरेन्द्रत्वपदेन मुदितोऽपि सन् । दुःखाश्रूणि दधद् गेहवार्तामाह यशोधनः ॥ ५४६ ॥

अन्वयः—नंदनस्य नरेंद्रत्व पदेन मुदितः अपि सन् दुःख अश्रूणि दधत् यशोधनः गेहवार्तां आह. ॥ ५४६ ॥

अर्थः—पुत्रनी राजानी पदवीथी खुशी थया छतां पण दुःखनां आंसुओ धारण करतो ते यशोधन शेठ घरनी वात कहेवा लाग्यो के, ॥ ५४६ ॥

धीमन्गते त्वयि तदा हंसो भोक्तुं निवेशितः । भूमौ पपात संजातभ्रमिर्भुक्तार्धभोजनः ॥ ५४७ ॥

अन्वयः—(हे) धीमन्! त्वयि गते तदा भोक्तुं निवेशितः हंसः भुक्त अर्ध भोजनः संजातभ्रमिः भूमौ पपात. ॥ ५४७ ॥

अर्थः—हे बुद्धिमान् केशव! तारा गयाबाद तेज वखते भोजन करवा माटे बेसाडेलो हंस अर्धुं भोजन कर्या बाद चक्री आववाथी जमीनपर पडी गयो. ॥ ५४७ ॥

एतत्किमिति तन्मात्रा दीपे दूरादुपाहृते । तदन्नेऽदर्शि गरलं तुलापट्टे च पन्नगः ॥ ५४८ ॥

अन्वयः—एतत् किं? इति तन्माता दूरात् दीपे उपाहृते तत् अन्ने गरलं, च तुलापट्टे पन्नगः अदर्शि. ॥ ५४८ ॥

अर्थः—आ ते शुं थयुं? एम (बोलती) तेनी माताए दूरथी दीवो (त्यां) लाव्याबाद तेने पीरसेलां अन्नमां झेर, तथा भारवटीयामां (लटकतो) सर्प जोवामां आव्यो. ॥ ५४८ ॥

**धर्मज्ञं मन्यमानेन त्वां तदा तदुदाहृतेः । कुटुम्बेन महाक्रन्दश्चक्रे दिक्चक्रविक्रमी ॥ ५४९ ॥**

अन्वयः—तत् उदाहृतेः तदा त्वां धर्मज्ञं मन्यमानेन कुटुंबेन दिक्चक्रविक्रमी महाक्रंदः चक्रे. ॥ ५४९ ॥

अर्थः—ते उदाहरणथी ते वखते तने धर्मनो रहस्य जाणनार मानता एवा कुटुंबे दिशाओना समूहमां व्यापे एवी महोटी रडा-पीट करवा मांडी. ॥ ५४९ ॥

**तदाक्रन्दमिलल्लोकवर्ती विषभिषग्वरः । एको हि मान्त्रिकाह्वानकृतोद्यममुवाच माम् ॥ ५५० ॥**

अन्वयः—तत् आक्रंद मिलत् लोकवर्ती एकः वरः विषभिषक् हि मांत्रिक आह्वान कृतोद्यमं मां उवाच. ॥ ५५० ॥

अर्थः—ते रडापीटथी (त्यां) एकठा थयेला लोकोमां उभेला कोइ एक झेर संबंधी वैद्यविद्या जाणनारा उत्तम वैद्ये खरेखर मंत्रवादीओने बोलाववा माटे उद्यम करता एवा मने कह्युं के, ॥ ५५०

न कार्यः क्लेशलेशोऽपि सर्पस्यास्य विषक्लमैः । सटत्त्रुटद्गलत्कायो मासमेवैष जीवति ॥ ५५१ ॥

अन्वयः—क्लेशलेशः अपि न कार्यः, अस्य सर्पस्य विषक्लमैः सटत् त्रुटत् गलत् कायः एषः मासं एव जीवति. ॥ ५५१ ॥

अर्थः—(हवे तमो) नाहक जराए महेनत न करो? आ सर्पनुं झेर चडवाथी (आ हंसनुं) शरीर सडवा, त्रुटवा तथा क्षीण थवा लागशे, तथा (ए रीते) ते फक्त एक मास सुधीज हवे जीवी शकशे. ॥ ५५१ ॥

जनं विसृज्य शय्यायां शायितोऽथ त्वदग्रजः । स्थितोऽस्मि तत्स्वरूपं च ज्ञातुं पञ्चदिनीं गृहे ॥५५२॥

अन्वयः—अथ जनं विसृज्य त्वदग्रजः शय्यायां शायितः, च तत्स्वरूपं ज्ञातुं पंचदिनीं गृहे स्थितः अस्मि. ॥ ५५२ ॥

अर्थः—पछी लोकोने विसर्जन करीने त्हारा ते म्होटा भाइ हंसने शय्यामां सुवाड्यो, तथा तेनी तबीयतनी स्थिति जोवामाटे

पांच दिवसो सुधी हुं घरमांज रह्यो. ॥ ५५२ ॥

रोमरोमपतच्छिद्रं मत्वाथ मृतमेव तम् । त्वां द्रष्टुं निरगां गेहात्सुकृतैर्दर्शितोऽसि च ॥ ५५३ ॥

अन्वयः—अथ रोम रोम पतत् छिद्रं तं मृतं एव मत्वा त्वां द्रष्टुं गेहात् निरगां, च सुकृतैः दर्शितः असि. ॥ ५५३ ॥

अर्थः-पछी रुंवाडे रुंवाडे जेने छिद्रो पडेलां छे, एवा ते हंसने मरेलोज मानीने तने मळवामाटे हुं घेरथी निकळ्यो छुं, तथा पुण्ययोगे ( आ ) तने मळ्यो छुं. ॥ ५५३ ॥

विषग्रासदिनान्मासः पूर्णः क्ष्मामटतो मम । त्वज्ज्येष्ठोऽद्य मृतो वास्तु म्रियतां वा हतोऽस्मि हा ५५४

अन्वयः-क्ष्मां अटतः मम अद्य विषग्रास दिनात् मासः पूर्णः, त्वत् ज्येष्ठः मृतः अस्तु, वा म्रियतां. वा हा हतः अस्मि. ५५४

अर्थः-पृथ्वीपर भमतां मने आजे तेना झेरी अनाज खावाना दिवसथी एक मास पूरो थयो छे, माटे (आजे तो) ते तारो म्होटो भाइ मरी गयो हशे, अथवा मरण पामशे अरे! हुं तो (हवे) मुवोज पड्यो छुं! ॥ ५५४ ॥

योजनानां शतमितस्तत्पुरं मत्पुराद्भवेत् । कथं याम्यद्य तत्राशु जीवद्बन्धुमुखोत्सुकः ॥ ५५५ ॥
तद्वार्तार्त इति ध्यायन्नेव हंसस्य पार्श्वगम् । स्वमैक्षत ततः क्ष्मापः सतातं सपरिच्छदम् ॥५५६॥युग्मम्

अन्वयः—ततः तत् वार्तार्तः क्ष्माप इतः मत्पुरात् तत् पुरं योजनानां शतं भवेत्, जीवत् बंधु मुख उत्सुकः अद्य तत्र आशु कथं यामि? इति ध्यायन् एव स्वं सतातं सपरिच्छदं हंसस्य पार्श्वगं ऐक्षत. ॥ ५५५ ॥ ५५६ ॥ युग्मं ॥

अर्थः—पछी ते वृत्तांतथी पीडित थयेलो ते राजा आ म्हारा नगरथी ते नगर एकसो जोजन दूर छे, तो ( म्हारा ते) जीवता भाइनु मुख जोवाने उत्सुक थयेलो एवो हुं, आजे त्यां तुरत केम पहोंची शकुं? एम विचारतांज ते पोताने (पोताना) पिता तथा परिवारसहित हंसनी पासे बेठेलो जोवा लाग्यो. ॥ ५५५ ॥ ५५६ ॥ युग्मं ॥

कुथितांगातिदुर्गन्धत्रस्तबन्धुकदम्बकम् । एकयैवाम्बया युक्तं रोदनोच्छूननेत्रया ॥ ५५७ ॥
अर्तिभिर्नरकार्तीनां सारोद्धारैरिवार्दितं । आसन्नमृत्युं भूक्षिप्तं दुःखी हंसं ददर्श सः ॥ युग्मं॥ ॥ ५५८ ॥

अन्वयः--कुथित अंग अति दुर्गंध त्रस्त बंधु कदंबकं, रोदन उच्छून नेत्रया एकया अंबया एव युक्तं, ॥ ५५७ ॥ नरकार्तीनां सारोद्धारैः इव आर्तिभिः अर्दितं, आसन्नमृत्युं, भूक्षिप्तं हंसं दुःखी सः ददर्श. ॥ ५५८ ॥ युग्मं ॥

अर्थः--सडी गयेलां शरीरमांथी (निकळता) घणा दुर्गंधथी (कंटाळीने) दूर बेठो छे कुटुंबनो समूह जेनाथी, तथा रुदन करवाथी सूजीगयेल छे नेत्रो जेणीना, एवी फक्त एक माताथीज युक्त थयेला. (अर्थात् जेनी नजदीक फक्त एक माताज बेठेली छे एवा) ॥ ५५७ ॥ तथा नरकनी पीडाओनो जाणे सार खेंची कहाड्यो होय नहीं? एवी वेदनाओथी पीडित थयेला, नजदीक छे मृत्यु जेने एवा, तथा भोंये लीधेला एवा ते हंसने ते दुःखी केशवे जोयो. ॥ ५५८ ॥ युग्मं ॥

तद्व्यथाव्यथितोऽपीदृग्दूरमार्गद्रुतागतौ । कुतः शक्तिरिति ध्यायन्सोऽपश्यद्वह्निदैवतम् ॥ ५५९ ॥

अन्वयः--तद्व्यथाव्यथितः अपि सः ईदृग् दूर मार्ग द्रुत आगतौ कुतः शक्तिः? इति ध्यायन् वह्निदैवत अपश्यत् ॥ ५५९ ॥

अर्थः--ते हंसनी वेदनाथी पीडीत थयेला एवा पण ते केशवे, आटले बधे दूर मार्गे एकदम आववामां (मने) क्यांथी शक्ति आवी?

एम विचारतां थकां (त्यां) तेणे वह्निदेवने जोयो. ॥ ५५९ ॥

**मा कार्षीर्विस्मयं मत्वावधिज्ञानात्तव व्यथाम् । आगां कर्तुं वरं सत्यमित्युक्त्वागाद्दिवं सुरः ॥ ५६० ॥**

अन्वयः-विस्मयं मा कार्षीः, अवधिज्ञानात् तव व्यथां मत्वा वरं सत्यं कर्तुं आगां, इति उक्त्वा सुरः दिवं अगात्. ॥५६०॥

अर्थः-(तुं) आश्चर्य नही पाम ! अवधिज्ञानथी तारुं कष्ट जोइने (आपेलां) वरदानने सत्य करवा माटे हुं आव्यो छुं, एम कही (ते) देव देवलोकमां गयो. ॥ ५६० ॥

**हृष्टेन केशवेनाथ पाणिस्पृष्टेन पाथसा । हंसः सिक्तश्च रोगौघमुक्तश्च द्रुतमुत्थितः ॥ ५६१ ॥**

अन्वयः—अथ हृष्टेन केशवेन पाणिस्पृष्टेन पाथसा हंसः सिक्तः, च रोग ओघ मुक्तः, च द्रुतं उत्थितः ॥ ५६१ ॥

अर्थः—पछी खुशी थयेला ते केशवे (पोताना) हाथे स्पर्श करेला जलवडे ते हंसने न्हवराव्यो, (तेथी ते) रोगना समूहथी मुक्त थयो, तथा तुरतज बेठो थयो. ॥ ५६१ ॥

पूर्वस्मादुत्तरेणैव वपुषा विपूलद्युतौ । जातेऽस्मिन्बन्धुवर्गस्य प्रावर्तन्त महोत्सवाः ॥ ५६२ ॥

अन्वयः— पूर्वस्मात् उत्तरेण एव वपुषा विपुलद्युतौ अस्मिन् जाते बंधुवर्गस्य महोत्सवाः प्रावर्तंत. ॥ ५६२ ॥

अर्थः-पहेलांथी पण वधारे सारां थयेलां शरीरवडे करीने घणा तेजवाळो ते केशव थये छते (तेना) कुटुंबवर्गमां महोत्सवो थवा लाग्या. ॥ ५६२ ॥

एवं प्रभावमुद्भाव्य केशवस्य नरेशितुः । दधौ व्याधिविधाय स्वे मूर्ध्नि पादोदकं न कः ॥ ५६३ ॥

अन्वयः-एवं केशवस्य नरेशितुः प्रभावं उद्भाव्य व्याधिविधाय स्वे मूर्ध्नि कः पादोदकं न दधौ? ॥ ५६३॥

अर्थः-एवीरीते ते केशवराजानो प्रभाव जोइने (पोताना) रोगनो नाश करवा माटे पोताना मस्तकपर कोणे (तेनुं) चरणोदक धारण न कर्युं? (अर्थात् सर्व रोगीओए तेम कर्युं.) ॥ ५६३ ॥

किं वर्ण्यः केशवोर्वीशः सिषेवे यत्पदोदकम् । भूतभाविरुजो भेत्तुमासमुद्रं नृपैरपि ॥ ५६४ ॥

अन्वयः-केशवः ऊर्वीशः किं वर्ण्यः? यत्पदोदकं भूतभाविरुजः भेत्तुं आ समुद्रं नृपैरपि सिषेवे. ॥ ५६४ ॥

अर्थः—आ केशवराजानी केटली प्रशंसा करीयें? जेना चरणोदकने, थयेला तथा थनारा रोगोनो नाश करनामाटे छेक समुद्रकिनारा सुधीना (सघळा) राजाओए पण अंगीकार कर्यु. ॥ ५६४ ॥

**भाविरोगभिया स्वर्णकलशे क्षिप्तमोकसि । न जीवितमिवारक्षि केनोर्व्यां तत्पदोदकम् ॥ ५६५ ॥**

अन्वयः-ऊर्व्यां भाविरोगभिया तत्पदोदकं स्वर्णकलशे क्षिप्तं जीवितं इव ओकसि केन न अरक्षि? ॥ ५६५ ॥

अर्थः—(वळी) आ पृथ्वीपर थनारा रोगना डरथी ते केशव राजानुं चरणोदक सुवर्णना कळशमां राखीने (पोताना) जीवनी पेठे घरमां कोणे न साचवी राख्युं? (अर्थात् सर्व लोकोए संघरी राख्युं) ॥ ५६५ ॥

**सद्यः प्रभावमासाद्य भूपतेरिति धर्मजम् । रात्र्याहारपरीहारपरा जज्ञे धरा स्वयम् ॥ ५६६ ॥**

अन्वयः—इति भूपतेः धर्मजं सद्यः प्रभावं आसाद्य धरा स्वयं रात्रि आहार परीहार परा जज्ञे. ॥ ५६६ ॥

अर्थः-एवीरीते ते केशवराजानो धर्म संबंधी तुरत थयेलो चमत्कार जोइने पृथ्वी एटले पृथ्वीपर वसता लोको पोतानी मेळेज रात्रिभोजनना त्यागमां तत्पर थया. ॥ ५६६ ॥

अथायं दिग्जयं कृत्वा स्थित्वा साकेतपत्तने । पात्वा चिरं धरामत्रामुत्राभूत्परमः सुखी ॥ ५६७ ॥

॥ इति रजनीभोजनत्यागे हंस केशवकथा ॥

अन्वयः—अथ अयं दिग्जयं कृत्वा, साकेतपत्तने स्थित्वा, चिरं धरां पात्वा, अत्र अमुत्र परमः सुखी अभूत्. ॥ ५६७ ॥

अर्थः—पछी ते केशवराजा दिग्विजय करीने, तथा साकेतनगरमां रहीने, अने घणा काळसुधी पृथ्वीनुं रक्षण करीने आलोक अने परलोकमां अत्यंत सुखी थयो. ॥ ५६७ ॥

॥ इति रजनीभोजनत्यागे हंस केशवकथा. ॥

इत्थं हंसस्य विपदं संपदं केशवस्य च । श्रुत्वा मुखाद् गुरोः स्वर्गिन्कथमद्मि फलं निशि ॥ ५६८ ॥

अन्वयः-इत्थं हंसस्य विपदं, च केशवस्य संपदं गुरोः मुखात् श्रुत्वा (हे) स्वर्गिन्! निशि फलं कथं अश्नि? ॥ ५६८ ॥

अर्थः----एवीरीते हंसनी आपदानुं अने केशवनी समृद्धिनुं वृत्तांत गुरुना मुखथी सांभळीने (पण) हे देव! रात्रिए (हुं) फल केम खाउं? ॥ ५६८ ॥

सुरा ह्यविरता नित्यं श्रावका विरतिस्पृशः । तदेवमावयोर्भेदो जज्ञे पुण्याढ्यपार्थिव ॥ ५६९ ॥

अन्वयः—(हे) पुण्याढ्यपार्थिव! सुराः नित्यं अविरताः, श्रावकाः विरतिस्पृशः, तत् एवं आवयोः भेदः जज्ञे. ॥ ५६९ ॥

अर्थः—(हे) पुण्याढ्यराजा! देवो हमेशां विरतिरहित होय छे, अने श्रावको विरतिवाळा होय छे, माटे एवीरीते आपण बन्नेवच्चे तफावत छे. ॥ ५६९ ॥

तदभ्यर्च्य जिनं धर्मिन् घर्मांशावुदयस्पृशि । अङ्गरोगविभङ्गाय तदिदं फलमाहरेः ॥ ५७० ॥

अन्वयः-तत् (हे) धर्मिन्! घर्मांशौ उदयस्पृशि जिनं अभ्यर्च्य अंगरोगविभंगाय तत् इदं फलं आहरेः ॥ ५७० ॥

अर्थः-माटे (हे) धर्मात्मा! सूर्य उग्याबाद जिनेश्वरप्रभुनी पूजा करीने (तारा) शरीरना रोगना नाशमाटे (तुं) ते आ फलनो आहार करजे. ॥ ५७० ॥

इत्युदित्वा तिरोभूते सुरे दध्यौ नरेश्वरः । अहो जीवन्मृतोऽपीभः कियन्मय्युपकारकः ॥ ५७१ ॥

अन्वयः-इति उदित्वा सुरे तिरोभूते नरेश्वरः दध्यौ, अहो! इभः जीवन् मृतः अपि मयि कियत् उपकारकः ॥५७१॥ त्रिभिर्विशेषकं॥

अर्थः—एम कही (ते) देव अदृश्य थयाबाद (ते) राजाए विचार्युं के, अहो! (आ) हाथीए जीवतांथकां तथा मृत्युबाद पण मारापर केटलो बधो उपकार कर्यो! ॥ ५७१ ॥ त्रिभिर्विशेषकं ॥

तदस्य नागनाथस्य नाम्ना धाम जिनेशितुः । कारयिष्याम्यनशनस्थाने कैलासशैलवत् ॥ ५७२ ॥

अन्वयः—तत् अस्य नागनाथस्य नाम्ना अनशन स्थाने कैलासशैलवत् जिनेशितुः धाम कारयिष्यामि. ॥ ५७२ ॥

अर्थः-माटे आ हस्तिराजना नामथी तेना अनशननी जगोए कैलास पर्वत जेवुं (उंचुं) जिनमंदिर (हुं) करावीश. ॥ ५७२ ॥

इत्यादिमधुरध्वानो गमयित्वा तमीमिमाम् । जिनपूजनपूतात्मा भूपस्तत्फलमाहरत् ॥ ५७३ ॥

अन्वयः—इत्यादिमधुरध्वानः भूपः इमां तमीं गमयित्वा जिनपूजनपूतात्मा तत् फलं आहरत्. ॥ ५७३ ॥

अर्थः—इत्यादि मधुर वाणी बोलता(ते)राजाए ते रात्रि निर्गमन कर्याबाद जिनपूजनथी आत्माने पवित्र करी ते फलनो आहारकर्यो

तदैव फलतस्तस्मादकस्माद्भूपतेर्वपुः । सरोजमिव संकोचमुन्मुमोच विरोचनात् ॥ ५७४ ॥

अन्वयः—तदा एव तस्मात् फलतः विरोचनात् सरोजं इव अकस्मात् भूपतेः वपुः संकोचं उन्मुमोच. ॥ ५७४ ॥

अर्थः—तेज वखते ते फलना (प्रभावथी) सूर्यथी कमलनी पेठे अकस्मात् राजाना शरीरे संकोचपणानो त्याग कर्यो. ॥५७४॥

भूपः स्वभावसुभगो धृतसंकोचविक्रियः । विश्वदृक्पेयतां प्राप दिनमुक्तेन्दुधामवत् ॥ ५७५ ॥

अन्वयः—स्वभावसुभगः, धृतसंकोचविक्रियः भूपः दिन मुक्त इंदु धामवत् विश्वदृक्पेयतां प्राप. ॥ ५७५ ॥

अर्थः—स्वभावथीज मनोहर, तथा दूर थयेल छे संकोचनो विकार जेनो, एवो ते राजा दिवसथी मुक्त थयेला चंद्रना तेजनी

पेठे जगतनी आंखोने आनंद आपवा लाग्यो. ॥ ५७५ ॥

**अङ्गपाटवमङ्गल्यगर्जन्नागरगौरवः । व्रजन्त्यहानि भूजानिर्जानीते स्म न कानिचित् ॥ ५७६ ॥**

अन्वयः—अंगपाटव मंगल्य गर्जत् नागरगौरवः भूजानिः व्रजंति कानिचित् अहानि न जानीतेस्म. ॥ ५७६ ॥

अर्थः—शरीरना सुधारारूपी मंगलीकथी (हर्षना) पोकार करता नागरिकोवडे सन्मानित थयेलो ते राजा चाल्याजता एवा केटलाक दिवसोने जाणवा पण न लाग्यो. ॥ ५७६ ॥

**क्रीडदन्तःपुरीलोकस्तोकीभूतत्रपाभरः । निनाय नायकः क्ष्मायाः प्रीत्या कत्यपि वासरान् ॥ ५७७ ॥**

अन्वयः—क्रीडत् अंतःपुरी लोक स्तोकीभूत त्रपाभरः क्ष्मायाः नायकः प्रीत्या कत्यपि वासरान् निनाय. ॥ ५७७ ॥

अर्थः—क्रीडा करती राणीओ वडे करीने स्वल्प थयेल छे लज्जानो समूह जेनो, एवो ते पृथ्वीपति आनंद पूर्वक केटलाक दिवसो व्यतीत करवा लाग्यो. ॥ ५७७ ॥

उत्पन्ननन्दनानन्दसुधास्नानवशेन्द्रियः ॥ स मेने कत्यपि समाः स्वसमान्नाकिनोऽपि न ॥ ५७८ ॥

अन्वयः–उत्पन्न नंदन आनंद सुधा स्नान वश इंद्रियः सः कत्यपि समाः नाकिनः अपि स्वसमान् न मेने. ॥ ५७८ ॥

अर्थः–उत्पन्न थयेला पुत्रोना आनंदरूपी अमृतना स्नानमां वश थयेल छे इंद्रियो जेनी, एवो ते पुण्याढ्य राजा केटलाक वर्षोसुधी तो देवोने पण पोतानी तुल्य न मानवा लाग्यो. ॥ ५७८ ॥

वनक्रीडारसाधीनो रसाधीशः कदाप्ययम् । तद्द्विपानशनस्थानं वीक्ष्य दुःखादचिन्तयत् ॥ ५७९ ॥

अन्वयः—कदापि वन क्रीडा रसाधीनः अयं रसाधीशः तद् द्विप अनशन स्थानं वीक्ष्य दुःखात् अचिंतयत्. ॥ ५७९ ॥

अर्थ.–कोइक दिवसे वनक्रीडाना रसमां आसक्त थयेलो आ राजा ते हाथीनुं अनशननुं स्थान जोइने खेद पामी विचारवा लाग्यो के,

हा मां कामान्धहृदयं भवभावा व्यलोभयन् । स्वभङ्गभीरवो यन्मे कृत्यनाशं वितेनिरे ॥ ५८० ॥

अन्वयः–हा ! स्व भंग भीरवः भव भावाः कामांध हृदयं मां व्यलोभयन्, यत् मे कृत्यनाशं वितेनिरे ॥ ५८० ॥

अर्थः—अरे ! पोताना विनाशथी डरता एवा संसारना (इंद्रियोना) विषयोए कामथी अंध थयेला मनवाळा एवा मने लालचमां नाखी दीधो छे, केमके (तेओए) मारां सत्कार्योनो नाश कर्यो छे. ॥ ५८० ॥

**नाम्नोपकारिणस्तस्य करिणः कर्तुमीहितः । मोहोल्लासादिह हहा प्रासादोऽपि न कारितः ॥ ५८१ ॥**

अन्वयः—तस्य उपकारिणः करिणः नाम्ना कर्तुं ईहितः प्रासादः अपि इह हहा मोहोल्लासात् न कारितः. ॥ ५८१ ॥

अर्थः—ते उपकारी हाथीना नामथी करवाने इच्छेलो जिनप्रासाद पण अहीं अरेरे! में मोहने वश थइ कराव्यो नही. ॥५८१॥

**एवं ध्यानपतच्चित्तोऽमात्यानित्यादिशन्नृपः । विपुलं द्विपनाम्नात्र कार्यतां जिनमन्दिरम् ॥ ५८२ ॥**

अन्वयः—एवं ध्यानपतत् चित्तः नृपः अमात्यान् इति आदिशत्, अत्र द्विपनाम्ना विपुलं जिनमंदिरं कार्यतां? ॥ ५८२ ॥

अर्थः—एवीरीतना विचारथी खिन्न हृदयवाळो राजा मंत्रिओने एम कहेवा लाग्यो के, आ जगोए ते हाथीना नामथी एक विशाल जिनमंदिर करावो? ॥ ५८२ ॥

अह्ना मासेन वर्षेण दशवर्ष्यापि भोजनम् । करिष्यामि जिनं प्रेक्ष्य प्रासादेऽत्र प्रतिष्ठितम् ॥ ५८३ ॥

अन्वयः—अह्ना, मासेन, वर्षेण, दशवर्ष्या अपि अत्र प्रासादे प्रतिष्ठितं जिनं प्रेक्ष्य भोजनं करिष्यामि. ॥ ५८३ ॥

अर्थः-एक दिवसे, एक मासे, एक वर्षे, अथवा दश वर्षे पण आ जिनमंदिरमां प्रतिष्ठित थयेली जिनप्रतिमाना दर्शन करीनेज हुं भोजन करीश. ॥ ५८३ ॥

नृमाणिक्य न शक्योऽयं तरीतुं निश्चयार्णवः । इत्येष लपतोऽमात्यानवमत्याविशत्पुरम् ॥ ५८४ ॥

अन्वयः-(हे) नृमाणिक्य! अयं निश्चयार्णवः तरीतुं शक्यः न, इति लपतः अमात्यान् अवमत्य एषः पुरं अविशत्. ॥५८४॥

अर्थः-पुरुषोमां माणिक्यरत्नसरखा हे राजन्! आवा प्रकारना नियमरूपी महासागरने तरी शकायज नही, एम बोलता मंत्रिओनी पण दरकार कर्याविना (एटले तेओना कहेवापर ध्यान न देतां) ते राजा नगरमां दाखल थयो. ॥ ५८४ ॥

जिनधामद्रुताधानबद्धारम्भास्तदैव ते । पुण्याहमङ्गलं तत्र मन्त्रिमुख्या व्यधापयन् ॥ ५८५ ॥

अन्वयः—जिन धाम द्रुत आधान बद्धारंभाः ते मंत्रिमुख्याः तदा एव तत्र पुण्याहमंगलं व्यधापयन् ॥ ५८५ ॥

अर्थः—जिनमंदिरना तुरत बांधकाममाटे करेली छे तैयारीओ जेओए, एवा ते मुख्यमंत्रिओए तेज वखते त्यां उत्तम मंगलीक कराव्युं, (खात मुहूर्त कराव्युं.) ॥ ५८५ ॥

**हृदुत्तारितसंसारव्यापारः सारधर्मधीः । अकृताहार एवाष्टौ नृपो निन्ये दिनानि सः ॥ ५८६ ॥**

अन्वयः—हृद् उत्तारित संसार व्यापारः सारधर्मधीः सः नृपः अकृत आहारः एव अष्टौ दिनानि निन्ये. ॥ ५८६ ॥

अर्थः-हृदयमांथी पण कहाडी नाखेल छे सांसारिक कार्योनुं चिंतवन जेणे, तथा उत्तम प्रकारनी धर्मबुद्धिवाळा ते राजाए भोजन कर्या विनाज आठ दिवसो तो व्यतीत कर्या. ॥ ५८६ ॥

**ततः प्रत्यूषशेषायां रजन्यां जातजागरम् । देवः स एव प्रत्यक्षीभूय भूपमभाषत ॥ ५८७ ॥**

अन्वयः-ततः प्रत्यूषशेषायां रजन्यां जातजागरं भूपं सः एव देवः प्रत्यक्षीभूय अभाषत. ॥ ५८७ ॥

अर्थः–पछी रात्रिनो परोढीयानो भाग बाकी रहेते जागी उठेला ते राजापासे तेज देवे प्रत्यक्ष थइ कह्युं के, ॥ ५८७ ॥

जय त्वं कीर्तिविस्तीर्ण निस्तीर्णभवसागर । प्रतिपन्नमनोदार्ढ्य श्रीपुण्याढ्य महीपते ॥ ५८८ ॥

अन्वयः–कीर्तिविस्तीर्ण ! निस्तीर्णभवसागर ! प्रतिपन्नमनोदार्ढ्य ! (हे) श्रीपुण्याढ्य महीपते ! त्वं जय ! ॥ ५८८ ॥

अर्थः—कीर्तिथी प्रसिद्ध थयेला, तथा तरेलो छे संसारसमुद्र जेणे एवा, अने स्वीकारेल छे मननुं निश्चलपणुं जेणे एवा, हे पुण्याढ्य महीपाल ! तुं जय पाम ? ॥ ५८८ ॥

अवधिज्ञानतो ज्ञात्वा नृदुःपूरं तवाग्रहम् । लोकोत्तरं स्वरूपं च किंचिदग्रेव भावि ते ॥ ५८९ ॥

शुभापुर्यां तत्तपनान्निश्चित्य ज्ञानभास्करात् । बिम्बं निर्माय जैनेन्द्रं प्रतिष्ठाप्य यथाविधि ॥ ५९० ॥

अस्थापयं वने तस्मिंश्चैत्ये पूर्णीकृते क्षणात् । अहं तवैव भाग्यानां सम्प्रति प्रतिहस्तकः ॥ ५९१ ॥

तत्कल्याणनिधे तूर्णमेहि पूर्णमनोरथः । जिनं चन्द्राननं नत्वा नमस्यो जगतां भव ॥ ५९२ ॥

एवं देवस्य तस्योक्तं श्रुत्वा दध्यौ धराधिपः । अहो कियानयं मेऽभूदुपकारी द्विपामरः ॥ ५९३ ॥

अन्वयः--नृदुःपूरं तव आग्रहं, च अद्य एव भावि ते किंचित् लोकोत्तरं स्वरूपं अवधिज्ञानतः ज्ञात्वा ॥ ५८९ ॥ शुभापुर्यां ज्ञान भास्करात् तपनात् तत् निश्चित्य, जैनेंद्रं बिंबं निर्माय, यथाविधि प्रतिष्ठाप्य ॥ ५९० ॥ तव एव भाग्यानां प्रतिहस्तकः अहं तस्मिन् वने क्षणात् पूर्णीकृते चैत्ये संप्रति अस्थापयं, ॥ ५९१ ॥ तत् (हे) कल्याणनिधे! तूर्णं एहि? चंद्राननं जिनं नत्वा पूर्णमनोरथः जगतां नमस्यः भव? ॥ ५९२ ॥ एवं तस्य देवस्य उक्तं श्रुत्वा धराधिपः दध्यौ, अहो! अयं द्विपामरः मे कियान् उपकारी अभूत्! ॥ ५९३ ॥ पंचभिः कुलकं ॥

अर्थः–मनुष्योवडे संपूर्ण न थई शके एवा तारा आग्रहने, तथा आजेज थनारा तारा कंइक लोकोत्तर स्वरूपने (मोक्षने) अवधिज्ञानथी जाणीने, ॥ ५८९ ॥ तथा शुभापुरीमां (विराजता) ज्ञानथी सूर्यसरखा एवा (ते) तपननामना मुनिराजपासेथी ते (तारी हकीकतनो) निश्चय करीने, अने जिनप्रतिमा बनावीने, तथा तेनी विधिपूर्वक प्रतिष्ठा करावीने, ॥ ५९० ॥ तारांज

भाग्योनो जामीन एवो जे हुं, तेणे ते वनमां एक क्षणमांज संपूर्ण करेला जिनमंदिरमां स्थापन करी छे. ॥ ५९१ ॥ माटे कल्याणना भंडारसरखा एवा हे राजन्! तुं तुरत चाल? तथा त्यां चंद्रसरखा मुखवाळा (अथवा चंद्राननामना) प्रभुने नमीने तारो मनोरथ पूरो करीने जगतने नमवा लायक था? ॥ ५९२ ॥ एवी रीतनुं ते देवनुं वचन सांभळीने राजाए विचार्युं के, अहो! आ हस्तिदेव मारो केटलो उपकारी थयो! ॥ ५९३ ॥ पंचभिः कुलकं ॥

**नवप्रासादतीर्थेशदर्शनोत्कण्ठितस्ततः । पुरःकृतसुरः पृथ्वीपतिः प्रतिवनं ययौ ॥ ५९४ ॥**

अन्वयः—ततः नव प्रासाद तीर्थ ईश दर्शन उत्कंठितः, पुरः कृत सुरः पृथ्वीपतिः वनंप्रति ययौ. ॥५९४॥

अर्थः—पछी ते नवा बनावेला जिनमंदिरमां प्रतिष्ठित थयेला श्रीतीर्थंकरप्रभुना दर्शनमाटे उत्सुक थयेलो, तथा आगळ करेल छे ते देवने जेणे, एवो ते पुण्याढ्यराजा वनमां गयो. ॥ ५९४ ॥

**प्रासादमौलिमारुह्य नृत्यन्त्याः सुकृतश्रियः । लोलं हस्तमिव प्रेक्ष्य पताकां मुमुदे नृपः ॥ ५९५ ॥**

अन्वयः—प्रासादमौलिं आरुह्य नृत्यन्त्याः सुकृतश्रियः लोलं हस्तं इव पताकां प्रेक्ष्य नृपः मुमुदे. ॥ ५९५ ॥

अर्थः-ते जिनमंदिरना शिखरपर चडीने नाचती एवी पुण्यलक्ष्मीनो जाणे चपल हाथ होय नहीं! एवी पताकाने जोइने ते राजा खुशी थवा लाग्यो. ॥ ५९५ ॥

कल्याणकलशं पश्यन्मौलौ जिनगृहश्रियः । मुक्तिप्रस्थानकृद्भूपः शकुनेनान्वमोदत ॥ ५९६ ॥

अन्वयः—जिनगृहश्रियः मौलौ कल्याणकलशं पश्यन् मुक्तिप्रस्थानकृत् भूपः शकुनेन अन्वमोदत, ॥ ५९६ ॥

अर्थः—जिनमंदिरनी लक्ष्मीना मस्तकपर रहेला सुवर्णना कलशने जोतो, तथा मोक्षमाटे प्रयाण करतो एवो ते राजा तेने शुभ शकुन मानी तेनी अनुमोदना करवा लाग्यो. ॥ ५९६ ॥

चान्द्रीः कलाः शिलाभावं गमयित्वेव निर्मितः । जिनालयोऽसौ भूपस्य निन्येऽक्षिकुमुदं मुदम् ।५९७।

अन्वयः—चांद्रीः कलाः शिलाभावं गमयित्वा निर्मितः इव असौ जिनालयः भूपस्य अक्षिकुमुदं मुदं निन्ये. ॥ ५९७ ॥

अर्थः—चंद्रनी (सघळी) कळाओने पत्थररूप बनावीने जाणे बनाव्यो होय नहीं ! एवो आ जिनप्रासाद राजनां चक्षुरूपी कुमुदने (चंद्रविकासी कमलने) आनंद पमाडवा लाग्यो. ॥ ५९७ ॥

**ततो न्यरूपयत्तत्र भूवरस्तोरणं पुरः । पुण्यश्रीदूरविधृतस्वयंवरणमाल्यवत् ॥ ५९८ ॥**

अन्वयः-ततः भूवरः पुरः पुण्य श्री दूर विधृत स्वयंवरण माल्यवत् तत्र तोरणं न्यरूपयत्. ॥ ५९८ ॥

अर्थः-पछी राजाए अगाडीना भागमां पुण्यलक्ष्मीए दूरथी पकडी राखेली स्वयंवर माळा सरखुं त्यां तोरण जोयुं. ॥ ५९८ ॥

**चैत्यद्वारं ददर्शासो सद्धर्मपुरगोपुरम् । सतां यत्र स्थितानां स्याज्जिनः सुलभदर्शनः ॥ ५९९ ॥**

अन्वयः-असौ सद्धर्म पुर गोपुरं चैत्यद्वारं ददर्श, यत्र स्थितानां सतां जिनः सुलभदर्शनः स्यात्. ॥ ५९९ ॥

अर्थः-(पछी) ते राजाए उत्तम धर्मरूपी नगरना दरवाजासरखुं ते जिनमंदिरनुं द्वार जोयुं, के ज्यां उभेला सज्जनोने जिनेश्वरप्रभु सुलभ दर्शनवाळा थाय. ॥ ५९९ ॥

नित्योद्यतस्य निर्जेतुमधर्मं सङ्घभूपतेः । गुप्यद्गुरुमिवापश्यत्स तुङ्गं रङ्गमण्डपम् ॥ ६०० ॥

अन्वयः-अधर्मं निर्जेतुं नित्योद्यतस्य संघ भूपतेः गुप्यद्गुरुं इव तुंगं रंगमंडपं सः अपश्यत् ॥ ६०० ॥

अर्थः-(पछी) पापने जीतवा माटे हमेशां उद्यमवंत थयेला एवा संघरूपी राजाना गंभीर गुरुसरखा उंचा रंगमंडपने तेणे जोयो.

गुर्वीरुर्वीश्वरोऽद्राक्षीद्रम्यास्त्रिकचतुष्किकाः । धर्मस्य श्रद्धया सार्धं विवाहे वेदिका इव ॥ ६०१ ॥

अन्वयः-श्रद्धया सार्धं धर्मस्य विवाहे वेदिकाः इव, उर्वीश्वरः गुर्वीः रम्याः त्रिकचतुष्किकाः अद्राक्षीत् ॥ ६०१ ॥

अर्थः-(पछी) श्रद्धानी साथे धर्मना लग्न करवा माटेनी जाणे वेदीओ होय नहीं! एवी (ते) राजाए (त्यां) म्होटी अने मनोहर त्रिको तथा चोकठो दीठी. ॥ ६०१ ॥

असंख्यसुखसंप्राप्तिनित्यानन्दात्मसेवितः । साक्षान्मोक्ष इव प्रीत्यै राज्ञोऽभूद्गूढमण्डप ॥ ६०२ ॥

अन्वयः-असंख्य सुख संप्राप्ति नित्यानंद आत्म सेवितः गूढमंडपः साक्षात् मोक्ष इव राज्ञः प्रीत्यै अभूत् ॥ ६०२ ॥

अर्थः—असंख्याता सुखोनी प्राप्तिवाळा, तथा हमेशां आनंदमांज रहेनारा एवा परमात्माथी सेवायेलो मूळगंभार साक्षात मोक्षनीपेठे राजाना हर्षमाटे थयो. ॥ ६०२ ॥

**अथार्हत्प्रतिमामर्ककोटिकान्तिकृतामिव । पश्यन्नक्षिपद्भूपो भवकोटिभवं तमः ॥ ६०३ ॥**

अन्वयः—अथ अर्क कोटि कांति कृतां इव अर्हत्प्रतिमां पश्यन् सः भूपः भवकोटिभवं तमः चिक्षेप. ॥ ६०३ ॥

अर्थः—पछी जाणे क्रोडोगमे सूर्योनी कांतिथी बनावी होय नहीं! एवी श्रीअरिहंतप्रभुनी प्रतिमाने जोता एवा ते राजाए क्रोडोगमे भवोमां बांधेलां पापोने (अंधकारने—अज्ञानने) दूर फेंकी दीधां. ॥ ६०३ ॥

**रूपातिशयविस्फूर्तौ विभोर्मूर्तौ नरेशितुः । स्पर्धयेवाक्षियुग्मस्य जगाम स्थिरतां मनः ॥ ६०४ ॥**

अन्वयः—रूपातिशयविस्फूर्तौ विभोः मूर्तौ अक्षियुग्मस्य स्पर्धया इव नरेशितुः मनः स्थिरतां जगाम. ॥ ६०४ ॥

अर्थः—अत्यंत तेजथी विकस्वर थयेली एवी ते प्रभुनी प्रतिमामां जाणे बन्ने आंखोनी स्पर्धाथी होय नहीं! तेम ते राजानुं मन

स्थिर थइ गयुं. ॥ ६०४ ॥

आनन्दामृतमग्नस्य लीनं तस्य मनस्तथा । यथा जिनं च विश्वं च स्वं च नो बुबुधे तदा ॥ ६०५ ॥

अन्वयः—आनंद अमृत मग्नस्य तस्य मनः तदा तथा लीनं, यथा जिनं च विश्वं च स्वं च नो बुबुधे. ॥ ६०५ ॥

अर्थः—अनंदरूपी अमृतमां मग्न थयेला एवा ते राजानुं मन ते वखते एवुं लीन थइ गयुं के, जेथी तेणे जिनने, जगतने, तथा पोताने पण जाण्या नही. ॥ ६०५ ॥

समत्वमसृणीभूतः प्रभूताद्भुतशक्तिभृत् । आरूढः क्षपकश्रेण्यां शुक्लध्यानामलो नृपः ॥ ६०६ ॥

अन्वयः—समत्वमसृणीभूतः, प्रभूताद्भुत शक्तिभृत्, शुक्ल ध्यान अमलः नृपः क्षपकश्रेण्यां आरूढः. ॥ ६०६ ॥

अर्थः—समभावथी कोमळ थयेलो, तथा घणीज अद्भुत शक्तिवालो, अने शुक्लध्यानवडे निर्मल थयेलो ते राजा क्षपकश्रेणिपर चड्यो. ॥ ६०६ ॥

**तस्य घातीनि कर्माणि दग्धानि ध्यानवह्निना । तद्वियोगादिव भवोपग्राहीण्यप्यगुः क्षणात् ॥ ६०७ ॥**

अन्वयः—तस्य घातीनि कर्माणि ध्यान वह्निना दग्धानि, तद्वियोगात् इव भवोपग्राहीणि अपि क्षणात् अगुः. ॥ ६०७ ॥

अर्थः—ते राजानां घातिकर्मो ध्यानरूपी अग्निवडे बळी गयां, अने जाणे तेओना वियोगथीज होय नही ! तेम तेनां भवोपग्राही कर्मो पण क्षणवारमां चाल्यां गयां. ॥ ६०७ ॥

**तस्यामिव सहाय्यायां घटिते घनमेलतः । नृपेऽस्मिन्कृतसंकेते ज्ञानमोक्षश्रियौ समम् ॥ ६०८ ॥**

अन्वयः—तस्यां सहाय्यायां कृत संकेते इव ज्ञानमोक्षश्रियौ घनमेलतः अस्मिन् नृपे समं घटिते. ॥ ६०८ ॥

अर्थः—ते क्षपकश्रेणिनी मदद होते छते, जाणे बन्नेए संकेत करी राख्यो होय नही ! तेम केवलज्ञानी अने मोक्षनी लक्ष्मीओ (परस्परना) घाटा संबंधथी ते राजाने एकीवेळाएज प्राप्त थइ (अर्थात् ते अंतकृत् केवली थइ मोक्षे गया.) ॥ ६०८ ॥

**अथ विज्ञाय तज्ज्ञाननिर्वाणमवनीविभोः । मृदत्वेनैव मन्वानान्वज्रपातमिवोत्सवम् ॥ ६०९ ॥**

हा तातेति हहा भर्तरिति हा त्रायकेति च । नन्दनान्तःपुरीलोकान्क्रन्दतः प्रतिबोध्य सः ॥ ६१० ॥
तदा मुदागतैः सम्यग्दृष्टिभिस्त्रिदशैः सह । कृत्वौर्ध्वदेहिकं कृत्यं स्वमित्रस्य शुभात्मनः ॥ ६११ ॥
पुण्यसाराभिधं न्यस्य पुत्रं राज्येऽत्र भूपतेः । अनुशास्य जिनार्चायां द्विपदेवो दिवं ययौ ॥ ६१२ ॥

॥ इति हंसकेशवनिदर्शनान्विता पुण्यप्रामाण्ये पुण्याढ्यभूपतिकथा ॥

अन्वयः—अथ अवनी विभोः तद् ज्ञाननिर्वाणं विज्ञाय मूढत्वेन एव उत्सवे वज्रपात इव मन्वानान् ॥ ६०९ ॥ च हा तात ! हहा ! भर्तः! हा त्रायक! इति क्रंदतः नंदन अंतःपुरी लोकान् प्रतिबोध्य सः ॥६१०॥ तदा मुदा आगतैः सम्यग्दष्टिभिः त्रिदशैः सह शुभात्मनः स्वमित्रस्य औध्र्व देहिकं कृत्यं कृत्वा ॥ ६११ ॥ अत्र राज्ये भूपतेः पुण्यसाराभिधं पुत्रं न्यस्य, जिनार्चायां अनुशास्य द्विपदेवः दिवं ययौ ॥ ६१२ ॥ चतुर्भिः कलापकं ॥

अर्थः—हवे ते पुण्याढ्य राजानां केवलज्ञानसहित मोक्षगमनने जाणीने मूर्खाइथीज (ते) महोत्सवने (पण) वज्रना आघा त

सरखो जाणता, ।। ६०९ ।। (अने तेथी) हा पिताजी ! हा स्वामी ! हा रक्षक ! एम (पोकार करी) रडता एवा (तेना) पुत्रोने, (तेनी) राणीओने, तथा (नगरना) लोकोने (सत्य हकीकत) समजावीने ते देव ।। ६१० ।। ते वखते (त्यां) खुशीथी आवेला बीजा समकीती देवोनी साथे पोताना ते पुण्यशाली मित्रनु उत्तरक्रियारूप कार्य करीने, ।। ६११ ।। तथा ते राज्यपर ते पुण्याढ्य राजाना पुण्यसार नामना पुत्रने स्थापन करीने, (तथा तेने पण) श्री जिनेश्वर प्रभुनी पूजा करवा माटे शिखामण आपीने ते हस्तिदेव (त्यांथी) देवलोकमां गयो ।। ६१२ ।। चतुर्भिः कलापकं ।।

।।एवी रीते हंसकेशवना दृष्टांतसहित पुण्यनी खातरी माटे पुण्याढय राजानी कथा संपूर्ण थइ. ।।

तदेवं देव जानीहि पद्मोत्तरनृपोत्तर । प्रभावं प्राच्यपुण्यानां पुण्याढ्यस्य निदर्शनात् ।। ६१३ ।।

अन्वयः—तत् एवं (हे) देव! (हे) पद्मोत्तरनृपोत्तर! पुण्याढ्यस्य निदर्शनात् प्राच्यपुण्यानां प्रभावं जानीहि! ।। ६१३ ।।

अर्थः-माटे एवी रीते (हे) स्वामी! (हे) पद्मोत्तरनामना उत्तम राजा! पुण्याढ्यराजाना दृष्टांतथी (तमारे) पूर्वे करेलां पुण्योनो

प्रभाव जाणवो? ॥ ६१३ ॥

किं च कर्मवशं विश्वमवश्यमिदमीश तत् । मया कृतमदः कार्यो न कदाचिदयं मदः ॥ ६१४ ॥

अन्वयः—किंच इदं विश्वं अवश्यं कर्मवशं, तत् अदः मया कृतं, अयं मदः कदाचित् न कार्यः. ॥ ६१४ ॥

अर्थः-वळी आ (समस्त) जगत् खरेखर कर्मोनेज वश छे, माटे आ में कर्युं छे, एवो अहंकार कदापि पण करवो नहीं. ॥६१४॥

जडः कार्ये सुनिष्पन्ने मयाकारीति माद्यति । तस्मिन्पुनरनिष्पन्ने दोषं दैवाय यच्छति ॥ ६१५ ॥

अन्वयः—कार्ये सुनिष्पन्ने मया अकारि इति जडः माद्यति, पुनः तस्मिन् अनिष्पन्ने दोषं दैवाय यच्छति. ॥ ६१५ ॥

अर्थः—(कोइ पण) कार्य निर्विघ्ने पार पडयाबाद ते में कर्युं, एम मूर्ख माणस गर्व धारण करे छे, परंतु (जो) ते कार्य पार न पडे, तो ते माटेनो दोष दैवने आपे छे. ॥ ६१५ ॥

पूर्वगर्वग्रहक्रीडाव्रीडापीडातुरस्ततः । अभ्यधाद्वसुधाधीशः स सुधाबन्धुरां गिरम् ॥ ६१६ ॥

अन्वयः—ततः पूर्वं गर्व ग्रह क्रीडा व्रीडा पीडातुरः सः वसुधाअधीशः सुधाबंधुरां गिरं अभ्यधात्. ॥ ६१६ ॥

अर्थः—पछी (पोते) पूर्वे करेला अभिमानना आग्रहनी क्रीडाथी उत्पन्न थयेली लज्जावडे दुःख पामतो एवो ते राजा अमृत-सरखी मनोहर वाणी बोलवा लाग्यो के, ॥ ६१६ ॥

**स्वच्छन्दं छन्दवृत्त्या ये रञ्जयन्ति महीभुजम् । लक्ष्मीहृतिकृतोपायाः शत्रवस्ते न मन्त्रिणः ॥ ६१७ ॥**

अन्वयः—छंदवृत्त्या स्वच्छंदं महीभुजं ये रंजयंति, ते लक्ष्मी हृति कृतोपायाः शत्रवः, मंत्रिणः न ॥ ६१७ ॥

अर्थः—निरंकुशपणे पोतानी मरजीमुजब चालनारा राजानी जेओ खुशामत करे छे, (माखण लगाडे छे), तेओ धन हरवामाटेज उपाय शोधनारा (ते राजाना) शत्रुओ छे, परंतु मंत्रिओ नथी. ॥ ६१७ ॥

**अप्रवृत्तिगतं भृत्या मुदे भूपं स्तुवन्ति ये । ते पाययन्ति सर्पींषि कुवैद्या इव सज्वरम् ॥ ६१८ ॥**

अन्वयः—ये भृत्याः अप्रवृत्तिगतं भूपं मुदे स्तुवंति, ते कुवैद्याः इव सज्वरं सर्पींषि पाययंति. ॥ ६१८ ॥

अर्थः—जे नोकरो दुष्कार्य करनारा राजानी खुशामत करी प्रशंसा करे छे, तेओ लेभागु वैद्योनी पेठे तावथी पीडाता मनुष्यने घृत पावासरखुं कार्य करे छे. ॥ ६१८ ॥

**अच्छन्दवादिनो नीतिपात्रं मन्त्रीश मन्त्रिणः । भवन्ति भूभुजां भाग्यवैभवेन भवादृशाः ॥ ६१९ ॥**

अन्वयः–(हे) मंत्रीश! भूभुजां भाग्यवैभवेन भवादृशाः अच्छंदवादिनः नीतिपात्रं मंत्रिणः भवंति. ॥ ६१९ ॥

अर्थः–(वळी हे) मंत्रीश्वर! राजाओना सद्भाग्योना योगेज तमाराजेवा प्रगट रीते (निःशंकपणे) सत्य हकीकत जणावनारा तथा न्यायी मंत्रिओ होइ शके छे. ॥ ६१९ ॥

**युक्तं दुर्गतिकूपस्य कण्ठाग्रादिव गर्वतः । बालको जनकेनेव त्वयाहमपवाहितः ॥ ६२० ॥**

अन्वयः–युक्तं, जनकेन बालकः इव, दुर्गतिकूपस्य कंठाग्रात् इव गर्वतः अहं त्वया अपवाहितः ॥ ६२० ॥

अर्थः–सारुं थयुं के पिता जेम (पोताना) बालकने (बचावे) तेम दुर्गतिरूपी कुवाना कांठाना अग्रभागसरखा गर्वथी (पडता)

एवा मने तमोए बचाव्यो. ॥ ६२० ॥

युक्तमुक्तं च कर्माणि प्रमाणं प्राक्तनानि यत् । दुःस्थादुःस्थव्यवस्थेयमन्यथा प्रथते कथम् ॥ ६२१ ॥

अन्वयः—च प्राक्तनानि कर्माणि प्रमाणं, यत् उक्तं, युक्तं. अन्यथा इयं दुःस्थ अदुःस्थव्यवस्था कथं प्रथते ? ॥ ६२१ ॥

अर्थः—वळी पूर्वे करेलां कर्मोज प्रमाणभूत छे, (एम) जे (तमोए) कह्युं, (ते पण) सत्य छे. (केमके) जो एम न होय तो आ दुःखीसुखीनी व्यवस्था केम विस्तार पामे ? (अर्थात् कोइ दुःखी, अने कोइ सुखी, एवुं क्यांथी बने ?) ॥ ६२१ ॥

कर्माणि न प्रमाणं चेत्तत्सर्वोऽपि न किं प्रभुः । अवश्यं स्वस्य नैव स्यात्कोऽपि क्वाप्यल्पचिन्तकः ॥६२२॥

अन्वयः—चेत् कर्माणि न प्रमाणं, तत् सर्वः अपि प्रभुः किं न ? अवश्यं कः अपि क्व अपि स्वस्य अल्पचिंतकः न एव स्यात्.

अर्थः—(वळी) जो कर्मो प्रमाणभूत न होय, तो सर्व कोइ मनुष्य शेठज केम न होय ? तथा कोइ पण क्यांय पण पोतामाटे जरा पण चिंता करनारो नज होइ शके. ॥ ६२२ ॥

**यतितव्यं ततः प्राज्ञैः शुभे कर्मणि निर्मदैः । अपारं गोष्पदीकर्तुममुं संसारसागरम् ॥ ६२३ ॥**

अन्वयः-ततः अपारं अमुं संसारसागरं गोष्पदीकर्तुं प्राज्ञैः निर्मदैः शुभे कर्मणि यतितव्यं. ॥ ६२३ ॥

अर्थः-माटे अपार एवा आ संसाररूपी महासागरने खाबोचीयां जेवो करवामाटे डाह्या माणसोए मदरहित थइ शुभ कार्य करवामां प्रयत्न करवो. ॥ ६२३ ॥

**यत्तस्य व्रतिनो दृष्टिकण्टकाकृष्टिजं फलम् । तेषां तादृगभूत्किं स्यात्पुंसां तत्रादृते व्रते ॥ ६२४ ॥**

अन्वयः-तेषां यत् तत् तस्य व्रतिनः दृष्टि कंटक आकृष्टिजं तादृक् फलं अभूत्, तत्र व्रते आदृते पुंसां किं स्यात् ? ॥ ६२४ ॥

अर्थः-(वळी) ते त्रणे मित्रोने जे, ते मुनिनी आंखमांथी कांटो खेंची कहाडवानुं तेवी रीतनुं (उत्तम) फल थयुं, तो ते चारित्र लेवाथी पुरुषोने केटलुं (महोटुं) फल प्राप्त थाय ? ॥ ६२४ ॥

**महामात्य ममात्यर्थं तद्व्रतग्रहणे रतिः । तदाशु तद्विधिः सर्वविधिज्ञ मयि धीयताम् ॥ ६२५ ॥**

अन्वयः—(हे) महामात्य! तद्व्रतग्रहणे मम अत्यर्थं रतिः, तत् (हे) सर्वविधिज्ञ! मयि आशु तद्विधिः धीयतां ॥ ६२५ ॥

अर्थः—हे महामंत्रि! ते मुनिव्रत ग्रहण करवानी मने घणीज अभिलाषा छे, माटे हे सर्व विधिना जाणकार मंत्रि! मने तुरत ते मुनिव्रतनी विधि जणावो.! ॥ ६२५ ॥

**अजल्पि कल्पितामोदं दन्तांशुकुसुमव्रजैः। वचो विमलबोधेन सुधानामधिदैवतम् ॥ ६२६ ॥**

अन्वयः—विमलबोधेन दंत अंशु कुसुम व्रजैः कल्पितामोदं, सुधानां अधिदैवतं वचः अजल्पि. ॥ ६२६ ॥

अर्थः-(त्यारे ते) विमलबोध नामनो मंत्री (पोताना) दांतोना किरणोरूपी पुष्पोना समूहोथी सुगंधी थयेलुं, तथा अमृतना अधिष्ठायक देव सरखुं वचन बोल्यो के, ॥ ६२६ ॥

**स्वामिन् सह रहस्येन जानते ये जिनागमम्। त एव गुरवो गौरधियो व्रतविधौ बुधाः ॥ ६२७ ॥**

अन्वयः-(हे) स्वामिन्! रहस्येन सह ये जिनागमं जानते, ते गौरधियः गुरवः एव व्रतविधौ बुधाः. ॥ ६२७ ॥

अर्थः—(हे) स्वामी! भावार्थ सहित जेओ जैनसिद्धांतोने जाणे छे, एवा ते निर्मल बुद्धिवाळा गुरुओज चारित्रनी विधिने जाणनारा होय छे. ॥ ६२७ ॥

अथालपन्नृपः स्मित्वा मन्त्रिन्संभाव्यते बुधः । किं त्वत्तोऽपि गुरुः कोऽपि शास्त्रबोधनशुद्धधीः ॥ ६२८ ॥

अन्वयः-अथ नृपः स्मित्वा अलपत, (हे) मंत्रिन्! त्वत्तः अपि बुधः कः अपि शास्त्रबोधन शुद्धधीः गुरुः किं संभाव्यते? ६२८

अर्थः—पछी राजाए जरा हसीने कह्युं के. हे मंत्री! ताराथी पण चतुर, एवो कोइ पण शास्त्रोने जाणवामां निर्मल बुद्धिवाळो गुरु शुं संभवी शके छे? ॥ ६२८ ॥

उवाच सचिवः स्वामिन्मेदं वादीर्यतो मतः । द्वारं मोक्षस्य धर्मस्य नेत्रं क्षेत्रं धियां गुरुः ॥ ६२९ ॥

अन्वयः—सचिवः उवाच, स्वामिन्! इदं मावादीः, यतः गुरुः मोक्षस्य द्वारं, धर्मस्य नेत्रं, धियां क्षेत्रं मतः. ॥ ६२९ ॥

अर्थः—(त्यारे) मंत्रिए कह्युं के, हे स्वामी! (आप) एम नही बोलो! केमके गुरुने तो मोक्षना द्वार, धर्मना चक्षु, तथा

बुद्धिना क्षेत्ररूप कहेला छे. ॥ ६२९ ॥

ये ऽपि सर्वज्ञदेवास्तेऽप्यामनन्ति गुरुं गुरुम् । प्राग्जन्मगुरुवाक्तेषामपि तत्फलबीजति ॥ ६३० ॥

अन्वयः—अपि ये सर्वज्ञ देवाः, ते अपि गुरुं गुरुं आमनंति, तेषां अपि प्राग्जन्मगुरुवाक् तत्फलबीजति. ॥ ६३० ॥

अर्थः—वळी जे सर्वज्ञ तीर्थंकरो छे, तेओ पण गुरुनेज म्होटा माने छे, (केमके) तेओने पण पूर्व जन्ममां सांभळेली गुरुमहाराजनी वाणीज तेना फलना बीजरूपे परिणमे छे. ॥ ६३० ॥

क्व स सद्गुरुरस्तीति प्रीते पृच्छति पार्थिवे । मन्त्रीन्दुरानयद्दन्तरुग्धौतेन पथा गिरम् ॥ ६३१ ॥

अन्वयः—सः सद्गुरुः क्व अस्ति? इति प्रीते पार्थिवे पृच्छति मंत्रींदुः दंतरुग्धौतेन पथा गिरं आनयत्. ॥ ६३१ ॥

अर्थः—ते सद्गुरु क्यां छे? एम ते आनंद पामेला राजाए पूछवाथी मंत्रीओमां चंद्रसरखा एवा ते विमलबोध मंत्री, दांतोनी कांतिथी धोयेला, एवा (मुखरूपी) मार्गवडे वाणीने लाव्या (बोल्या.) ॥ ६३१ ॥

**शुद्धप्रवचनः शुद्धचरितः शुद्धदेशकः । स्वामिन्गुरुर्गुरूकर्त्तुं योग्यो भाग्येन लभ्यते ॥ ६३२ ॥**

अन्वयः—(हे) स्वामिन्! शुद्धप्रवचनः, शुद्धचरितः, शुद्धदेशकः, गुरूकर्तुं योग्यः गुरुः भाग्येन लभ्यते. ॥ ६३२ ॥

अर्थः—हे स्वामी! निर्मल वाणीवाळा, निर्मल चारित्रवाळा, अने निर्मल उपदेश देनारा, तथा गुरु करवाने लायक एवा गुरु तो भाग्यवडेज प्राप्त थइ शके छे. ॥ ६३२ ॥

**तनोति मन्त्रिणा यावदित्यालापमिलापतिः । तावदाविरभूत्तत्र चित्रमाकस्मिकं महः ॥ ६३३ ॥**

अन्वयः—इलापतिः यावत् इति मंत्रिणा आलापं तनोति, तावत् तत्र आकस्मिकं चित्रं महः आविः अभूत. ॥ ६३३ ॥

अर्थः—राजा जेटलामां एवीरीते (ते) मंत्रीसाथे वातो करे छे, तेटलामां त्यां अकस्मात् आश्चर्यकारक तेज प्रकट थयुं. ॥६३६॥

**क्वचिच्चन्द्रप्रभाचारु क्वचिद्विद्रुमविभ्रमम् । क्वचिदम्भोदसौन्दर्यं क्वचित्काञ्चनकोमलम् ॥ ६३४ ॥**

अन्वयः—क्वचित् चंद्रप्रभाचारु, क्वचित् विद्रुम विभ्रमं. क्वचित अंभोद सौंदर्यं, क्वचित् कांचन कोमलं ॥ ६३४ ॥

अर्थः —(ते तेज) क्यांक चंद्रनी कांतिसरखुं मनोहर, क्यां प्रवालासरखुं (लालरंगनुं), क्यांक वरसादनी सुंदरतावाळुं, तो क्यांक सुवर्णसरखुं निर्मल (देखावा लाग्युं.) ॥ ६३४ ॥

क्वचित्कीरच्छदच्छायं क्वचित्पारापतोपमम् । क्वचित्सिन्दूरविद्योति क्वचित्केकिकलापरुक् ॥ ६३५ ॥

अन्वयः—क्वचित् कीरच्छदच्छायं, क्वचित् पारापतोपमं, क्वचित् सिंदूरविद्योति, क्वचित् केकिकलापरुक् ॥ ६३५ ॥

अर्थः—(वळी) क्यांक पोपटनी पांखोना रंगजेवुं, क्यांक कबुतरना रंग जेवुं क्यांक सिंदूरसरखा रंगवाळुं, अने क्यांक मयूरना पींछांओना रंगसरखुं ( ते तेज देखावा लाग्युं. ) ॥ ६३५ ॥

कीर्णं सभांतः संभ्रान्तस्तदालोक्य तदा नृपः । दृशं प्रतिदिशं तन्वन्जज्ञे विस्मेरविस्मयः ॥ ६३६ ॥

अन्वयः—तदा सभांतः कीर्णं तत् आलोक्य संभ्रांतः नृपः प्रतिदिशं दृशं तन्वन् विस्मेरविस्मयः जज्ञे. ॥ ६३६ ॥

अर्थः—ते वखते (त्यां) सभानी अंदर फेलायेलुं एवुं ते तेज जोइने भ्रांतिमां पडेलो ते राजा दरेक दिशाओमां नजर फेरवतो

थको अति आश्चर्य पामवा लाग्यो. ॥ ६३६ ॥

**आपतन्त्यो महीमस्मत्प्रभुसौभाग्यभाग्यतः । पुरन्दरकुरङ्गाक्ष्यः कटाक्षान्विक्षिपन्ति किम् ॥६३७ ॥**

**आकृष्टः पुण्यपुष्ट्या वा दानीन्द्रस्यास्मदीशितुः । अभ्येति नभसा रत्नद्वीपो रत्नकरान्किरन् ॥६३८॥**

**इत्यनल्पविकल्पोर्मिरसभाजि सभाजने । राज्ञा तज्ज्ञातुमाज्ञापि कोऽप्येकः सेवकः स्वकः ॥ ६३९ ॥**

अन्वयः——अस्मत्प्रभु सौभाग्य भाग्यतः आपतंत्यः पुरंदरकुरंगाक्ष्यः किं कटाक्षान् विक्षिपंति? ॥६३७॥ वा दानींद्रस्य अस्मदीशितुः पुण्यपुष्ट्या आकृष्टः, रत्नकरान् किरन् रत्नद्वीपः (किं) नभसा अभ्येति? ॥ ६३८ ॥ इति अनल्प विकल्प ऊर्मि रसभाजि सभाजने, राज्ञा तद् ज्ञातुं स्वकः कः अपि सेवकः आज्ञापि. ॥ ६३९ ॥ त्रिभिर्विशेषकं ॥

अर्थः——अमारा आ राजाना उमदा भाग्यने लीधे (अहीं) आवती इन्द्राणीओ शुं (पोताना) कटाक्षो फेंके छे? ॥ ६३७ ॥ अथवा दानेश्वरी एवा आ अमारा राजाना पुण्यना जोरथी खेंचायेलो, तथा रत्नोना किरणोने विस्तारतो एवो रत्नद्वीप शुं (अहीं)

आकाशमार्गे चाल्यो आवे छे ! ॥ ६३८ ॥ एवीरीते अनेक प्रकारना विकल्पोना मोजांओना रसने सभासदो अनुभवते छते, राजाए ते हकीकत जाणवामाटे पोताना कोइ एक नोकरने मोकल्यो. ॥ ६३९. ॥

**अध्यास्य सौधमूर्धानमसौ सस्मयविस्मयः । एत्याशु नृपमित्यूचे चञ्चद्रोमाञ्चकंचुकः ॥ ६४० ॥**

अन्वयः–असौ सौधमूर्धान अध्यास्य सस्मय विस्मयः, चंचत् रोमांच कंचुकः आशु एत्य नृपं इति ऊचे. ॥ ६४० ॥

अर्थः––ते नोकर मेहेलनी अगासीपर चडी, हास्य सहित आश्चर्य पामतो थको थता ( हर्षथी शरीरपर ) चळकता रोमांचने धारण करतो थको तुरत ( पाछो ) आवी राजाने एम कहेवा लाग्यो के, ॥ ६४० ॥

**प्रभो पञ्चविधोदञ्चन्मणिसंचयरोचिषः । नृत्यन्त इव केतूनामञ्चलैर्वायुचंचलैः ॥ ६४१ ॥**

**सुस्वादनादाः प्रासादाः प्रसर्पन्तः पुरोपरि । निपतन्तो निरूप्यन्ते नभसः केलिकानने ॥ ६४२ ॥**

अन्वयः–(हे) प्रभो ! पंचविध उदंचन्मणि संचय रोचिषः, वायु चंचलैः केतूनां अंचलैः नृत्यंतः इव, ॥६४१॥ सुस्वादनादाः,

पुर उपरि प्रसर्पंतः प्रासादाः नभसः केलिकानने निपतंतः निरूप्यंते. ॥ ६४२ ॥ युग्मं ॥

अर्थः—(हे) स्वामी ! पचरंगी चळकता मणिओना समूहोनी कांतिवाळा, तथा पवनथी उडता पताकाओना छेडाओथी जाणे नाचता होय नही ! एवा, ॥ ६४१ ॥ मनोहर शब्दोवाळा, तथा (आपणा) नगर उपर थइने चाल्याजता मेहेलो (देवविमानो) आकाशमांथी (आपणा) क्रीडावनमां उतरता देखाय छे. ॥ ६४२ ॥ युग्मं ॥

अथ कौतूहलोत्तालश्चचालाच्छपरिच्छदः । हयैः कतिपयैः केलिवनाय क्षितिनायकः ॥ ६४३ ॥

अन्वयः—अथ कौतूहलोत्तालः क्षितिनायकः अच्छपरिच्छदः कतिपयैः हयैः केलिवनाय चचाल. ॥ ६४३ ॥

अर्थः—पछी ( ते ) आश्चर्य ( जोवानी इच्छाथी ) उत्सुक थयेलो ते राजा स्वल्प परिवार सहित केटलाक घोडाओ (स्वारो) साथे ते क्रीडावनप्रते चालवा लाग्यो. ॥ ६४३ ॥

स यावज्जगतीहारः प्राकारद्वारमागमत् । गत्यातुरः पुरस्तावदारामपतिरापतत् ॥ ६४४ ॥

अन्वयः—सः जगतीहारः यावत् प्राकारद्वारं आगमत्, तावत् गत्यातुरः आरामपतिः पुरः आपतत्. ॥ ६४४ ॥

अर्थः—ते राजा जेवामां कोटना दरवाजामां आव्यो, तेवामां उतावळथी चालतो वनपाल (तेनी) पासे आव्यो. ॥ ६४४ ॥

**वनस्वरूपं भूपेन पृष्टः संहृष्टमानसः । स जगौ जगदानन्दरसनिस्यन्दिनीं गिरम् ॥ ६४५ ॥**

अन्वयः—भूपेन वनस्वरूपं पृष्टः संहृष्टमानसः सः जगत् आनंद रस निस्यंदिनीं गिरं जगौ. ॥ ६४५ ॥

अर्थः—(त्यारे) राजाए तेने वननुं स्वरूप पूछवाथी खुशी थयेला हृदयवाळो ते वनपाल जगतने आनंदरस आपनारी वाणी बोलवा लाग्यो के, ॥ ६४५ ॥

**स्वामिन्कश्चन चण्डांशुनिवहस्य रहस्यवत् । धाम्नां धाम त्वदाराममाजगाम महामुनिः ॥ ६३६ ॥**

अन्वयः—( हे ) स्वामिन् ! चंडांशुनिवहस्य रहस्यवत् धाम्नां धाम कश्चन महामुनिः त्वत्आरामं आजगाम. ॥ ६४६ ॥

अर्थः—हे स्वामि ! सूर्योना समूहना तत्वनी पेठे तेजना स्थान सरखा कोइक महान् मुनि आपना बगीचामां पधार्या छे.

आगत्य कापि शम्पाभसंपच्चम्पककाननात् । अमुं ननाम कामस्याङ्गिनी शक्तिरिवाङ्गना ॥ ६४७ ॥

अन्वयः—शपाभसंपत् कामस्य अंगिनी शक्तिः इव का अपि अंगना चंपक काननात् आगत्य अमुं ननाम. ॥ ६४७ ॥

अर्थः—वीजळीसरखा ( तेजनी ) समृद्धिवाळी, तथा कामदेवनी देहधारी शक्तिजेवी कोइक स्त्रीए चंपकवनमांथी आवीने ते मुनिराजने नमस्कार कर्यो. ॥ ६४७ ॥

कुसुमद्रुममौलिभ्यः समुत्तीर्य तदा मुदा । स्त्रीणां गणः प्रणम्यापि वर्यस्तं पर्यचारयत् ॥ ६४८ ॥

अन्वयः—तदा स्त्रीणां वर्यः गणः कुसुम द्रुम मौलिभ्यः समुत्तीर्य, तं अपि प्रणम्य मुदा पर्यचारयत्. ॥ ६४८ ॥

अर्थः—ते वखते स्त्रीओनो मनोहर समूह प्रफुल्लित थयेलां वृक्षोनी टोचेथी उतरीने ते मुनिराजने नमी हर्षथी तेमनी उपासना करवा लाग्यो. ॥ ६४८ ॥

ततो धात्रीतले तत्र पवित्रे चित्रकारणम् । सहस्रपत्रमासूत्रि तपनीयमयं तया ॥ ६४९ ॥

अन्वयः-ततः तया तत्र पवित्रे धात्री तले चित्र कारणं तपनीयमयं सहस्रपत्रं आमुत्रि. ॥ ६४९ ॥

अर्थः--पछी तेणीए ते पवित्र पृथ्वीतलपर आश्चर्यकारक सुवर्णनुं कमल बनाव्युं. ॥ ६४९ ॥

धन्यस्तन्मध्यमध्यास्य घनाघनघनध्वनिः । कर्णैकपेयं पीयूषमुच्चैः किंचिदुवाच सः ॥ ६५० ॥

अन्वयः-धन्यः घनाघन घन ध्वनिः सः तन्मध्यं अध्यास्य उच्चैः कर्णैकपीयूषं किंचित् उवाच. ॥ ६५० ॥

अर्थः—(पछी) प्रतापशाली तथा वरसादनी गर्जना सरखी गंभीर ध्वनिवाळा ते मुनिराज ते कमलनी वच्चे बेसीने उंचे स्वरे कर्णमां अमृतसरखा कांइक शब्दो बोलवा लाग्या. ॥ ६५० ॥

लोलाः कोलादयो वन्या धन्यंमन्या इवामितः । तद्वाग्नवसुधां पातुमुपान्तवसुधां श्रिताः ॥ ६५१ ॥

अन्वयः—कोलआदयः लोलाः वन्याः धन्यं मन्याः इव अमितः तद् वाक् नवसुधां पातुं उपांत वसुधां श्रिताः ॥ ६५१ ॥

अर्थः—(पछी) शीयाल आदिक चपल एवा वनना प्राणीओ जाणे पोताने धन्य मानता होय नही! तेम चोतरफथी ( त्यां

आवीने ) ते मुनिनी वाणीरूपी नवां अमृतने पीवामाटे ( ते कमलनी ) नजीकनी जमीनपर बेसी गया. ॥ ६५१ ॥

आसीनास्तरुराशीनामुपर्यालोलमौलयः । दिग्भ्योऽभ्येत्य मुदं भेजुः पिबन्तस्तस्य गाः खगाः ॥ ६५२ ॥

अन्वयः—दिग्भ्यः अभ्येत्य तरु राशीनां उपरि आसीनाः, लोलमौलयः खगाः तस्य गाः पिबंतः मुदं भेजुः. ॥ ६५२ ॥

अर्थः—दिशाओमांथी आवीने वृक्षोना समूहोनी उपर बेठेला, तथा चपल मस्तकोवाळा पक्षिओ ते मुनिराजनी वाणीने पीता-थका (सांभळता थका) आनंद पामवा लाग्या. ॥ ६५२ ॥

विमानैर्व्योमतस्तूर्णमुत्तीर्णा वर्णिनीवृताः । उद्यदानन्दविद्योतमाननिर्माननमानसाः ॥ ६५३ ॥

जगद्गुरो जय जय वज्रनाभमुनीश्वर । इति स्तुत्वा च नत्वा च तस्थुस्तस्य पुरः सुराः ॥६५४॥युग्मम्॥

अन्वयः—व्योमतः विमानैः तूर्णं उत्तीर्णाः, वर्णिनी वृताः, उद्यत् आनंद विद्योतमान निर्मान मानसाः ॥ ६५३ ॥ ( हे ) जगत् गुरो ! वज्रनाभमुनीश्वर ! जय ? जय ? इति च स्तुत्वा, च नत्वा सुराः तस्य पुरः तस्थुः. ॥ ६५४ ॥ युग्मं ॥

अर्थः—आकाशमांथी विमानोवडे तुरत उतरेला, देवांगनाओथी घेरायेला, तथा उत्पन्न थता आनंदथी उछळतां छे विशाल हृदयो जेनां, । ६५३ ॥ (तथा) हे जगतना स्वामी! एवा श्रीवज्रनाभ मुनिश्वर! तमो जय पामो? एम (तेमनी) स्तुति करीने, तथा नमीने देवो तेमनी पासे बेठा. ॥ ६५४ ॥ युग्मं ॥

इत्यक्षिसाक्षिणीमाख्यामाख्यातुं भवतः प्रभो । मुक्त्वा मनोऽपि तत्रैव त्वरयाहमिहागमम् ॥ ६५५ ॥

अन्वयः—(हे) प्रभो! इति अक्षिसाक्षिणीं आख्यां भवतः आख्यातुं मनः अपि तत्र एव मुक्त्वा अहं त्वरया इह आगमं ।६५५।

अर्थः—हे स्वामी! एवी रीते नजरे जोयेलुं ते वृत्तांत आपने निवेदन करवामाटे (मारुं) हृदय पण त्यांज मूकीने हुं उतावळथी (एकदम) अहीं आवेलो छुं. ॥ ६५५ ॥

अथ धात्रीभुजा मन्त्री वीक्ष्यमाणमुखोऽवदत् । शङ्केऽसौ केवलज्ञानी वज्रनाभो महामुनिः ॥ ६५६ ॥

अन्वयः—अथ धात्रीभुजा वीक्ष्यमाणमुखः मंत्री अवदत्, असौ केवलज्ञानी वज्रनाभः महामुनिः, शंके. ॥ ६५६ ॥

अर्थः—हवे राजावडे जोवाता मुखवाळो ते मंत्री बोल्यो के, आ केवलज्ञानी श्रीवज्रनाभनामना महामुनि होवा जोइये, एवुं हुं अनुमान करुं छुं. ॥ ६५६ ॥

**महीरुहामधिष्ठानदेवीभिः सेव्यमानया । वनदेवतया देव तयादौ कृतसत्कृतिः ॥ ६५७ ॥**

**मुदां निदानं सत्त्वानां तत्त्वानां रत्नदीपिकाः । मुनिः प्रतनुते धर्मदेशनाः क्लेशनाशिनीः ॥६५८॥ युग्मं॥**

अन्वयः-(हे) देव! महीरुहां अधिष्ठानदेवीभिः सेव्यमानया तया वनदेवतया आदौ कृतसत्कृतिः ॥ ६५७ ॥ मुनिः सत्त्वानां मुदां निदानं, तत्त्वानां रत्नदीपिकाः, क्लेशनाशिनीः धर्मदेशनाः प्रतनुते. ॥ ६५८ ॥ युग्म ॥

अर्थः—हे स्वामी! वृक्षोनी अधिष्ठात्री देवीओवडे सेवायेली, एवी ते वनदेवीए प्रथम करेल छे सत्कार जेमनो, ॥ ६५७ ॥ एवा ते श्रीवज्रनाभमुनि प्राणीओने हर्षना कारणरूप, तथा तत्त्वोने देखाडवामां रत्नोना दीवाओ सरखी, अने क्लेशनो नाश करनारी एवी धर्मदेशनाने (त्यां) विस्तारी रह्या छे. ॥ ६५८ ॥ युग्मं ॥

**तद्भ्रांन्तिर्यत्र ते सैष धर्मः साक्षात्प्रमीयताम् । यद्देव देवतावृन्दैः सेव्यते स पुमानपि ॥ ६५९ ॥**

अन्वयः-(हे) देव ! तत् यत्र ते भ्रांतिः, सः एषः धर्मः साक्षात् प्रमीयतां ? यत् पुमान् अपि सः देवतावृंदैः सेव्यते. ६५९

अर्थः-हे स्वामी ! माटे जे धर्मना संबंधमां आपने शंका छे, ते आ धर्मने तमो साक्षात् नजरे जुओ ? केमके पुरुष (मनुष्य) होवा छतां पण ते मुनि देवोना समूहो वडे सेवाइ रहेला छे. ॥ ६५९ ॥

**राजाथ तेन धर्मस्य प्रामाण्येन चमत्कृतः । लोलमौलिः सहर्षाश्रुः सरोमाञ्चः क्षणं स्थितः ॥ ६६० ॥**

अन्वयः—अथ धर्मस्य तेन प्रामाण्येन चमत्कृतः राजा, क्षणं लोलमौलिः, सहर्षअश्रुः, सरोमांचः स्थितः. ॥ ६६० ॥

अर्थः-हवे धर्मनी ते प्रमाणताथी आश्चर्य पामेलो ने राजा क्षणवार तो मस्तक धुणावतो, हर्षना आंसुओ सहित रोमांचित थइने ( त्यां ) स्थिर थइ गयो. ॥ ६६० ॥

**सत्कृत्याथ वनीपालमवनीपालपुङ्गवः । आगादुद्यानमेदिन्यां मुनीन्द्रोत्कण्ठया रयात् ॥ ६६१ ॥**

अन्वयः—अथ वनीपालं सत्कृत्य अवनीपाल पुंगवः मुनींद्रउत्कंठया रयात् उद्यानमेदिन्यां आगात् ॥ ६६१ ॥

अर्थः—पछी ( ते ) वनपालनो सत्कार करीने राजा ( ते ) मुनीश्वरने ( वांदवानी ) उत्कंठाथी एकदम ( ते ) बगीचानी भूमिमां आव्यो. ॥ ६६१ ॥

**विलोक्य पुलकी तत्र चित्रां मुनिविभोः सभाम् । भवार्णवतरङ्गाभात्तुरङ्गादुत्ततार सः ॥६६२ ॥**

अन्वयः—तत्र मुनिविभोः चित्रां सभां विलोक्य पुलकी सः भवअर्णव तरंगाभात् तुरंगात् उत्ततार. ॥ ६६२ ॥

अर्थः—त्यां (ते) मुनिराजनी आश्चर्यकारक सभा जोइने रोमांचित थयेलो ते राजा संसारसमुद्रना मोजां सरखा घोडापरथी ( नीचे ) उतर्यो. ॥ ६६२ ॥

**ततो विमलबोधेन बोधितो वसुधाधिपः । भव्यभूपोचिताः पञ्च वितेने विनयक्रियाः ॥ ६६३ ॥**

अन्वयः—ततः विमलबोधेन बोधितः वसुधाधिपः भव्यभूपउचिताः पंच विनयक्रियाः वितेने. ॥ ६६३ ॥

अर्थः-पछी(ते)विमलबोध मंत्रीश्वरे समजाव्याथी ते राजा उत्तम भूपतिने योग्य, एवी पांच प्रकारनी विनयक्रिया करवा लाग्यो.

तथाहि । गुरोरंह्रिरजो मूर्ध्ना स्पृशतो मेऽन्तरस्थितः । असौ स्खलनकारीति किरीटं किल सोऽमुचत् ।६६४।

अन्वयः-तथाहि-गुरोः अंह्रिरजः मूर्ध्ना स्पृशतः मे अंतरस्थितः असौ स्खलनकारी, इति किल सः किरीटं अमुचत्. ।६६४।

अर्थः—ते कहे छे-आ गुरुमहाराजना चरणोनी रजने मस्तकवडे स्पर्श करती वेळाये मने वच्चे रहेलो आ अटकायत करनार छे, एम विचारी खरेखर तेणे (पोतानो) मुकुट उतारी नाख्यो. ॥ ६६४ ॥

भूपावतंसः संसारवार्धिवृद्धिकरं ततः । निशाधवमिव च्छत्रं गौरच्छायमदूरयत् ॥ ६६५ ॥

अन्वयः-ततः संसारवार्धिवृद्धिकरं निशाधवं इव गौरच्छायं छत्रं भूपावतंसः अदूरयत्. ॥ ६६५ ॥

अर्थः-पछी संसाररूपी समुद्रनी वृद्धि करनारा चंद्र सरखा श्वेत कांतिवाळा छत्रने ते महाराजाए दूर कर्युं. ॥ ६६५ ॥

गन्तव्यं भुवनाम्भोजभास्करस्य पुरो गुरोः । इत्यमुञ्चत शस्त्रालीं क्ष्मापः पापतमस्तमीम् ॥ ६६६ ॥

अन्वयः—भुवन अंभोज भास्करस्य गुरोः पुरः गंतव्यं, इति क्ष्मापः पापतमस्तमीं शस्त्रालीं अमुंचत. ।।६६६।।

अर्थः—जगतरूपी कमलने विकस्वर करवामां सूर्य सरखा गुरुमहाराजनी पासे ( हवे तो ) जवानुं छे, एम विचारी राजाए पापरूपी अंधकारनी रात्रिसरखी शस्त्रोनी श्रेणि छोडी दीधी. ।। ६६६ ।।

**वर्यं भाति ममैश्वर्यं गुरुपादनखांशुभिः । सम्प्रत्याभ्यां किमित्येष चक्रे चामरवारणम् ।। ६६७ ।।**

अन्वयः—गुरुपादनखांशुभिः मम ऐश्वर्यं वर्यं भाति, संप्रति आभ्यां किं? इति एषः चामरवारणं चक्रे. ।। ६६७ ।।

अर्थः—गुरुमहाराजना चरणोना नखोना किरणोवडेज मारी म्होटाइ शोभनीक थवानी छे, माटे हवे आनी शी जरुर छे? एम विचारि ते राजाए (वींझातां) बन्ने चामरो अटकाव्यां. ।। ६६७ ।।

**समुत्तीर्येव संसाराटवीमुत्कटकण्टकाम् । सोऽमुञ्चन्मुनिवाग्वापीरसं पातुमुपानहौ ।। ६६८ ।।**

अन्वयः—उत्कटकंटकां संसारअटवीं समुत्तीर्य इव, मुनिवाक्वापीरसं पातुं सः उपानहौ अमुचत्. ।। ६६८ ।।

अर्थः—भयंकर कांटाओवाळी एवी आ संसाररूपी अटवीने जाणे ओळंगी गयो होय नही! तेम, ते मुनिराजनी वाणीरूपी वावडीनो रस (जल) पीवामाटे तेणे कांटारखां तजी दीधां. ॥ ६६८ ॥

पुनः सचिवराजेन राजा विज्ञापितस्ततः । चकार पञ्चाभिगमानुचितान्गुरुदर्शने ॥ ६६९ ॥

अन्वयः—ततः पुनः सचिवराजेन विज्ञापितः राजा गुरुदर्शने उचितान् पंच अभिगमान् चकार. ॥ ६६९ ॥

अर्थः-पछी वळी ते मंत्रिराजना कहेवाथी ने राजाए गुरुमहाराजना दर्शनमाटे योग्य एवा पांच अभिगमो साचव्या. ॥६६९॥

तद्यथा । चन्दनाम्बुजताम्बूलपरिहारपदात्तदा । रागत्यागस्य पुण्याहमङ्गलं विदधे सुधीः ॥ ६७० ॥

अन्वयः—तद्यथा-तदा चंदन अंबुज तांबूल परिहारपदात् सुधीः रागत्यागस्य पुण्याहमंगलं विदधे. ॥ ६७० ॥

अर्थः-ते आ प्रमाणे-ते वखते चंदन, पुष्प तथा तांबूलने तजवाना मिषथी ते उत्तम बुद्धिवाळा राजाए रागने तजवानुं(पहेलुं) पवित्र मंगल कर्युं ॥ ६७० ॥

विशेषाद्भूषणं बिभ्रद्भूपोऽभान्मुद्रिकादिकम् । पूर्णगुर्वागतश्रद्धः पुण्यद्रुरिव पुष्पितः ॥ ६७१ ॥

अन्वयः—पूर्णगुरुआगतश्रद्धः, मुद्रिकादिकं भूषणं विशेषात् बिभ्रत् भूपः पुष्पितः पुण्यद्रुः इव अभात्. ॥ ६७१ ॥

अर्थः—संपूर्ण रीते गुरुमहाराजमां बेठेली छे श्रद्धा जेने, तथा वींटीओ आदिक आभूषणोने विशेष प्रकारे धारण करतो एवो ते राजा, प्रफुल्लित थयेलां पुण्यना वृक्षसरखो शोभवा लाग्यो. ॥ ६७१ ॥

नखरत्नप्रभामञ्जुमञ्जलिं मस्तके दधत् । गुर्वालोके बभौ भूपोऽशेखरोऽपि सशेखरः ॥ ६७२ ॥

अन्वयः—गुरुआलोके नखरत्नप्रभामंजुं अंजलिं मस्तके दधत् भूपः अशेखरः अपि सशेखरः बभौ . ॥ ६७२ ॥

अर्थः—गुरुमहाराजने जोतांज (पोताना) नखोरूपी रत्नोनी कांतिवडे मनोहर थयेला अंजलिने (पोताना) मस्तकपर धारण करतो एवो ते राजा मुकुटविना पण (जाणे) मुकुटसहित शोभवा लाग्यो ॥ ६७२ ॥

प्रदर्श्या वामता नात्र प्रकाश्या दक्षिणस्थितिः । स दक्षः कृतवैकक्षश्वख्यावंसमिषादिव ॥ ६७३ ॥

अन्वयः—कृतवैकक्षः सः दक्षः अंसमिषात् चख्यौ इव, अत्र वामता न प्रदर्श्या, दक्षिणस्थितिः प्रकाश्या. ॥ ६७३ ॥

अर्थः—करेल छे ( जमणा खंभापर ) उत्तरासंग जेणे एवो ते चतुरराजा पोताना ( बन्ने ) खभाओना मिषथी जाणे एम जणावतो होय नही! के, अहीं वामता एटले आडाइ ( पक्षे-डाबी बाजु ) न देखाडवी जोइये, परंतुचराइ ( पक्षे-जमणी बाजु ) प्रकाशवी जोइये. ॥ ६७३ ॥

**गुरोर्गिरः सुधाधारा यान्तु मा कर्णतो बहिः । इत्यसौ हृद्धटं स्थैर्ये सुस्थिते सुस्थितं व्याधात् ॥६७४॥**

अन्वयः—गुरोः गिरः सुधाधाराः कर्णतः बहिः मा यांतु, इति असौ सुस्थिते स्थैर्ये हृद्घटं सुस्थितं व्यधात्. ॥ ६७४ ॥

अर्थः-गुरु महाराजनी वाणीरूपी अमृतनी धाराओ कर्णमांथी ( पक्षे-कांठा उपरथी ) बहार न निकळी जाओ, एवा हेतुथी ते राजाए उत्तम प्रकारनी स्थिरतामां ( पक्ष निश्चल स्थानपर ) पोताना हृदयरूपी घडाने सारी रीते स्थिर राख्यो. ॥ ६७४ ॥

**अथ हर्षप्रकर्षश्रीपद्मं पद्मोत्तरः सुधीः । प्रविवेश नरेशस्तां मुनिहंसस्य संसदम् ॥ ६७५ ॥**

अन्वयः-पछी हर्षप्रकर्षश्रीपद्मं, सुधीः पद्मोत्तरः नरेशः मुनिहंसस्य तां संसदं प्रविवेश. ॥ ६७५ ॥

अर्थः-पछी हर्षना विस्तारुरूपी लक्ष्मीने रहेवा माटे कमल सरखो, अने उत्तम बुद्धिवाळो ते पद्मोत्तरराजा, ते श्रीवज्रनाभ नामना मुनिरूपी हंसनी ते सभामां दाखल थयो. ॥ ६७५ ॥

**संक्षिपन्निव संसारं भ्रमणत्रयमात्रया । विततार मुनेस्तस्य तिस्रो दक्षः प्रदक्षिणाः ॥ ६७६ ॥**

अन्वयः—भ्रमणत्रयमात्रया संसारं संक्षिपन् इव, दक्षः (सः) तस्य मुनेः तिस्रः प्रदक्षिणाः विततार. ॥ ६७६ ॥

अर्थः—फक्त त्रण भ्रमणना परिभ्रमणथीज जाणे (समस्त) संसारने टुंको करी नाखतो होय नही ! एम ते चतुर राजाए ते मुनिराजनी त्रणवार प्रदक्षिणा करी. ॥ ६७६ ॥

**हृष्यन्मना ननामाथ क्ष्मानाथः कर्ममाथकम् । एनं मुनीन्द्रमुन्निद्रभावनापावनात्मकः ॥ ६७७ ॥**

अन्वयः—अथ उन्निद्र भावना पावनात्मकः क्ष्मानाथः हृष्यन्मनाः कर्ममाथकं एनं मुनींद्रं ननाम. ॥ ६७७ ॥

अर्थः—पछी प्रगट थयेली (शुभ) भावनाथी पवित्र आत्मावाळा (ते) राजाए हृदयमां आनंद पामीने कर्मोनो नाश करनारा ते मुनिराजने नमन कर्युं. ॥ ६७७ ॥

मुनिक्रमनखज्योतिः सन्ध्याभं मूर्ध्नि भूपतेः । नमतः सूचयामास सद्ध्यानार्चिर्विधूदयम् ॥ ६७८ ॥

अन्वयः—नमतः भूपतेः मूर्ध्नि संध्याभं मुनिक्रमनखज्योतिः सद्ध्यानअर्चिः विधु उदयं सूचयामास. ॥ ६७८ ॥

अर्थः—नमता एवा (ते) राजाना मस्तकपर संध्यासरखो (ते) मुनिराजना चरणोना नखोनो प्रकाश, उत्तम ध्यानना तेजरूपी चंद्रनो उदय सूचववा लाग्यो. ॥ ६७८ ॥

मुनीन्द्रावेक्षणक्षूणकारीणि स्युरिमानि किम् । इत्यश्रूणि निनिन्दैष हर्षोत्कर्षोद्भवान्यपि ॥ ६७९ ॥

अन्वयः—मुनींद्र अवेक्षण क्षूण कारीणि इमानि किं स्युः? इति एषः हर्षोत्कर्षउद्भवानि अपि अश्रूणि निनिंद. ॥ ६७९ ॥

अर्थः—आ मुनिमहाराजनुं दर्शन करवामां विघ्न करनारां आ (अश्रु)ओनी अत्यारे मने शी जरुर हती? एम (विचारतो थको)

ते राजा हर्षना उछाळाथी उत्पन्न थयेलां एवां (पोताना अश्रुओने निंदवा लाग्यो ॥ ६७९॥

इत्थं स पार्थिवगुरुर्गुरुभक्तिमुच्चै रोमाञ्चकञ्चुकधरो मधुरां विधाय ।
हृष्टाशयः समुचितासनसंनिविष्टः श्रद्धां प्रियामभिनवां स्वहृदा दधानः ॥ ६८० ॥
आह्लादनं सकललोकविलोचनानां श्रीवज्रनाभवदनेन्दुमुदीक्षमाणः ।
वाक्चन्द्रिकां रसयितुं सुरसङ्घसेव्यां पद्मोत्तरः परिचकार चकोरचर्याम् ॥ ६८१ ॥ युग्मम् ॥

अन्वयः—इत्थं रोमांचकंचुकधरः, हृष्टाशयः, समुचित आसनसंनिविष्टः, अभिनवां श्रद्धां प्रियां स्वहृदा दधानः, पार्थिवगुरुः सः पद्मोत्तरः उच्चैः मधुरां गुरुभक्तिं विधाय, सुरसंघ सेव्यां वाक्चंद्रिकां रसयितुं सकललोकविलोचनानां आह्लादनं श्रीवज्रनाभवदनेंदुं उदीक्षमाणः चकोरचर्यां परिचकार. ॥ ६८० ॥ ६८१ ॥ युग्मं ॥

अर्थः—एवीरीते ( विकस्वर थयेलां ) रोमांचोरूपी कंचुकने धारण करनारो, हर्षयुक्त आशयवाळो, योग्य आसनपर बेठेलो,

श्रद्धारूपी नवी प्रियतमाने हृदयपर धारण करतो, तथा राजाओनो( पण )स्वामी, एवो ते पद्मोत्तर राजा, उंचे प्रकारे मनोहर गुरुभक्ति करीने, देवोना समूहथी सेवाती, एवी ( ते मुनिराजनी ) वाणीरूपी चांदनीनो स्वाद लेवाने, सर्व लोकोनां चक्षुओने आनंद उपजावनारा, एवा ते श्रीवज्रनाभमुनिना मुखरूपी चंद्रने उंचुं जोइ निहाळतो थको चकोरपक्षीनी रीतिने अंगीकार करवा लाग्यो. ॥ ६८० । ६८१ ॥ युग्मं ॥

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविजयसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्रीवासुपूज्यचरिते आह्लादनाङ्के महाकाव्ये सद्गुरुलब्धिवर्णनो नाम प्रथमः सर्गः ॥

एवी रीते दंडाधिपति श्रीमान आह्लादननी प्रार्थनाथी श्रीविजयसिंहसूरिजीना शिष्य श्री वर्धमानसूरिजीए रचेला आह्लादनअंकवाळा श्री वासुपूज्यचरित्र नामना महाकाव्यमां सद्गुरुनी प्राप्तिना वर्णनरूप पहेलो सर्ग समाप्त थयो. ॥ श्री रस्तु. ॥

आ ग्रंथनो अन्वय तथा तेनुं गुजराती भाषांतर जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे रचीने स्वपरना श्रेय माटे ते ग्रंथ पोताना श्री जैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे. । श्री रस्तु. ।

॥ समाप्तोऽयं श्रीवासपूज्यचरित्रस्य सान्वयो गूर्जरभाषांतरोपेतश्च प्रथमो भागः ॥

गुरुश्रीमच्चारित्रविजय सुप्रसादात्. ॥ श्री रस्तु. ॥

॥ इति श्री वासुपूज्य चरित्रे प्रथमो भागः समाप्तं ॥